As a matter of fact the real story of the play begins from the second act. The First act dealing with the quarrel among Lakṣmī, Sarasvatī and Gaṅgā and the episode of Vedavatī appear to be irrelevant when we examine them from a strictly dramatic point of view. The relation between Vedavatī and Tulasī has not been clearly shown, nor has he shown clearly how Sarasvatī's curse upon Lakṣmi got fulfilled through Tulasī. It is to be inferred from one or two casual references only.

Although the episode of Vedavatī occurs in the Purāṇa, the dramatist could have easily dropped the episode from the structure of the play. By following the puranic narratives too faithfully, the writer has destroyed the unity of the story. It has become a loose and diffused work without any unified structural pattern. There is little attempt at characterisation.

All the songs of this play set to classical *rāgas* are Assamese.

## GENERAL CHARACTERISTICS AND TECHNICAL REMARKS

The three plays presented here reveal the technique and characteristics of the *Aṅkiyā-nāṭa,* a type of Assamese drama introduced by Śaṁkaradeva the

Vaiṣṇavite poet and reformer of the 15th—16th century. The relation these three plays bear to the *Aṅkiyā-nāṭa*, would be best revealed if the salient features of this type of drama are noted here.

Śaṅkaradeva (1449—1568) and his most prominent disciple Mādhavadeva (1490—1596), each composed six one-act plays in the Brajabuli language. The bare framework of these plays is modelled on the Sanskrit drama. The initial benedictory stanzas (*nāndī*), the prologue (*prastāvana*) and the sūtradhāra who introduces them are based to a certain extent on the Sanskrit drama. The concluding benedictory lines known as *muktimaṅgala* bears certain resemblance to the *Bharatavākya* of the Sanskrit plays. The preponderance of music, lyrical verses and prose narratives of the Sūtradhāra at the cost of characterisation and dialogue is a special feature of this type of Assamese medieval plays. Another noticeable feature is that the Sūtradhāra exists as a permanent character from the prologue to the end of the play. He performs the preliminary rites and recitations, introduces the dramatis personæ, maintains the link between different incidents, gives explanatory remarks or comments wherever necessary, sings songs and finally recites the concluding verses. He is the key-man of the performance and the characters are more or less puppets in his hands. They speak and act according to his bidding. Though Brajabuli is the normal medium of expression, Sanskrit verses in the *śloka* metre are introduced intermittently to indicate changes of situation or action. The lyrical element consists of three varieties of songs—(I) highly devotional and sublime prayers, known as *Bhaṭimā*, (II) songs set to *rāgas* and *tālas* expressing moods and emotions of characters, (III) descriptive *payārs* expressing beauty of heroes and heroines or pathetic situations. Besides the above three, Sanskrit slokas are found spread over the entire play.

Now, when we examine the three plays under discussion in the light of the above characteristics of the *Aṅkiyā-nāṭa*, it becomes apparent that the technique of these three Sanskrit plays is borrowed from the above type of Assamese plays. Here we find the Sūtradhāra piloting the entire play from the prologue to the end. Preponderance of the lyrical element consisting of prayers and songs which marks all the three plays, is also the characteristic of the Assamese medieval plays mentioned above. Like the *Aṅkiyā-nāṭa* there is little attempt at characterisation and plot construction. The playwrights have not paid any attention to endow the characters with individuality. Dialogue is meagre compared with the volume of Sūtradhāra's narratives and explanatory notes. The use of *Bhaṭimā* (*As-Bhaṭimā*), *Pajhaṭikā* (equivalent to Assamese *payār*) and *ślokas* speaks clearly how deeply the technique of *Aṅkiyā-nāṭa* influenced these writers.

These three plays, however, differ from the *Aṅkiyā-nāṭa* in respect of the number of acts. The Assamese plays are one-act plays, whereas these three plays contain more than one act. Unlike the Sanskrit drama each act begins and ends with benedictory stanzas.

Another peculiar feature of these plays is the employment of Assamese songs. In this respect they resemble the medieval Maithili plays of Vidyāpati Thakur and Umāpati Upadhyae. In those medieval Maithili plays, the dialogue is in Sanskrit or Prākṛt, while the songs are in Maithili. *Vighneśajanmodaya* has not introduced Assamese songs, but it has boldly introduced Assamese metres. *Kāmakumāraharaṇa* has gone so far as to introduce Assamese nuptial song (*biyānām*) sung by women-folk.

The unties of time, place and action have not been carefully observed. The presence of the Sūtradhāra throughout the entire play has helped the dramatists to do away with the difficulty created by time and place factors. The Sūtradhāra keeps the audience informed about the change of place or lapse of

time whenever necessary. So the auidence is not put to difficulty to follow the course of events depicted in the plays. The plot construction is very weak in all the three plays. The stories of the plays are diffused and therefore lack unity and harmony in structure.

## STYLE AND METRE

Although the medium of expression of the three plays is Sanskrit and although there is nothing wrong from the linguistic point of view, yet it may be said that their writing appears to be lacking in felicity of diction and their style of composition is not very much idiomatic. At places, for instance the opening prose descriptions of *Kāmakumāra-haraṇa* or *Vighneśajanmodoya*, it has become highly ornate and artificial and in other places dull and insipid. The dialogues of the characters are lacking in brilliancy. It appears from their language that the writers must have first conceived the sentences in Assamese and then translated them into Sanskrit. That is why we find Assamese manner of expression through the medium of Sanskrit. Otherwise, prose narratives and dialogues are simple and straightforward in expression. Some of the songs, specially of *Kāmakumāraharaṇa*, are really sweet and poetical.

The dramatists have employed a large number of metres, both Sanskrit and Assamese. The opening benedictory verses as well as concluding verses of each act are couched in *Vṛttachanda*, i.e., the lines are regulated by the quantity of syllables. The descriptive stanzas in the midst of each act are mostly in the *śloka* or *anuṣṭubh* metre. The songs of *Kāmakumāraharana*, with a few exceptions, are mostly written in moric rhymed metres like those of Jayadeva's *Gītagovinda*. For instance, the first, second and the third stanzas of the first play of this collection are *Śārdūlavikrīḍita*, *Sragdhārā* and *Vasantatilaka* respectively, whereas verses 4—20 are regulated by moric metres. Side by side with Sanskrit songs in classical metres, Assamese songs and metres have also been introduced. The second play in this collection does not contain any Assamese song, but the other two have incorporated several Assamese songs. *Vighneśajanmodaya* has introduced the maximum number of Assamese songs. Assamese is the sole medium of expression so far as songs of this play are concerned. The first play, however, introduces a very limited number of Assamese songs. Assamese songs are written in different metres, viz., *dulari*, *chabi*, *lechārī*, *pada* and *muktāvalī*. These songs have employed to express feelings and emotions of characters in different situations.

In *Vighneśajanmodaya*, we notice a new experiment with Assamese metres. It has already been said that the songs of this play are all in Sanskrit, but metres employed therein are Assamese. Assamese does not usually distinguish, in pronunciation, long or short syllables, nor does it distinguish different syllabic instants. All syllables, be they long or short in Sanskrit, were considered in early Assamese, as having the force of one syllabic instant. Let us take one example :

I I I I II I I III III
जन्मिल मात्रके बाला भैलेक युवती ।
I II I II II III III
अन्धकार फेरि ज्वले सूर्यर जेडति ॥

In the above two lines there are fourteen syllables as well as fourteen syllabic instants. This is called *pada* or *payār*. Thus the metre is regulated by the number of vowel-ending letters, each of which is considered as having the force of one syllabic instant. In early Assamese verses *halanta* sounds are never

used. In principal Assamese metres *dulari, chabi, lechāri* and *muktāvalī*, each line consists of three feet having 6+6+8, 8+8+10, 10+10+14 and 12+12+14 syllabic instants respectively. Now, the speciality of the Sanskrit language consists in proper pronunciation of long and short syllables. But when all the syllables are pronouced flatly, as in Assamese the flavour of the language is lost. Any way, it is a bold experiment on the part of the author of *Vighneśajanmodaya.*

## MANUSCRIPT MATERIALS & ACKNOWLEDGMENTS

The manuscripts of the first two plays were collected by the Kāmrūp Sanskrit Sanjīvanī Sabhā and I am indebted to Pandit Manoranjan Sastri, the Secretary of the said Sabha, for allowing me to utilise and publish them.

1. *Vighneśajanmodaya*, No. 118 in the collection of the Kamrup Sanjivani Sabha contain 43 folios of sachi bark. The manuscript is not free from orthographical and their mistakes. A few lines in the last folio have been effaced. The manuscript was collected by the Late Pandit Pratapchandra Goswami of Nalbari.

2. Written in old Assamese script on sachi bark the manuscript of *Kāmakumāraharaṇa* contains 87 folios. It has been numbered 163 in the catalogue of the Kamrup Sanskrit Sanjīvanī Sabhā, Nalbari. Though written in a clear legible hand, it is not altogether free from errors.

3. The third manuscript, viz., *Śaṅkhacūḍa-vadha* was collected and is being preserved in the library of the Department of Historical and Antiquarian studies, Gauhati. I am grateful to Dr. S. K. Bhuyan, M.A., B.L., PH.D., D.LITT., the then Honorary Director (1956), for kindly permitting me to utilise and publish the manuscript. This manuscript, No. 62 in the catalogue contains thirtysix folios of sachi bark. It is written in old Assamese scripts and at places have become worn out. The work was composed in śaka year 1724. It was copied in the Bengali year 1275 by one Jiveswar Goswami.

In correcting and preparing these plays for the press I have received considerable help from Pandit Manoranjan Sastri, Principal, Nalbari Sanskrit College, Prof. Rajanikanta Dev Sarma, M.A., Head of the Department of Sanskrit, Cotton College, and Sri Biswanarayan Sastri, Secretary, Publication Board, Assam.

I am grateful to Asam Sāhitya Sabhā for sponsoring the scheme of this publication. Lastly I must thank Shri Jatindranath Goswami, ex-General Secretary and Dr. Maheswar Neog, the present General Secretary of the Sabhā, who made the necessary arrangements for the publication of this volume.

As the printing had to be done at Calcutta and some difficulties in the matter of proof correction were experienced, mistakes could not be avoided in spite of the best efforts. Sympathetic readers, I hope, would kindly excuse.

SATYENDRANATH SARMA

# कामकुमारहरणम्

## प्रथमोऽङ्कः

ब्रह्मेशानपुरःसराः सुरवरा यस्याङ्घ्रियुग्माश्रया विश्वोत्पत्तिविनाशनाविक-
ममीस्वच्छन्दमातन्वते ।
यत्पादाम्बुरुहोद्भवासुरसरिस्त्रैलोक्यमुत्पूयते तस्मैश्रीपुरुषोत्तमाय
परमानन्दाय तुभ्यं नमः ॥१॥

अपि च ।

नत्वा यत्पादपद्मं पतिमतिवलिनं यादवेन्द्रप्रसूतिं लेभे बाणासुरस्य
त्रिभुवनजयिनोनन्दिनी सानिरुद्धम् ।
नाम्नोषा यौवनस्था रतिरसमसकृद्भावयन्तीस्मरार्त्ता तौ नित्यौ
देवदेव्यौ सुरमुनिसहितौ पार्वतीशौ नमामि ॥२॥

नान्द्यन्ते सूत्रधार :—अलमतिविस्तरेण । प्रथमतोहरिध्वनिमुच्चारयन् तमेव शिरसा प्रणम्य नेपथ्याभिमुखं अवलोक्य समासदं प्रत्याह ।

श्रीस्वर्गदेवशिवसिंहनरेन्द्रपत्नीविष्पष्टनिर्म्मलयशः प्रमथेश्वरीष्टम् ।
यत्नात् कुमारहरणं मकरध्वजस्य निर्म्मीति नाटकमिदं कविचन्द्रविप्रः ॥३॥

यत :—शृणुताहो सामाजिकजनाः । अविरतसुरवृन्दवन्दितहरगौरीचरणारविन्दमकरन्दपानोन्मत्तमधुकरेण, कुन्देन्दुधवलकीर्त्तिराजिविराजितदिग्दिगन्तरेण, दोर्द्दण्डार्पितकोदण्डदण्डितदुर्व्वारवैरिवीरनिवहेन, चमत्कारकरप्रभाप्राग्भारभास्वरविविधविद्याविद्योतितविग्रहेण, चातुर्य्यशासिताशेषलोकलावण्यलीलाकलितकलेवरसुरसुन्दरीविराजमानवृहद्राजपदप्रख्यातप्रथितगुणग्रामरामाभिरामश्रीप्रमथेश्वरीमहादेवीदयितेन श्रीस्वर्गदेवशिवसिंहमहीमहेन्द्रेण कामकुमारहरणंनामनाटकं नाटयितुं आदिष्टोऽस्मि । अतः इदानीं कृतकृत्येन मया तदेवानुष्ठेयम् ।

तच्छ्रुत्वा मार्द्दङ्गिको वदति ।

माहङ्गिक :—अये सूत्रधार किमत्र विधेयम् ?

( तच्छ्रुत्वा सूत्रधारः सक्रोधः वदति । )

सूत्रधार :—आः अरे माहङ्गिकाधम, मलिनचक्षुषा किं नपश्यसि ? राजाधिराजः श्रीशिवसिंह महिपालः श्रीप्रमथेश्वरीमहादेव्यासह समागत्य नाटयितुमना रङ्गशालामुख-मवलोक्य सिंहासनारूढः स्थितवान्। तदिदानीं च पश्य पश्य।

कथा :—तमवलोक्य मृदङ्गं वादयित्वा परिभ्रम्य हरिध्वनिम्विधाय प्रणम्य तिष्ठति माहङ्गिके सूत्रधारोः वदति।

सूत्रधार :—शृण्वन्तु भो सामाजिकाः, एकदा श्रीवाणनरेन्द्रः नद्यास्तीरे देव्या सह क्रीडितुमनाः स्वगणैः परिवृतः श्रीरुद्र आगमिष्यतीतिविज्ञाय तत्रविचित्ररङ्गस्थलीं निर्माप्य सहदारापत्यसोदरामात्यपरिवारः ऊपाञ्च अग्रतः कृत्वा दण्डच्छत्रचामरपताकादि विविधमंगलसम्भारैः नृत्तगीतपुरःसरं तत्र प्रविवेश। एवं परमरमणीयनदीतीरे रङ्गशालायां प्रविश्य तत्रैकदेशे वाणोराजा सपरिवारः उपविश्य तस्थौ। तद् दृश्यतां श्रूयतां भण्यतां जयहरगौरी।

## ( गीतम् )

राग—पाहाडोया गान्धार।

ताल—रपकजौति।

बाणनृप इतवानतिधीरम्।
विविधकुसुमचिततरुगणसमीहितराजिततटिनीतीरम् ॥४॥
काञ्चनकलितव्यजनललितसितचामरचलितसमीरम्।
पवनविकम्पिततरुकुसुमाञ्चितधूलिसुगन्धितनीरम् ॥५॥
छत्रकचामरदण्डमनोहरचीररथध्वजशाली।
भुवनभयङ्करविपुलकलेवरशीर्षमुकुटमणिमाली ॥६॥
करिकरशोभनदशशतभुजकनकाङ्गदकङ्कणधारी।
सकलसुरासुरसमरनिपुणवरवीरत्रिभुवनचारी ॥७॥
उपगतवाञ्छितसकलकलाञ्चितप्रमथेश्वरीनरदेवम्।
सुखयतु सततं द्विजवरवितसं गीतमुमापदसेवम् ॥८॥

सूतधार :—अथ क्रीडास्थानवर्णनम।

## ( गीतम् )

पज्झटिका ।

श्रीहरगौरीक्रीडास्थानम् ।
पश्य सभासदकेलिनिदानम् ॥१०॥
तत्प्राणराजितगंगातीरम् ।
मन्दसुशीतलमलयसमीरम् ॥११॥
कमलकुमुदरससुरभितनीरम् ।
मधुकरकूजितकुञ्जकुटीरम् ॥१२॥
ऋतुचयसम्भवकुसुमविकासम् ।
गन्धर्वीगतविहितविलासम् ॥१३॥
विबुधतरुणजनबहुपरिहासम् ।
सकलसुरासुरविरचितवासम् ॥१४॥
कोकिलकलरवमोहितचित्तम् ।
तरुणीयुवजनवाञ्छितवित्तम् ॥१५॥
भ्रवणविलोकनलम्भितलोभम् ।
कलितलतातरुविकर्षितशोभम् ॥१६॥
सन्तानागुरुमन्दाराद्यम् ।
सतत-मधुररवमन्द्रकवाद्यम् ॥१७॥
स्थलकुसुमाकर-गन्धितगगनम् ।
जलजकुसुमचयलाञ्छितपवनम् ॥१८॥
अविरतघनचयकृतमृदुनदनम् ।
मनसि मुनेरपि वर्द्धितमदनम् ॥१९॥
पातु शिवाशिवसहनरेशम् ।
तरलित प्रमथेश्वरीवरवेशम् ॥२०॥

सूत्रधार :—एवं विचित्रोद्यानादिमनोज्ञनदीतीरे रङ्गशालैकदेशे सावधानं तिष्ठति बाणनरेन्द्रः । तदानीं परमकारुणिको भक्तवत्सलः श्रीरुद्रः पार्वत्यासह वृषभमारुह्य स्वगणैः परिवृतो बाणासुरसुतायाः ऊषायाः मनोरथं पूरयितुमनाः क्रीडाच्छलेन रङ्गशालां प्रविशति स्म । एवं प्रविश्य श्रीरुद्र एकदेशे स्थितवान् ।

## ( गीतम् )

राग—मल्लार ।

ताल—दशवाडी ।

सुरसहितो हर आपगातीरम् ।
मलयपवनगतिलम्भितनीरम् ॥ ध्रुं
कुसुमसुरभिरसलोभितभृङ्गम् ।
मधुरमधुररवकोकिलसङ्गम् ॥२१॥
हिमगिरिजाबहुविहितविलासम् ।
वृषवरवाहन सुललितहासम् ॥२२॥
सुरतविलासविनोदितमदनम् ।
सुविकृतगौरीसरसिजवदनम् ॥२३॥
श्रीशिवसिंहमवतु नरदेवम् ।
सप्रमथेश्वरीमयमजसेवम् ॥२४॥

सूत्रधार :—एवं नानागीतवाद्यविनोदैः स्वगणैः परिवृतं श्रीरुद्रं देव्यासह रङ्गशालां प्रविष्टं विलोक्य श्रीवाणनरेन्द्रः ससम्भ्रमं तत्समीपं गत्वा कृतजानुपातः प्रणामं कृतवान् ।

अर्द्धेन्दुमण्डितजटापटलप्रभाय, विश्वेश्वराय प्रणतार्त्तिविनाशनाय ।
विज्ञानदाय करुणामयसागराय गौरीप्रियाय शरण्याय नमः शिवाय ॥२५॥

सूत्रधार :—एवं प्रणम्य पाद्यादिभिः पूजयित्वा सपरिवारो-नृपतिः शिवशिरसि दुर्वाक्षत-पुष्पाणि सिञ्चन् उलुलुध्वन्यादि विविधमङ्गलपुरःसरं शुक्लचामरैः सम्वीज्य शिवं नत्वा नदीतीरे उद्यानमध्ये उपवेशयामास ।

अत्रान्तरे मागधसुतवन्दिनो वैरागिणो वेशधराः तरस्विनः ।
समाविशंश्चन्दनचर्चिताङ्गा रङ्गस्थलीं मूर्द्धमयूरपिच्छाः ॥२६॥

एवं प्रविश्य ते सर्वे शिवसमीपं गत्वा कृतजानुपातास्तं प्रणम्य स्तुतिं कर्त्तुं आरेभिरे ।

## ( भटिमा )

जय जय शङ्कर भक्तदयाकर सततप्रमथगणचारी ।
रिपुकुलनाशक भुवनविकाशक विषमगरलगलधारी ॥२७॥
भुजकृतसंगम विपुलभुजंगममण्डलमण्डनकारी ।
सकलसुरासुरसेवितसुरवर हिमगिरिविपिनविहारी ॥२८॥

परमकृपानिधि विहितसुरतविधि सुन्दरनटवरवेश ।
निजपदसेवक देवकपालक जटिलसुपिङ्गलकेश ॥२९॥
मारितसम्वरवैरिदिगम्वरदेवनिखिलखलकाल ।
सह परिवारक नृपशिवसिंहक शङ्कर कर प्रतिपाल ॥३०॥

सूत्रधार :—इत्येवं सदाशिवं स्तुत्वा सूतमागधवन्दिनः प्रस्तावसदृशं वाक्यं वक्तुं प्रस्तावं लक्षीकृत्य शिवस्य एकपार्श्वे स्थिताः। अतःपरं गन्धर्वकिन्नरचारणाः देवकन्या अप्सरसश्च स्व स्व वाहनमारुह्य रङ्गस्थालीं प्रविशन्ति स्म। एवं प्रविश्य ते सर्वे पुष्पलाजाक्षत-क्षेपादिना बहुविहारं कृतवन्तः। तद् दृश्यतां श्रूयतां मण्यतां जयहरगौरी ॥

## ( गीतम् )

राग—वेलावली ।

ताल—जौति ( यति )

विहरति सुरकुलमुज्ज्वलमप्रतुलवेशवलिततनुजालम् ।
सुरतपरायणरसिकयुवतिजननर्त्तनकृतकरतालम् ॥३१॥
अपर वधूगणहसितनिरीक्षणसेचितसकुसुमलाजम् ।
भुवनमनोहरकण्ठकलस्वरमोहितसकलसमाजम ॥३२॥
उत्तमगायन मूरजमृदुस्वनभावितभुवनक्षोभम् ।
निजवरवाहनमृगमदचन्दनवसनविभूषणशोभम् ॥३३॥
सप्रमथेश्वरी·········नृपशिवसिंहमुदारम् ।
द्विजकविचन्द्रे भणति वितन्द्रे शम्भूरवतु कृतसारम् ॥३४॥

सूत्रधार :—इत्येवं ते सर्वे नृत्यगीतवाद्यैः परस्परं कुसुमानि सिञ्चन्तः क्रीडिताः शिवसमीपं गत्वा प्रणमन्ति स्म। गन्धर्वकिन्नरचारणा ऊचुः।

नमस्ते पार्वतीकान्त शान्तमूर्त्ते जगत्पते ।
सुरासुरशिरोरत्न प्रत्नपुरुष सम्मते ॥३४॥

ततश्च अप्सरसः शिवशिरसि दुर्व्वाक्षतानि सिञ्चन्त्यो नृत्यगीतैः संस्तुवन्ति स्म। अप्सरस ऊचुः।

अप्सरसः— जयति शङ्कर हे शिव शिव महादेव। घोषा।
पतितपावन प्रणततततारण, सुरासुरकृतसेव ॥३६॥
द्वीपिचर्म्मासन वृषभवाहन-खट्वाङ्गत्रिशूलधारी ॥
मदनदहन त्रिपुरमथन भक्तजनभयहारी ॥३७॥
आजिनवसन भस्मविभूषण सकलमङ्गलकारी।
परशुमृगवरं-सुशोभितकर श्मशानवनविहारी ॥३७॥

( २ )

ए जय जटाधर जय गदाधर, जय शशधरधर। घोषा ॥
जय सुरवर जय दिगम्बर जय भयहर हर ॥३८॥
पञ्चवदन देव त्रिनयन नरमुण्डचयमाली।
प्रमथनायक विभूतिदायक सर्पविभूषणशाली ॥४०॥
स्फटिकसंकाश शरीरप्रकाश कामिनीमोहनहासी।
सिद्धमुनिगणपूजितचरण दक्षयज्ञविनाशी ॥४१॥

( ३ )

ए भव हे शिव हे जयगौरीनाथ हे। घोषा ॥
मामनुकम्पय दीनदयामय भवतापमथिनाश हे ॥४२॥
त्रैलोक्यभावक वैरिविदारक दिगम्बरजटाधारी।
सदाज्ञानपर मुनिनिरन्तर हृदयकमलचारी ॥४३॥
जयति सुन्दरी प्रमथईश्वरी शिवसिंहनृपजाया।
सर्व्व सभासद हर हर वद दूरे विरमतु माया ॥४४॥

सूत्रधार :—इत्येवं कोकिलकण्ठीनां देवनर्त्तकीनां सुललितगीतध्वनिं निशम्य श्रीमहेश्वरो मदनाकुलितकलेवरः सन् कामिनीमोहनवेशं दधार।

अप्सराजनमनोहरं हरो दिव्यरूपमरुणाम्बरोज्ज्वलं।
रक्तमाल्यरुचिराननं शुभं कुण्डलादिभिरधारयत्तदा ॥२३॥

तदानीं चित्रलेखा नाम अप्सरोमुख्या देव्या इच्छया देवीरूपं धृतवती शिवं प्रसादयितुमनाः प्रार्थयते।

चित्रलेखा—हे हे त्रैलोक्यमोहन प्रभो सदाशिव, तव चरणकिंकरी अहं प्रार्थयामि। प्रसीद प्रसीद, ममाभीष्टं पूरय।

महेश्वर :—हन्त अये अपूर्व्वसुन्दरि जगन्मोहनि, त्वं कस्मादुपगतासि ? अहो भद्रं भद्रम्। तव रूपलावण्यमधुरवाक्यैः परम सन्तुष्टोऽस्मि। अवश्यं ते मनोऽभीष्ट-

सिद्धिभवतु। नचात्र संशयोऽस्ति। इदानीं क्षणमत्रस्थीयताम्। तवरूपलावण्यं-विलोक्य चित्तं सन्तोषयामि।

सूत्रधार :—तत् श्रुत्वा चित्रलेखा वस्त्रेण मुखमाच्छाद्य तं नमस्कृत्य अन्तरिता बभूव। तद्दृष्टा देवी विहस्य अहो अद्य इतोऽधिकम् आनन्दं करिष्यामीति मनसा विमृष्य ना ना विकृतरूपधारिणो हरपार्षदान् अप्सरोभिः सह क्रीडार्थमादिशति। देव्युवाच

देवी— श्रृण्वन्तु पार्षदाः सर्वे वचनम्मे भवत्प्रियम्।
अप्सरोभिः सहानन्दं विहरन्तु यथेच्छया ॥४५॥

सूत्रधार :—इत्येवं देव्यानिदेशं श्रुत्वा एकनेत्र वहुनेत्र एकपाद वहुपादादयः पार्षदा अतीव सानन्दा देवीं प्रणम्य अप्सरसां सम्मुखं गत्वा प्रशंस्य वदन्ति स्म। पार्षदा ऊचुः।

पार्षदा :—अहह, अये सर्व्वाङ्गसुन्दर्यः भवत्यः केनवा विधात्रा एवं रूपवत्यः सृष्टाः। अहो, भद्रं भद्रम् अस्माकं भाग्येनैव प्रापिता। इदानीं कामाग्नि दग्धान् अस्मान् झटिति वाक्यामृतसेचनेन सन्तर्पयत।

सूत्रधार :—तच्छ्रुत्वा अप्सरसो लज्जया वस्त्राञ्चलेन मुखमाच्छाद्य वदन्ति स्म। अप्सरस ऊचुः।

अप्सरस :—आः, अरे प्रेतास्थिधारिणो दुर्व्विनीताः पाषण्डाः, कथमेवं प्रलापं प्रलपन्ति भवन्तो मैवं मैवम्। अये देवकुमार्य्यः, पश्यत पश्यत। एते भस्मास्थिधारिणः श्मशानवासिनः प्रेताः, वयं गन्धर्व्वकन्याः। अतएव अस्माभिः सह रतये न सम्भाषितुं योग्याः। अहो किमद्भुतमुपस्थितम्। अरे अङ्गहीना अमङ्गला, यत् कृतं कृतम्। इदानीञ्च इतोदूरमपसरत, अपसरत, नोचेत् चण्डशापं दत्वा भस्मसात् करिष्यामहे।

सूत्रधार :—तत् श्रुत्वा पार्षदाः पुनरतिकारुण्यं प्रार्थयते। पार्षदा ऊचुः।

पार्षदा :—हे हे त्रैलोक्यमोहिन्यः, क्रोधं परिहाय प्रसीदत प्रसीदत। यदि अस्माकम् एवं अमंगलरूपं विलोक्य लज्जां कुरुत तर्हि दिव्यरूपं धारयामः। पश्यत पश्यत।

सूत्रधार :—एवमुक्ता पार्षदाः अस्थिमालादिकं भूमौ निक्षिप्य वस्त्रेण सर्वशरीरं मार्जयित्वा दिव्यरूपमास्थाय पुनस्तासामग्रे उपस्थिताः। अप्सरसश्च तद्विलोक्य हास्यं कृत्वा वस्त्रेण मुखमाच्छाद्य पलायनपरा देव्याः समीपे उपविश्य स्थिताः। एवं दृष्ट्वा देवी अप्सरादेवकन्याभिः सह करतालिकां विहाय अतीव हास्यं कृतवती। अथ तदानीं ऊषाकुमारी एवं रतिविनोदं विलोक्य मनसि कामशरजर्जरिता भवानी-समीपं गच्छति। तद् दृश्यतां श्रूयतां भण्यतां जयहरगौरी।

( गीतम् )

राग—सिन्धुरा ।

ताल—चुटा ।

विचलति गौरी निकटे धीरा ।
बाणसुतोषा ललितशरीरा ॥४६॥
योजितसदृशयुवतिगणसङ्गा ।
रतिरसभावनशिथिलितरङ्गा ॥४७॥
अभिनवयौवनललितमनोज्ञा ।
स्मित-विकशितवरवदनसरोजा ॥४८॥
कनकविभूषणविरचितवेशा ।
विकचकुसुमचयविरचितकेशा ॥४९॥
वल्लभप्रमथेश्वरोमगदुहिता ।
नरपतिमवतु सुरासुरसहिता ॥५०॥

एवं कामशरे विकलशरीरिणी श्वसन्ती ऊषाकुमारी भवानीसमीपं मन्दं मन्दं गत्वा प्रणिपत्य मनसा अनुतापं करोति। ऊषोवाच—

ऊषा— अहो दुरन्तं दुरितं कृतंमया भवोभवानी च पुराणपूजितौ ।
तपश्च नैवाचरितं द्विजातये धनं न दत्तं न हुतश्च वह्निः ॥५१॥
किमर्थमिह जीवामि वयोयाति निरर्थकम् ।
रूपञ्च यौवनं व्यर्थं व्यर्थमाभरणादिकम् ॥५२॥
धन्याः सभर्तृकानार्यो रमन्ते स्वेच्छया मुदा ।
अलब्धभर्तृकाः पापा वृथा जीवन्ति मद्विधाः[१] ॥५३॥

सूत्रधार :—इत्येवं मनसा जपन्त्या ऊषाया मनोगतं सर्व्वान्तर्यामिनी भवानी विज्ञाय करमार्ज्जनादिना आश्वास्य स्वासने उपवेश्य प्रबोधयति। देव्युवाच—

देवी— अये दैत्येन्द्रनन्दिनि अचिरादेव त्वं भर्त्रा सह रंस्यसे ।

सूत्रधार :—इत्युक्तवत्यां भगवत्यां पुनरूषा मनसा चिन्तयति स्म। ऊषोवाच ।

ऊषा— हरि हरि विधातः, कदा वा भर्त्रा सह रंस्ये तन्नजानेऽहं ।

सूत्रधार :—तद्विज्ञाय भवानी पुनराह। भवान्युवाच ।

---

१। धन्याहि भर्त्तुसहिता रमत्येवं समागता ।
मनसात्वथ संकल्पमूषया भाषितं तथा ॥ ( हरिवंश ११७-१४ )

ऊषे शृणुष्व मद्वाक्यं मुग्धे कनकछप्रभे ।
रूपयौवनसम्पन्नं यदाविन्दसि सत्पतिम् ॥५४॥
वैशाखे मासि शुक्लायां द्वादश्यां तु दिनक्षये ।
रमिष्यति च यस्त्वां वै स ते भर्त्ता भविष्यति[२] ॥५५॥

सूत्रधार :—देव्या एवमुक्ता सा ऊषा हर्षेणोत्फुल्ललोचना हसन्ती कन्यागणसमावृता स्वालय गन्तुमुद्यता । तदा सर्वाः सख्यः सहर्षेण परस्परं चपेटप्रहारादिना हास्यं कृतवत्यः । तदैव देवदानवयक्षगन्धर्व्वोरगकन्या ऊषया सह सटव्यं विधाय तामाहुः । देवकन्या ऊचुः ।

देवकन्या :—हन्ताहो दैत्येन्द्रपुत्रि सखि, तवानुरूपः पतिः अचिरादेव लभ्योभविष्यति, नचात्र शंसयः कर्त्तव्यः पश्य ।

यदि दैववशाद्वह्निर्दाहकत्वं विमुञ्चति ।
तथापि देव्या बचनं न मृषा स्यात् कदाचन ॥५६॥

अतः इदानीं संशयं परिहाय सुखं गृहे स्थीयताम् ।

सूत्रधार :—एवं तासां सखीनां तद्वचनं मनोगतं मत्वा प्रतिपूज्य देव्यावचनं स्मरन्ती कन्यागण-समेता स्वालयं गत्वा तस्थौ । ततश्च देवनार्यो हरगौर्योरभिलषितं विहारं समाप्य गजाश्वरथयानारूढाः स्वान् स्वान् आलयान् ययुः । श्रीरुद्रोऽपि देव्या सह अदृश्यो बभूव । तद्दृश्यतां श्रूयतां भण्यतां जय हरगौरी ।

जातः शक्रकुले नरेन्द्रतिलकः श्रीरुद्रसिंहो नृपो ।
विख्यातोऽति वितन्यमानविलसत् कीर्त्तन्यकीर्त्तिर्म्महान् ॥
तत्पुत्रोऽयमरिन्दमः पृथुयशा विप्रप्रियोधार्म्मिकः ।
देवोऽयंशिवसिंहो भूपतिवरो नित्योत्सवैर्म्मोदताम् ॥५७॥
पत्नीतस्य मनोरमातिपरमा सिमन्तिनीषूत्तमा ।
दीनानाथदयाविचारचतुरा नानागुणैरन्विता ॥
इन्द्राणीवविलासिनीभगवतीपादारविन्दान्विता ।
सेयं श्रीप्रमथेश्वरी नृपतिना पत्या समं मोदताम् ॥५८॥

इति श्रीप्रमथेश्वरीप्रियतमश्रीश्रीशिवसिंहमहीमहेन्द्रशासितद्विजकविचन्द्रकृतौ श्रीभागवत-हरिवंशसमुद्धृतकामकुमारहरणनाटके प्रथमोऽङ्क ॥

---

२ । तदा हैमवती वाक्यं सम्प्रहस्येदमब्रवीत् । ऊषे शृणुस्व वाक्यं मे यदा संयोगमेष्यसि । वैशाखे मासि हम्यस्थां द्वादश्यां त्वां दिनक्षये । रमिष्यति यः स्वप्ने सते भर्त्ता भविष्यति ॥
( हरिवंशम्, ११७-१८-१९ )

## द्वितीयोऽङ्कः

अथोपायाः प्राप्तवरं भावयन्त्या अहर्निशम् ।
वैशाखद्वादशीशुक्लासन्नाता तत्प्रियप्रदा ॥१॥

सूत्रधार :—एवं देव्याः प्राप्तवरं भावयन्त्या ऊषाया वैशाखशुक्लाद्वादशी मीलिता तस्यां निशि, सखीभिर्निश्चेष्टं शयाना गृहान्तरे आस्ते। तत्र श्यामवर्णदिव्यपुरुषेणालिङ्गिता। ततो रजोयुक्ताच सती कुमारी ससम्भ्रमुथ्थाय तत् पुरुषं न पश्यन्ती, शोणितलिप्त-कटिमेखलाश्च निरीक्ष्य लज्जामयन्याकुला विललाप। ऊषोवाच—

ऊषा— हा हा विधातः, अद्य किं करोमि, क गच्छामि ? येनममेयं अवस्था कृता सतु वा प्राणेशःक्व गतः ? हरि हरि सखीभिर्यदैव दृश्ये तदैवाहं मृतास्मि।

सूत्रधार :—एवं विलपन्तीं वेपमानां पाणिना कपोले ताडयन्तीं भूमौ पुनः पुनर्लुठन्तीं सखीं विलोक्य कुम्माण्डतनया हस्ताभ्यामुत्तोल्य अलिङ्ग्य प्रबोधयति। कुम्माण्डतनया उवाच।

चित्रलेखा—अये दैत्येन्द्रनन्दिनि सखि, कथं व्याकुलासि ? तव पिता अयं बाणनरेन्द्रः त्रैलोक्याधिपतिः, जन्मकर्म्मभिश्च प्रख्यातः, यद्भयादिन्द्रादयोऽपि लोकपालाः दिग्दिगन्तरं पलायन्ते। तस्मात्कुतस्तवेदं भयम् उत्पद्यते ? मा भेतव्यं, मा भेतव्यम्। एवं श्रुत्वा अन्ये हास्यं करिष्यन्ति। अतः इदानीं धैर्यं अनुसर, शोकं परिहर।

सूत्रधार :—तच्छ्रुत्वा ऊषाकुमारी रुदती सख्यग्रे स्वप्नवृत्तान्तं कथयन्ती आत्मानं निन्दति स्म। ऊषोवाच—

ऊषा— हे हे प्राणसखि तवाग्रे स्वरूपंकथयामि। अद्य रात्रौ स्वप्ने केनापि दिव्यपुरुषेण अहमालिङ्गिता। अहह, एवं परपुरुषदुष्टा कुलक्षणा कुलाङ्गारी आसां साध्वीनां सखीनां सङ्गे कथं विहरिष्यामि ? हरि हरि, पितुरग्रेवा किन्तु वक्ष्यामि, तन्नजाने। अतो मरणमेव श्रेयो निश्चितं, जीवितं न रक्षामि।

सूत्रधार :—इत्येवं विलपन्तीं भूमौ पतिताम् ऊषां विलोक्य सर्व्वाः सख्य सत्तरं परिवृत्य अश्रुपूर्णाक्ष्यः प्रबोधयन्ति स्म। प्रथमं एका मुख्या सखी करे धृत्वा आह।

सखी— हे हे सर्वाङ्गसुन्दरि, प्रियसखि उत्तिष्ठ, धर्म्मशास्त्रवचनं श्रुत्वा चित्तं सन्तोषय। पश्य

दैवेन स्वप्नभावस्था यदि भुक्तासि केनचित्।
न तत्र व्रतभङ्गः स्यात् सत्यं सत्यं वदाम्यहम् ॥२॥

सूत्रधार :—तत् श्रुत्वापि रुदतीं अन्यासखी आह—

सखी— अये मदनविह्वले सखि, यदि तस्या वचनं साधु न मन्यसे तर्हि मयोच्यते। व्यासवशिष्ठादिवचनं श्रूयताम्।

स्वप्नाचरित दोषो हि मर्त्त्यलोके न विद्यते।
एवं महर्षयः सर्वे प्रवदन्ति वरानने[३] ॥३॥

सूत्रधार :—तथापि उच्चैरुदतीं चत्त्वरे बहूवारं लुठन्तीं धूलिधूसरिताम् ऊषाम् आश्वास्य पुनरेका सखी रुदती कृताञ्जलिराह।

सखी— हाह्य कनकपुत्तलिके प्राणसखि, केन विधात्रा तवेयमवस्था कृता ? अहो, किमयं कालो बलीयान् श्रयतां श्रयताम्।

शुद्धस्वभावा साध्वी त्वं सततं ब्रह्मचारिणी।
इमामवस्थां प्राप्तासि कालोऽहि बलवत्तरः ॥४॥

आस्तां यत्कृतं कृतम् तथापि शास्त्रीयवचनान्तरं श्रुत्वा मनः स्थिरीक्रियताम्।

कर्म्मणा मनसा वाचा दुष्टा या हि यशस्विनी।
सा पापिष्ठा नचान्यथैव कथयन्ति मनीषिणः ॥५॥

सूत्रधार :—एवं सखीभिः प्रबोधितापि कुमारी शान्तिमप्राप्य सत्वरमुथ्थाय, हा हा प्राणेश क्वगतोऽसीति उच्चैरुदती शिरसि मुष्टियुगलं ताडयन्ती सखीभिः प्रबोध्यमानापि शीघ्रगत्या परिसरस्थलीं परिक्रम्य पुनस्तत्रैव निपत्य करचरणौ प्रसाय मृतकल्पा सती तस्थौ। ततश्च कतिचित् सख्यः हा हा सखी मृतेत्युक्त्वा आलिङ्ग्य धारयन्ति। कतिचित् शिरसि तैलजलानि सिञ्चन्ति, तदैव कुम्भाण्डसुता सक्रोधमागत्य वदति स्म। कुम्भाण्डसुता उवाच—

चित्रलेखा—आः अरे मुग्धमतयः कन्यका' यूयं अतीवचपलाः। कथमेनां वातुलां प्रार्थयन्ते अलमतिचाटुविस्तरेण। म्रियतां म्रियतां कालोहानि स्यात्, इतोदूरमपसरत।

सूत्रधार :—तत् श्रुत्वा कियद्दूरे स्थितासु कन्यासु भूमौ निपत्य विलापं करोति। तद्दृश्यतां श्रयतां भण्यतां जयहरगौरी।

---

३। प्रसभं दैवसंयोगाद् यदि भुक्तासि भामिनि।
स्वप्नयोगेन कल्याणि व्रतलोपो न विद्यते ॥
व्यभिचारेण ते देवि नास्ति कश्चिद्व्रतिक्रमः।
न च स्वप्नकृतोदोषो मर्त्त्यलोकेऽस्ति सुन्दरि ॥ (हृ. वं ११८।१६।२०)

## ( गीतम् )

राग—मालसी ।

ताल—जौति ( यति ) ।

अनुपति विलपति वलितहततनया ।
सकलसुरासुरतरलितहृदया ॥६॥
तिष्ठति धावति लुण्ठति रामा ।
ध्यायति दयितं रतिरसकामा ॥७॥
धूलिधूसरतनुराकुलकेशा ।
विकृतवसनविरहिततनुवेशा ॥८॥
हरिणीलोचनसचकितनयना ।
मुहुरनुपश्यति भुवि कृतशयना ॥९॥
विचलति कथमपि कथमनुवारं ।
परिरभतेऽनुचरी सविकारम् ॥१०॥
श्रीशिवसिंहमुमापरवेशम् ।
सप्रमयेस्वरीमवतुनरेशम् ॥११॥

सुत्रधार :—इत्येवं विलपन्तीम् ऊषां विलोक्य चित्रलेखा विहस्य पुनः प्रबोधयति।

चित्रलेखा उवाच—

चित्रलेखा—हन्त, भो मदनतरङ्गिणि सखि, कथं वातुलासि? देवानामपि दुर्लभं भवान्या वरं प्राप्तासि। वैशाखद्वादश्यां स्वप्ने यस्त्वां रमयिष्यति स ते भर्त्ता भविष्यतीति। देव्या अमोघवचनं विस्मृत्य कथम्वा लोकहास्यास्पदं विलापं कृत्वा म्रियसे, तन्न जानेहं अस्तु तावत्। यन् कृतं कृतम्, इदानीञ्च तस्य पुरुषस्य प्राप्तेरुपायः चिन्त्यताम्।

सूत्रधार :—तत् श्रुत्वा ऊषा शोकं परिहृत्य सानन्दं ब्रूते स्म। ऊषोवाच—

ऊषा— भो भो प्रियसखि, त्वाम्विना मत्प्राणप्रिया कापि न विद्यते। अतो दन्ते तृणं विधाय त्वयि शरणं गतास्मि। यथातथा उपायेन मम स्वप्नलब्धं प्राणधनं आनाय्य दीयताम्।

सूत्रधार :—तच्छ्रुत्वा चित्रलेखा मनसा विमृष्य ब्रूते स्म। चित्रलेखोवाच।

चित्रलेखा—अहो किमयं प्रमादोमिलितः! अये प्रियविनोदिनि सखि, अदृष्टं अश्रुतञ्च पुरुषं कथं आनेष्यामि? तथापि एक उपायः कथ्यते, श्रूयतां श्रूयताम्। श्रीरुद्रस्य

भगवतः प्रसादात् मम चतुर्द्दशभुवने किञ्चिदपि अविदितं नास्ति, सर्व्व करतलायते। अतः तत्रस्था ये देवगन्धर्व्वादयोमुख्याः तेषु तेषु ये प्रधानापुरुषास्तान् सर्व्वान् पट्टे लिखित्वा दर्शयिष्यामि। तेषु विचार्य स्वप्न-लब्धं पुरुषं निश्चित्य यदि दर्शयिष्यसि तर्हि अवश्यं आनीय दास्यामि।

सूत्रधार :—तच्छ्रुत्वा ऊषां सहर्षं ब्रूते स्म। ऊषोवाच—

ऊषा— हन्त हे हे प्रियसखि शीघ्रं तथैव क्रियताम्। अलमत्रविलम्बं विस्तरेण।

सूत्रधार :—तत् श्रुत्वा चित्रलेखा सहर्षं अङ्ग भङ्ग्या सगर्व्वं मनसा इतस्ततश्चलन्तीं तत्क्षणं पट्टकुटीं निर्म्माय तन्मध्ये प्रविश्य देवगन्धर्वादीनां यथाभूषणवाहनं तत्तत् स्वरूपमूर्त्तीः पटे विलिख्य ततो निर्गत्य एकं चित्रपटं विस्तार्य ऊषायै दर्शयामास। ततः चित्रलेखोवाच—

चित्रलेखा—हन्त भो भो कुरङ्गनयने बाणनरेन्द्रनन्दिनि सखि, सावधानया भवत्या दृश्यतां दृश्यताम्। अयन्तावत् गौरवर्णः राजहंसवाहनः चतुराननो दण्डकमण्डलुहस्तोऽष्टबाहुः श्रीमान् ब्रह्मदेवः। अयमेव निर्मलकलेवरो गरुडवाहनः शङ्खचक्रगदापद्मधारी कौस्तुभवनमालापीतवस्त्रपरिधानो जगद्गुरु श्रीवासुदेवः। अयं तु शुक्लकलेवरो वृषभवाहनः त्रिशूलखट्टाङ्गडम्बरुव्याघ्रचर्म्मधारीपञ्चवक्त्रस्त्रिनयनः श्रीसदाशिवः। असौ श्रीदेवराज ऐरावतारूढः सहस्राक्षः। तत्पुत्रोऽयं जयन्तकुमारो दिव्यघोटकारूढः। मूषकवाहनोऽयं गणपतिः। मयूरवाहनोऽयं कार्त्तिकेयः। अतीव दीप्तोऽयं मेषवाहनः अग्निः। अपरेचैते सर्व्वदेवगाः निरीक्ष्यन्ताम्। तत्रतेषां मध्ये यदि ते पतिरस्ति तर्हि शीघ्रं निरीक्ष्य कथ्यताम्।

सूत्रधार :—तच्छ्रुत्वा क्रमेण वीक्षमाना ऊषा वदति। ऊषोवाच—

ऊषा— अये प्राणसखि एषांमध्ये मत्पतिर्न विद्यते।

सूत्रधार :—तत् श्रुत्वा चित्रलेखा तं पटं दूरीकृत्य पटान्तरमानीय दर्शयति। चित्रलेखोवाच—

चित्रलेखा—हे हे नरेन्द्रनन्दिनि सखि, साधवानं निरीक्ष्यतां निरीक्ष्यताम्। एते गन्धर्व-विद्याधरचारणाः। एते च देवर्षिकिन्नरमनुष्याः। अपरे फणामणिभिः विराजमाना-भयङ्कर लेलिहाना अनन्तवासुकिपुण्डरीककर्क्कोटकादयः सर्पगणाः। एषांत्मध्ये त्वत्पतिरस्तिचेत् तर्हि शीघ्रं कथ्यतां कथ्यताम्।

ऊषा— अये सखि, अत्रापि नास्ति मे पतिः।

चित्रलेखा—हन्ताहो सखि, इदानीं सावधानं वीक्ष्यताम्। असौ सुदीप्तकलेवरो वसुदेवः, अयन्तु गौरकलेवरो लाङ्गलमुषलधारी बलदेवः। एष श्यामवर्णः पीतवस्त्रो वनमाली श्रीकृष्णः। तदात्मज्योयं कामदेवः तस्यापि पुत्रोऽसौ श्यामवर्णकलेवरः कामिनीमोहनवेशधारी अनिरुद्धकुमारः।

सूत्रधार :– एवं सखीवचनेन क्रमेण वीक्ष्यमाणा ऊषा कामदेवं वीक्ष्य लज्जया वस्त्राञ्चलेन शिरआच्छादयन्ती पश्चादनिरुद्धकुमारं विलोक्य कामव्याकुला सती सोत्कण्ठं ब्रूते। ऊषोवाच—

ऊषा— हन्त अये प्रियसखि पश्य पश्य, अयमेव मदनमोहनवेशधारी मम स्वप्नचौरः प्राणपतिः त्वया प्रापितः। धन्यासि धन्यासि।

सूत्रधार :—इत्यवं उच्चैरुच्चार्य्य ससम्भ्रमं करौ प्रसार्य्य चित्रपुत्तलिकामालिङ्गितुमूषा धावति स्म। एवं वीक्ष्य सखीभिः धृत्वा आकृष्य कियद्दूरे नीत्वा उपवेश्य रक्षिता। पटश्च तस्मात् दूरीकृतः। ततश्च ऊषा तत्क्षणं खड्गमुत्तोल्य आत्मनः शिरश्छेत्तुं आरेभे। एवं विलोक्य चित्रलेखा सक्रोधं ब्रूते।

चित्रलेखा—आः अरे पाषण्डे मैवं मैवं, कथमेव आत्मघातं कुरुषे।

सूत्रधार :– इत्युक्त्वा हस्तात् खड्गमाकृष्य गृहीत्वा च मस्तकोपरि निर्मुच्य दूरे निक्षिप्य प्रबोधयति। चित्रलेखोवाच :—

चित्रलेखा – अये सखि कथं विकलासि? तव स्वामिनं अवश्यं आनेष्यामि।

सूत्रधार :—तत् श्रुत्वा ऊषा सक्रोधं ब्रूते। उषोवाच—

ऊषा— आः अरे कुम्भाण्डसुते कुट्टनि कथमेवं विकथ्थसे? यदि आनेष्यसि तर्हि श्वो दिने प्रातरेवानीय दीयतां, नोचेत् गरलं भक्षयित्वा मरिष्ये।

सूत्रधार :—तच्छ्रुत्वा चित्रलेखा ब्रूते।

चित्रलेखा : – आः अरे वातुले सखि, कथमेवं दुर्व्वचो मुखतः कृत्वा म्रियसे? श्रूयतां श्रूयताम्। षन्मासगम्यासौ द्वारकापुरी, कथं श्वो दिने आनेष्यामि पतिन्ते? अतो यथातथा उपायेन अष्टदिनान्तरे आनेष्यामि। अपेक्षतामिति प्रार्थयामि।

सूत्रधार :—तत् श्रुत्वा सानन्दमूषा ब्रूते।

ऊषा— हन्ताहो प्राणसखि तर्हि भद्रं भद्रं शीघ्रमेव इतोरथमारुह्य गम्यताम्। अलमतिविलम्बेन।

सूत्रधार :– तत् श्रुत्वा चित्रलेखा कुमारहरणाय आत्मनोवेशं रचयित्वा रथञ्च विरचयति तानि सर्वाणि दृश्यतां श्रुयतां भण्यतां जयहरगौरी।

## ( गीतम् )

राग—देशाख ।

ताल—चुटा ।

चित्रलेखा रथवरमभिरामा ।
रचयति रतिपतितनयहरणमति राजनगरगतिकामा ॥१२॥
शशधर-छन्दरतरुणमनोहरवदनस्मितवरबाला ।
पीनपयोधर-अंगमनोहर विकशितमौक्तिकमाला ॥१३॥
मृगमदचन्दनकुङ्कुमशोभननीलवसनकृतवेशा ।
कनकविभूषण लसदपघनगगण-भञ्जुलबद्ध छकेशा ॥१४॥
चित्रध्वजवरचीरलचामरकाञ्चनकिङ्किणीजालम् ।
गगनपवनरथगमनचतुरहययुतमवलम्बितमालम् ॥१५॥
श्रीशिवपदपरसिंहनरेश्वरमम्भोरुहवसतीशम् ।
गमयतु हर्षितमानसदयितप्रमथेश्वरीमवनीशम् ॥१६॥

सूत्रधार :—एवं चित्रलेखा रत्नाभरणवस्त्रादिना आत्मनोवेशं विधाय रथञ्च ध्वजपताकाश्वेत-चामरादिना रचयित्वा यात्रासमय-जिज्ञासां कृतवती। तदिदं दृश्यतां श्रूयतां भण्यतां जयहरगौरी ।

देवी श्रीप्रमथेश्वरी हितकरी गीर्वाण-गोब्राह्मणां, या निशेष गुणालयं
हृदयतो नक्तन्दिवं नोझति ।
सोऽयं श्रीशिवसिंह पार्थिववरः कारुण्यरत्नाकरः, स्वान्तन्यस्तहरः
प्रजावनपरः सार्द्धं तयावर्द्धताम् ॥

इति श्रीप्रमथेश्वरीप्रियतमश्रीश्रीशिवसिंहमहीमहेन्द्रशासित द्विजकविचन्द्रकृतौ श्रीभागवत-हरिवंशसमुद्भूतकामकुमारहरणनाटके द्वितीयोऽङ्कः ॥

# तृतीयोऽङ्कः

सूत्रधार :— अथोपायाः प्रणयिणी चित्रलेखा मनस्विणी ।
त्रिभङ्गीं प्रेषयामास गणकानयनं प्रति ॥१॥

तदनन्तरं वृद्धकिङ्करीं प्रति चिलेखोवाच

चित्रलेखा—हन्त अरे त्रिभङ्गि, शीघ्रं गच्छ । जगद्भण्डकोनाम दैवज्ञः केनापि अविज्ञातो यथा भवति तथा शीघ्रं इह आनीयताम् । त्रिभङ्गी उवाच—

त्रिभङ्गी— हे सुन्दरि चित्रलेखे, भद्रं भद्रं यामि तवाज्ञया सुगुप्तं गणकं आनेष्यामि ।

सूत्रधार :—एवमुक्ता त्रिभङ्गी अङ्गभङ्गया दैवज्ञस्य गृहं गत्वा गृहिण्यासह एकासनोपविष्टं दैवज्ञं वीक्ष्य सक्रोधं वदति । त्रिभङ्गी उवाच—

त्रिभङ्गी— अरे अरे लम्पट, स्त्रीपराधीन जगद्भण्डक, तव सर्व्वदा स्त्रीसङ्ग एव रतिः । अहो धिक् धिक् जीवनन्ते । राजद्वारे सर्व्वत्र विचार्य्य त्वं नोपलभ्यसे स्म । तत्प्रतीकारं अद्य कारयिष्यामि, शीघ्रमागच्छ आगच्छ ।

सूत्रधार :—इत्येव बहुधा रहस्येन तिरस्कृत्य वस्त्राञ्चले गृहीत्वा दैवज्ञं तत्क्षणं आनिनाय । तद् दृष्ट्वा चित्रलेखा ब्रूते ।

चित्रलेखा :—हन्त अहो जगद्भण्डक, द्वारकां प्रति गन्तुं ममयात्राक्षणो विचार्य्य शीघ्रं दीयतां शीघ्रं दीयताम् ।

सूत्रधार :—तत्श्रुत्वा जगद्भण्डकः पञ्जिकां वामहस्ते निधाय दक्षिणकरेण कठिनीं धृत्वा फलके राशिचक्रं विलिख्य चरस्थिरद्व्यात्मक इति पुनः पुनः पठित्वा कथयति । जगद्भण्डक उवाच—

जगद्भण्डकः—श्रूयतां श्रूयतां भो भो मन्त्रिसुते, सर्व्वाङ्गसुन्दरि, सर्वं भवत्याः शुभं दृश्यते । वास्तवतः पुनरत्रवकाशे यात्राविचारोऽनुचितम् । किन्तु तत्कालिक-यात्रां कथयामि । पश्य अर्कशुक्रबुधसोमशनिगुरुभूमिसुताः । अहह अपूर्व्वोऽयं गुरोर्लग्नो मिलितः ; शीघ्रं गम्यतां गम्यताम् ।

सुत्रधार :—इत्युक्त्वा उत्थाय आशंसति स्म ।

आदित्यादि ग्रहाः सर्व्वे नक्षत्राणि च वासराः ।
तिथियो राशयोयोगाः कुर्व्वन्तु कुशलन्तव ॥२॥

सूत्रधार :—इत्येवं आशंस्य गन्तुमनसे दैवज्ञाय ऊषा कुमारी दक्षिणां दत्वा ब्रूते ।

ऊषा— अये जगद्भण्डक एतद्वार्त्ता यदि अन्यैः श्रूयते तर्हि अवश्यं नासिकाच्छेदनं करिष्यामि।

सूत्रधार :—इत्युक्त्वा ऊषा चित्रलेखां ब्रूते।

ऊषा— हन्त, अये त्रैलोक्यमोहिनि सखि, एवं स्वरूपां त्वां विलोक्य कोहि पुरुषः क्षमेत। अतस्तर्कयामि, मत्प्राणेशं किम्वा पूर्वं स्वयं उपभुज्य पश्चात् मयि निवेदयिष्यसि।

सूत्रधार :—तत् श्रुत्वा चित्रलेखा विष्णोः स्मरणं कृत्वा कर्ण-नासिके स्पृष्ट्वा ब्रूते।

चित्रलेखा—अरे दुर्विनीते, त्वं राजपुत्री सती कथमेवं दुर्वाक्यं लपसि। श्रूयतां श्रूयताम्। यस्ते पतिः सतु मम कुम्भाण्डपितेव मन्यते, नचात्रशङ्का कर्त्तव्या। निर्भयं गृहे स्थीयताम्॥

सूत्रधार :—तत् श्रुत्वा सानन्दं आशंसयति। ऊषोवाच—

मत्प्रियानयनार्थम्वै गच्छन्त्याः पथि ते सखि।
सर्व्वविघ्नप्रशमनं विघ्नेशः कुरुतां सदा॥३॥

सूत्रधार :—इत्येवं सख्यायात्रामाङ्गल्यं कृत्वा ऊषा गृहे तस्थौ। ततश्चित्रलेखा च रथे सावधानमुपविश्य वामकरेण रज्जुं दक्षिणकरेण लगुडं धृत्वा मेघ-गम्भीर शब्देन रथं शीघ्रं नियुज्य तत्क्षणेनैव नर्म्मदातीरं प्राप्तवती। तत्र स्नानभोजनं विधाय रथमारुरोह।

तदैव नारदमुनिः गोविन्दगुणगानप्रवीणां वीणां वादयन् तत्रोपजगाम्। एवं समागतं नारदं विलोक्य चित्रलेखा तत्क्षणं रथादवतीर्य चरणे प्रणिपत्य कृताञ्जलिः स्तौति। चित्रलेखा उवाच—

चित्रलेखा— नमोजगत्पवित्रैकहेतवे लोकचारिणे।
नमस्त्रैलोक्यपूज्याय नारदाय नमोऽस्तु ते॥४॥
सफला तीर्थसेवामे यात्रा च सफला भवेत्।
यद्भवानिह दैवेन समये समुपस्थितः॥५॥

सूत्रधार :—तत् श्रुत्वा नारदो वदति।

नारद :—हन्त, अहह, अये सर्व्वाङ्गसुन्दरि चित्रलेखे, एकाकिनी भवती कुत आगतासि? कुत्र यासि? शीघ्रं कथ्यताम्॥

सूत्रधार :—तत् श्रुत्वा चित्रलेखा ब्रूते।

चित्रलेखा—भो भो जगद्गुरो, किं कथयामि? लज्जया तद्वक्तुं न शक्नोमि, तथापि गुरोरग्रे कथयितुम् उचितम्, श्रूयताम्। बाणनरेन्द्रस्य सुता ऊषाकुमारी

अनिरुद्धकुमारं स्वप्ने पतिं लेभे। तद्विना क्षणमपि न जीवति। अतस्तमानेतुम् तया प्रेरितास्मि।

सूत्रधार :—तच्छ्रुत्वा नारदो वदति। नारदोवाच—

नारद :—हन्त अहो कुम्भाण्डकुमारि चञ्चलचित्ते पामरि, केन वा सहायेन एतादृशं साहसं कृतवती तन्नजानेहं, श्रूयतां श्रूयताम्। याहि श्रीकृष्णस्य द्वारकापुरी सर्व्वतो विशालक्षारसागरवेष्टिता। तत्रापि अन्तःपुरे लौहमयशिविरं निर्माय तन्मध्ये अनिरुद्धो रक्षितः। तत्रापि बलभद्रहनुमदादयः प्रचण्डवीरशार्द्दुलाः द्वारि द्वारि नियुक्ताः। अन्ये च यादववीरवराः अस्त्रशस्त्रधारिणश्चतुर्दिक्षु रक्षकाः। स्वयञ्च ब्रह्माण्डेश्वरः श्रीकृष्णः शास्त्रमादाय सर्व्वतः परिभ्रम्य रक्षति। अहो किमाश्चर्यं किमाश्चर्यं, तत्रापि प्रविश्य अनिरुद्धं हर्त्तुमिच्छसि। मैवं मैवम्। तत्र आशां दूरतः परिहाय परावृत्य गम्यतां गम्यताम्।

सूत्रधार :—तत् श्रुत्वा चित्रलेखा ब्रूते।

चित्रलेखा—हो मुनिशार्द्दल गुरो, श्रीरुद्रप्रसादात् अहं तव दासी कतिचिन्मायाः कर्त्तुं जानामि।

सूत्रधार :—तच्छ्रुत्वा नारदः सानन्दं ब्रूते।

नारद :—हन्त अरे मन्त्रिसुते, शीघ्रं तन्मायां दर्शय, दर्शय।

सूत्रधार :—तच्छ्रुत्वा चित्रलेखा सिंहशार्द्दुलघोटकसर्पादि कतिचिन्माया दर्शयामास। तद्दृष्ट्वा नारदो विहस्य ब्रूते।

नारद :—अहो मन्त्रिसुते, दृष्टं ते मायाबलं। आभिमायाभिर्नफलिष्यति किञ्चिदपि कार्य्यन्ते। अत इदानीं निगूढविद्यां कथयमि। शीघ्रमागच्छ, शीघ्रमागच्छ।

सूत्रधार :—इत्युक्त्वा चित्रलेखां समीपमाहूय कर्णे तामसीविद्यां कथयामास। एवं चित्रलेखा नारदमुखाद्विद्यां लब्धा पुनः पुनः प्रणिपत्य चरणधूलिं शिरसि निधाय द्वारकां गन्तुं मनश्चक्रे। ततो नारदः चित्रलेस्वामाशंसति स्म। नारदोवाच—

नारद :—हन्त अये मन्त्रिसुते, अनया विद्यया अविलम्बेन ता कार्य्यसिद्धिर्भवतु, सानन्दं गम्यताम्।

सूत्रधार :—इत्युक्त्वा नारदः तस्मान्निर्गत्य द्वारकां प्रति शीघ्रं निर्ययौ। अथ तद्दिवसे भगवान् श्रीकृष्णः द्वारकायाः अन्तःपुरान्निर्गत्य सपरिवारो वहिःशालायां प्रविश्य मेलकं कृत्वा स्थितवान्। तदैव नारदो मुनिस्तत्र प्रविवेश। एवं समागतं नारदं विलोक्य श्रीकृष्णः तत्क्षणमुथ्थाय आसनं दत्वा पाद्यादिभिः सम्पूज्य तदागमन-वार्त्तां पृच्छति स्म। भगवानुवाच—

श्रीकृष्ण :—हन्त भो भो मुनिशार्दूल, किमर्थम्वा अति त्वरया भवतः समागमनम् ? तत् शीघ्रं कथ्यतां शीघ्रं कथ्यताम् ॥

सूत्रधार :—तत् श्रुत्वा नारदो वदति ।

नारद :—श्रूयतां भो भो भगवन् त्रैलोक्याधिपते । अद्य रात्रौ तवान्तःपुरे चौरः प्रविश्य अनिरुद्धकुमारं हरिष्यति । एतद्वार्त्ता तवाग्रे कथयितुं समागतोऽस्मि । तद्विज्ञाय सावधानं स्थीयताम् ।

सूत्रधार :—इत्युक्त्वा नारदस्तस्मान्निर्ययौ । एवं नारदमुखाद्वार्तां श्रुत्वा श्रीकृष्णस्तत्क्षणं लौहमयशिविरं निर्माय तन्मध्ये अनिरुद्धकुमारं प्रवेश्य स्थापयामास । ततश्चतुर्द्वारि वलभद्र-गरुड-कामदेव-हनुमतः चतुरो वीरान्नियुज्य अन्यान्नपि ससैन्यान् वीरवरान् सावहितान् चतुर्दिक्षु स्थापयित्वा स्वयञ्च रथमारुह्य चक्रमादाय सर्वतः परिभ्रमन् तस्थौ ।

अथ सा रथमारुह्य चित्रलेखा मनस्विनी ।
गत्वा द्वारवतींप्रान्ते तत्याज रथमुत्तमम् ॥६॥

सूत्रधार :—एवं चित्रलेखा रथमारुह्य द्वारकानिकटं गत्वा तत्र रथं परिहाय नारदकथितस्य औषधस्य वटिकां विधाय ललाटे तस्याः तिलकं दत्वा भ्रमरीरूपमास्थाय द्वारकान्तःपुरे गत्वा गवाक्षरन्ध्रेण अनिरुद्धशिविरान्तः प्रविश्य तिलकं विमुच्य निजरूपेण अनिरुद्ध-कुमारसमीपे स्थित्वा तेन सह आलोच्य उभयोः ललाटे तिलकं दत्वा स्वयं भ्रमरीभूत्वा तञ्च भ्रमरं कृत्वा पृष्ठे निधाय तेन पथा रथान्तिकम आनिनाय । पुनश्च तिलकं विमुच्य द्वावपि निजरूपमास्थितौ । तत्र चित्रलेखा कुमारं रथमध्ये आवेश्य स्वयञ्च तत्र एकदेशे उपविश्य कुमारम् आनयति स्म । तद्दृश्यतां श्रूयतां भण्यतां जयहरगौरी ।

## ( गीतम् )

राग—सिन्धुरा ।

ताल—जौति ।

चित्रलेखा नयति स्मरतनयम् ।
चपलनयनयुगमाकुलहृदयम ॥७॥
पीतवसनवरमण्डितशरीरम ।
रिपुकुलमर्द्दनमतिवरवीरम् ॥८॥

बाणसुताधरमधुरसलोभम् ।
त्रिभुवनतोषणतनुवरशोभम् ॥९॥
श्रीशिवसिंहनृपतिमतिभाणम् ।
छलयतु कविचन्द्रद्विजगानम् ॥१०॥

सूत्रधार :—एवं चित्रलेखया विविधकथाच्छलेन शीघ्रं रथवेगेन नीयमानः कुमारः अग्रतो विलसन्तीं नवयौवनसम्पन्नां अपूर्व्वसुन्दरीं कुम्भाण्डकुमारीं विलोक्य कामशर-जर्ज्जरीकृतकलेवरः सन् आलिङ्गनं प्रार्थयते स्म। कुमार उवाच—

कुमार :—हे हे जगन्मोहिनि त्रैलोक्यसुन्दरि ! एवं अपूर्वरूपां त्वां विलोक्य कामव्या-कुलोऽहं क्षणमपि स्थातुं न शक्नोमि ! अत इदानीं कृताञ्जलिः प्रार्थयामि, वारमेकं आलिङ्गनं देहि। नोचेत् अवश्यं बलात्कारं करिष्ये, नचात्र मम दोषः।

सूत्रधार :—इत्युक्त्वा कामतरंगे निपत्य कुशाकाशावलम्बनं कुर्व्वन्तं कुमारं विलोक्य चित्रलेखा विहस्य ब्रूते स्म। चित्रलेखा उवाच।

चित्रलेखा—हे हे अखिलब्रह्माण्डेश्वरपौत्र, मदनमोहनप्रभो, विशेषतः त्वं कामस्य पुत्रोऽसि। पिता सव्वदा पुत्रं अनुगृह्णाति, न च निग्रहं करोति, तस्मात् कथं कथयसि कामव्याकुलोऽहमिति। एतत् सवं मिथ्या मन्यते।

सूत्रधार :—तच्छ्रुत्वा कुमारः सक्रोधं ब्रूते। कुमार उवाच—

कुमार :—आः अये नागरिके विदग्धे, मृतप्रायं मां कथं कथाच्छलेन विकथ्यसे। यत्कृतं तत्कृतम्। इदानीं त्वं भुजाभ्यामालिंग्यस्व। अहञ्च भुजाभ्यामालिंग्य उत्तुङ्ग पीनपयोधरद्वयं हृदये निधाय अधरामृतं पीत्वा चित्तं सन्तोषयामि।

सूत्रधार :—तच्छ्रुत्वा चित्रलेखा ब्रूते स्म। चित्रलेखा उवाच—

चित्रलेखा—हन्ताहो त्रैलोक्यमोहन तात, कथमेवं विह्वलोऽसि। धैर्य्यमाश्रय। क्षणेनैव तवानुरूपां अपूर्व्ववरबालां जगन्मोहनीं बाणनरेन्द्रनन्दिनीं उषाकुमारीं लप्स्यसे। तथापि तस्या निकृष्टां किङ्करीमनाचारिणीं दुष्प्रामालिंग्य कथमेवं ख्यातिं कर्त्तुमिच्छसि। मैवं मैवम् अस्तु तावत्। इदानीं विविध स्वरेण त्वदीय गुणवर्णनेन गीतं गीयते। तन्निशम्य क्षणं विश्राम्यताम्।

सूत्रधार :—तच्छ्रुत्वा चित्रलेखा सानन्दं गीतं गायति। तद्दृश्यतां श्रूयतां भण्यतां जयहरगौरी।

## ( गीतम् )

जय अनिरुद्धवीर सर्व्वाङ्गसुन्दर । ध्रुं
यदुकुलकमलप्रकाश दिनकर ॥११॥

कनकभूषणविभूषितकलेवर ।
पीतवस्त्रपरिधानलोकमनोहर ॥१२॥

भुवनमोहनदिव्यदेवराजवेश ।
वर्त्तुलमस्तकसुकुञ्चित-दीर्घकेश ॥१३॥

पूर्णचन्द्रसमतार वदनप्रकाश ।
दन्तचयप्रकाशितमनोहरहास ॥१४॥

अञ्जनरञ्जितरक्तनयनकमल ।
कनककुण्डलसुशोभित गण्डस्थल ॥१५॥

मृगमदविन्दुसुमण्डितललाटक ।
सुरञ्जितविरचितचन्दनतिलक ॥१६॥

भुजयुगविहितकेयूरयुगद्वय ।
करयुगविराजितकनकवलय ॥१७॥

चम्पककलिकासम अङ्गुलिनिचय ।
अर्द्धचन्द्रविनिन्दक नखरत्नमय ॥१८॥

कण्ठविलम्बितचारुहेममयहार ।
हृदयलम्बितदिव्यमणिमयताड ॥१९॥

त्रिवलिवलितोदर क्षीणमध्यकाय ।
सुगम्भीर नाभिपद्म शुद्ध अभिप्राय ॥२०॥

कटितटसुशोभित किङ्किणीसञ्चय ।
कनककदलीसम चारुउरुद्वय ॥२१॥

अरुणचरणविनिन्दितपद्मकोष ।
दृष्टिमात्र नरनारी परम सन्तोष ॥२२॥

जय शिवसिंहनृपप्रमथईश्वरी ।
सर्व्वसामाजिक सदा वद हरि हरि ॥२३॥

सूत्रधार :—एवं नानाविधसुस्वरसुललितगीतेन कुमारं मोहयन्ती चित्रलेखा तत्क्षणमेव शोणितपुरान्तिकमासाद्य योगबलेन शीघ्ररथवेगेन अग्निमयप्राकारं विलंघ्य कुमारेण सह अन्तःपुरं प्रविवेश। एवं प्रविश्य तत्र च रथं विहाय ऊषागृहं प्रति कुमारं नयति स्म। तद्दृश्यतां जयहरगौरी।

## ( गीतम् )

राग—मालसी ।

ताल—मगलि ।

चित्रलेखा सा चारुविलासा नयति मदनछतमेतम् ।
उदितनिशापतिसदृशवदनमतिविकलतरुणीनिकेतम् ॥२४॥
अभिनवरामा सङ्गमकामा कुलमनसं सविलासम् ।
अग्रविकशितकुन्दकछन्दरदशानमधुरदरहासम् ॥२५॥
सजलजलदसम-नीलमनोरमतनुछकुमारशरीरम् ।
विपधरनिर्ज्जरदनुजमनुजवर-शंसित भुजबलवीरम् ॥२६॥
सहप्रमथेश्वरीमरिकरिकेशरि शिवसिंहनरदेवम् ।
छखयतु तन्निजकविचन्द्रद्विजभणितमिदं शिवसेवम् ॥२७॥

सूत्रधार :—एवमानीय अनिरुद्धकुमारं उपागृहे प्रवेशयामास। तद्दृश्यतां श्रूयतां भण्यत जयहरगौरी ।

मनोति तीव्रप्रमदं यदीयं तनोति देवी प्रमथेश्वरीयं ।
नरेन्द्रवर्गैः कृतपादसेवः स एप जीयात् शिवसिंहदेवः ॥२८॥

इति श्रीप्रमथेश्वरी-प्रियतम-श्रीश्रीशिवसिंहमहीमहेन्द्रशासितद्विजकविचन्द्रकृते श्रीभागवत-हरिवंश-समुद्धृत-कामकुमारहरणनाटके तृतीयोऽङ्कः ॥

# चतुर्थोऽङ्कः

सूत्रधार :—अथ सख्या सह आगच्छन्तं प्राणमिवकुमारं विलोक्य ऊषाकुमारी अतीव आनन्दोल्लोसितचित्ता ससम्भ्रममुथ्थाय प्रथमसमागमलज्जया आगन्तुमसमर्था सतो मनसा प्रणम्य ब्रूते स्म। ऊषोवाच—

अहो भाग्यमहोभाग्यं प्राप्तो यत्पतिरीदृशः।
धन्यासि कृतपुण्यासि सखी मे सत्यवादिनि ॥१॥

सूत्रधार :—इत्येवं शनैः शनैःउक्त्वा वस्त्राञ्चलेन शिर आच्छाद्य करतले कपोलं निधाय दक्षिण पादाङ्गुष्ठेन क्षितिं विलिख्य पुनः पुनः चकितनयनेन वीक्षमाणा तस्थौ। एवं कुमारोऽपि शरच्चन्द्राननामूषाकुमारीं विलोक्य आनन्दमयपयोधौ निमग्नः कियद्दूरे स्थितः सोत्कण्ठं ब्रूते। कुमार उवाच—

अहो हि धन्या कुलजा सुकन्या कुम्भाण्डपुत्री नृपजात्मदूतो।
इमामपूर्व्वां वरवामनेत्रां प्राप्तो यतोऽस्मि द्विजराजवक्त्राम् ॥२॥

सूत्रधार :—एवं ऊषानिरुद्धयोरुत्कण्ठां विलोक्य चित्रलेखा विहस्य ब्रूते। चित्रलेखोवाच—

चित्रलेखा—अहह, भद्रं युवयोर्दम्पत्योर्मानसेङ्गितं बुद्धं बुद्धं मया, अस्तु तावत्। इदानीं लज्जां परिहाय अन्योन्यमुखावलोकेन युवाभ्यां दश-दश पदानि आगम्यतां आगम्यताम्।

सूत्रधार :—तत् श्रुत्वा उभौ अन्योन्यमुखमवलोक्य विहस्य दशदश पदानि आगम्य सन्निहितावस्थितौ बभूवतुः। ततश्च ऊषाकुमारी कुमारस्य शिरसि माल्यं दत्वा चरणे प्रणिपत्य ब्रूते। ऊषोवाच—

ऊषा— भो भो सर्व्वाङ्गसुन्दरप्राणेश्वर, अद्यारभ्य सत्यं सत्यं स्वामित्वेन त्वामहं वृतवती।

सूत्रधार :– तत् कुमारस्य तस्याः शिरसि माल्यं निधाय पाणिग्रहणं कृत्वा उत्तोल्य अङ्गीकरोति। कुमार उवाच—

कुमार :—हे त्रैलोक्यमोहनि प्राणेश्वरि, अहञ्च सत्यं सत्यं भार्याभावेन त्वां गृहीतवानस्मि। नचात्र संशयः कर्त्तव्यः।

सूत्रधार :—अत्रान्तरे चित्रलेखा रहस्येन घटपढादि नाना माङ्गल्यद्रव्यहस्तान् सखीजनान् आनार्य शनैः उलूलुध्वनिपूर्व्वकं उभयोर्वस्त्राञ्चलेन लग्नग्रन्थिम्बद्धा श्वेतचामरेण सम्वीज्य वेदिकान्तिमानीय मङ्गलपूर्वकं सप्तवारं वेदिप्रदक्षिणं

कारयित्वा तन्मध्ये प्रवेश्य केशगुच्छद्वयमेकीकृत्य घटस्थजलेन सिञ्चति स्म। ततो गृहं नीत्वा एकासने उपवेश्य सखीभिः सह माङ्गल्यपूर्व्वकं दुर्व्वाक्षत-पुष्पाणि सिञ्चति स्म। अनन्तरं पृथगासने उपवेश्य पिष्टक-परमान्नादि नानाविध भक्षद्र-व्याणि दम्पत्योरग्रे निवेदयामास। ततः कुमारः पाणिपादम् प्रक्षाल्य आचम्य विष्णुस्मरणं कृत्वा, तत् सर्वं जलेनाभुक्ष्य विष्णवे निवेद्य मनसा विमृष्य ब्रूते। कुमार उवाच—

कुमार :—अहो पूर्वं विस्मृतं, अस्याजात्यादिकमविचार्य कथमन्नं भोक्ष्ये। अये सर्वाङ्ग-सुन्दरि, युष्माकं किम्वा कुलं तत्कथ्यतां कथ्यताम्। नोचेदन्नं भोक्तुं न शक्नोमि।

सूत्रधार :—तच्छ्रुत्वा चित्रलेखा विहस्य ब्रूते।

चित्रलेखा—अहह किमपुर्वं श्रुतम्। भो भो विशुद्धबुद्धे यदि अन्नं न भुङ्क्ते तर्हि कथम्वा अस्माकं कन्या विवाहीकृतः तत् कथयस्व।

सूत्रधार :—तत् श्रुत्वा कुमारो निरुत्तरः सन् भोक्तुमारभे। तदा चित्रलेखा नृत्यन्तीव इतस्ततः चलन्ती पृथक् पृथक् पात्रेण षडरसपञ्चामृतयुक्तमन्नव्यञ्जनं परिवेशयामास। एवं चित्रलेखा कन्यावरौ भोजयित्वा विचित्रशय्यायाम् उपवेश्य कर्पूर-ताम्बूल-सम्पूटकम् अग्रतो दत्वा प्रार्थयते। चित्रलेखा उवाच—

चित्रलेखा—हे हे त्रैलोक्यमोहन प्रभो, यदा सख्या सह द्वारकापुरं गमिष्यामि तदा मामपि सङ्गे नेष्यसि, युवयोः चरणसेवां कृत्वा स्थास्यामि, नोचेत् मम जीवनम् न भविष्यति।

सूत्रधार :—तच्छ्रुत्वा कुमार ब्रूते।

कुमार :—अये प्राणप्रियेसखि निर्भयं स्थीयताम्। त्वामवश्यं सङ्गे नीत्वा मत्पिता-महस्य कृष्णस्य भ्रातरं गदनामानं विवाहयिष्यामि।

सूत्रधार :—तत् श्रुत्वा सानन्दं चित्रलेखा आत्मशयनस्थानं ययौ। अनन्तरं कुमारः ऊषया सह षोडश शृङ्गारं कर्त्तुमारेभे। तद्दृश्यतां श्रूयतां भण्यतां जयहरगौरी।

## ( गीतम् )

रमत उषापतिररतिरतिरङ्गम्।<br>
निजविधिवैभव भवदुभसङ्गम् ॥३॥<br>
श्लिष्यति चुम्बति विहसितवदनम्।<br>
स्तनयुगमर्द्दनवर्द्धितमदनम् ॥४॥

स्मरसमरश्रमविगलितस्वेदम् ।
रतिरसविस्मृतविरहजखेदम् ॥५॥
अधरयुगव्रणदशनविघातम् ।
विगतवसनवरजघननिपातम् ॥६॥
श्रीशिवसिंहमिमं नरदेवम् ।
रमयतु कविचन्द्रद्विजगीतमेवम् ॥७॥

सूत्रधार :—एवं विविध विलासेन प्रतिदिनं प्रत्युपपर्यन्तं रममानयोस्तयोः अष्टौ दिवसा गताः। तदन्ते प्रातरुथ्थाय ऊषानिरुद्धौ रहस्य गृहान्निर्गत्य एकासने उपविश्य तिष्ठतः। अत्रान्तरे काचित् ऊषानुचरी दासीनामधिकारे राज्ञा नियुक्ता उन्नत-दशनकपोला, लम्बोष्ठा, विवृतवदना, सुदीर्घनासाग्रीवा, शूर्पाकारकर्णललाटा, लम्बितस्तनयुगला, उन्नतकुक्षिकटिप्रदेशा दीर्घजङ्घोरुचरणा, ह्रस्वमध्यदेहा, कोटर-नयना, वृहत्कुब्जा आसीत्। इथ्थं विकृतरुपा चेटिका दासीगणसमेता कक्षे वामहस्तं निधाय दक्षिणहस्तं सञ्चाल्य क्रोधेन शिरः कम्पयन्ती ब्रूते। कुब्जा उवाच—

कुब्जा— अरे अरे दुराचार दर्विनीत चौर, अत्र रहसि अन्तःपुरे राजाधिराजतनया-सङ्गे केनवा उपवेशितः, तत्कथय कथय। आः अरे दास्यः, पश्यत एनां राजकुमारीं प्रति किमयं योग्यः ? आश्चर्य्यम आश्चर्य्यम्, अहो पिपीलिका चुम्बति चन्द्रबिम्बम्। अस्तुतावत् यत्कृतं कृतम्। इदानीञ्च शीघ्रमुत्तिष्ठ। नोचेत् केशे आकृष्य हस्ततलप्रहारेण नृपाग्रे नीत्वा अवश्यं स्कन्धपातं कारयिष्यामि।

सूत्रधार :—इत्येवं वारम्वारं निर्भर्त्सयन्तीं कुब्जां विलोक्य ऊषा सक्रोधं ब्रूते। ऊषोवाच—

ऊषा— दुराचारे कुब्जे, केनवा अत्रोचितं वक्तुं आनीतासि, तन्नजानेहं। इदानीञ्च दूरं याहि याहि। नोचेत् नासिकां छेदयिष्यामि नचात्र मम दोषोऽस्ति।

सूत्रधार :—इथ्थं ऊषाया निष्ठुर वाक्यं निशम्य कुब्जा क्रोधेन मूर्च्छिता इव मस्तकमान्दोल-यन्ती अङ्गुल्याग्रेण सन्तर्ज्य तिष्ठतिष्ठेति बहुधा गर्ज्जयन्ती शीघ्रं गत्वा राजपत्न्या मधुमत्या अग्रे तद् वृत्तान्तं कथयति स्म। कुब्जा उवाच—

कुब्जा— हे हे मातर्मधुमति, तव दुहितुर्यशः किं कथयामि ? यत्कृतं तद्वक्तुमनुचितं तथापि, श्रूयतां श्रूयताम्। कस्माद्वा एकं अज्ञातकुलशीलं पुरुषमानाय्य तेन सह भुक्त्वा पीत्वा एकशय्यासने क्रीडन्ती सदा तिष्ठति। तत्र किञ्चिदुक्तवत्या मम नासिकाच्छेदनं कर्त्तुमिच्छति। एत तवाग्रे निवेदितम्, इदानीं नृपतिरग्रे निवेदयिष्यामि।

सूत्रधार :—तत् श्रुत्वा मधुमती ससम्भ्रमुथ्थाय आत्मनः परिधानवस्त्रमणिहारकेयूरकङ्कण-कुण्डलानि कुब्जां परिधापयन्ती हस्ते धृत्वा प्रार्थयते। मधुमत्युवाच—

मधुमती :—अहह, हे हे मातः कुब्जे, त्वं सव्वदा ममोपकारिणी। अतो यत्कृतं तत्कृतम्। ऊषाया एतत् सर्वं नृपतेरग्रे न कथयितव्यम्, एतत् प्रार्थयामि। इदानीं सत्वरं गच्छ गच्छ। यथा तथा उपायेन पुरुषं दूरीकृत्य पापिष्ठां रक्षस्व।

सूत्रधार :—तत् श्रुत्वा कुब्जा 'भद्रे, तथा करिष्यामि', इत्युत्वा तस्मान्निर्गत्य मनसा समालोचयति। अहो मधुमत्या एवं सम्मानः कृतः। नृपतिः श्रुत्वा इतोधिकं सम्मानं करिष्यति। इत्येवमालोच्य आनन्दोल्लसितचित्ता दर्पेण गच्छन्ती पथि दैवज्ञं दृष्ट्वा सगर्व्वं ब्रूते।

कुब्जा— हंहो अरे दैवज्ञ बालक, मां दृष्ट्वा सम्भाषणञ्च न कुरुषे। कथमेवं गर्वायषे। भद्रं भद्रं याहि, याहि, यदा तदा त्वां प्रास्यामि।

सूत्रधार :—तच्छ्रुत्वा दैवज्ञः ससम्भ्रमं पञ्जिकां करयुगे निधाय आशंस्य ब्रूते। दैवज्ञ उवाच—

दैवज्ञ :—

अशुभस्था ग्रहा ये च क्रूराः सौम्याश्च सर्व्वदा।
शुभदाः सन्तुते सर्वे दैवज्ञवचनात्तव ॥८॥

हन्त भोः सर्वसुलक्षणे मातरिदानीम् ज्ञापय। शुभाशुभं विचार्य्य कथयामि।

सूत्रधार :—तत् श्रुत्वा कुब्जा उवाच।

कुब्जा— हन्त अरे दैवज्ञ बालक, नृपतेरग्रे गत्वा एकां वार्त्तां कथयिष्यामि। तत्र शुभाशुभं विचार्य्य शीघ्रं कथ्यतां कथ्यताम्।

सूत्रधार :—तत् श्रुत्वा दैवज्ञः पञ्जिकाया ऊर्द्धाधोभागं विलोक्य सहर्षं कथयति। दैवज्ञ उवाच—

दवज्ञ :—जहह किमपूर्वं दृष्टम्। अये मर्कटवदने सर्वाङ्गसुन्दरि अलमत्र विलम्बेन। सत्वरं गम्यतां गम्यताम्। वार्त्ताकथनमात्रेनैव तत्क्षणं नीत्वा अवश्यं मुख्यपटेश्वरीं करिष्यति, न चात्र शंसयः कर्त्तव्यः।

सूत्रधार :—तत् श्रुत्वा अतीव सानन्दा अंग भंग्या सत्वरं कियद्दूरं गत्वा नापितं दृष्ट्वा तस्य कक्षात् आदर्शं गृहीत्वां दन्तान् प्रकटीकृत्य तत्र विकृताकारं मुखं विलोक्य क्रोधेन आदर्शं दूरे निक्षिप्य नापितम्प्रति गर्ज्जति। कुब्जा उवाच—

कुब्जा— हंहो, अरे दुर्विनीत नापित, मयि किं अवज्ञां कुरुषे। यस्मात् आदर्शमपि इष्टकारजोभिः सम्मार्ज्य न दर्शयसि। तथापि इदानीं याहि याहि, तत्प्रतिफलं अल्पकाले एव दास्यामि।

सूत्रधार :—इत्युक्त्वा कुब्जा राजसभां जगाम। तदिदं दृश्यतां श्रूयतां जयहरगौरी।

## ( गीतम् )

राग—जयन्ति ।

ताल—एकतालि ।

विचलिता कुब्जा कौतुकमनसा ।
लम्बिततरकुचपीवरपनसा ॥९॥
भङ्गुरचरणा भङ्गुरहृदया ।
भग्नतरुकोटरनयनद्वितया ॥१०॥
पीनदशनरसनोत्कटतुण्डा ।
नासासमितमतङ्गजशुण्डा ॥११
प्रकटविकटविरलायतदन्ती ।
नृपसम्मानं समभिलषन्ती ॥१२॥
प्रियप्रमथेश्वरोनरपतिमेतम् ।
द्विज कविताकुलतां कमुपेतम् ॥१३॥

एवं गत्वा कुब्जा राजसभां प्राप्य नृपतेः सम्मुखं कृतजानुपाता कृताञ्जलिः ऊषावृतान्तं कथयति । कुब्जा उवाच—

कुब्जा— भो भो नरेन्द्रशार्दूल, तव दुहितुरूषायाः प्रवृत्तिं कथयामि, श्रूयतां श्रूयताम् । कस्माद्वा एकं परपुरुषं आनाय्य तेन सह अहर्निशं रतिरंगं विधाय तिष्ठति । मया किञ्चिदुच्यमाना सा पुणर्ममैव नासिकाच्छेदनं कर्त्तुमिच्छति । एतत सर्वं तवाग्रे निवेदितम् । यथा इच्छसि तथा कुरु, पश्चात् पुनर्मयि दोषो न दातव्यः ।.

सूत्रधार :—तत् सर्वं श्रुत्वापि बाणनृपतिर्लज्जया अश्रुतभावेन तस्याः सम्मुखे पृष्ठं दत्वा परिक्रम्य उपनिवेश । कुब्जापि ततो नृपसम्मुखं गत्वा पूर्व्वमुक्तमश्रुतं मत्वा तदेवपुनरुवाच । एवं वारम्वारं सभामध्ये दहितु दुर्यशो वाक्यं निशम्य राजा लज्जितः सन् क्रोधवेगेन तस्या नासिकां छेत्तुं दूतानादिदेश । राजा उवाच—

बाण :— शृणुताहो दूताः, शीघ्रमस्या नासिकाच्छेदनं कृत्वा इतः अपसार्यताम् ।

दूता :— हे हे महाराज, भद्रं भद्रं भवदादेशेन कुब्जामेतां तथा कुर्म्मो वयम् ।

सूत्रधार :—एवं तदादेशं शिरसि निधाय दूताः कृतजानुपाता नृपतिं प्रणम्य तत्क्षणं कुब्जां गृहीत्वा पुराभ्रिःसार्य नासिकां छित्वा निर्यापयामासुः । ततः छिन्ननासां शोणितलिप्तमुखीं कुब्जां पथि विलोक्य नापितोवाच—

नापित :—हे हे राजपटेश्वरी, समागतासि, शोभनदर्पणमेकं याचेहं, दृष्ट्वा याहि, दृष्ट्वा याहि।

सूत्रधार :—एवं नापितवचने अकृतकर्णा पथि गच्छन्तीं कुब्जां विलोक्य दैवज्ञ उवाच—

दैवज्ञ :—हे हे सर्व्वाङ्गसुन्दरि, हाहा तव सर्वं मया गणितम्। अनिष्टो राहुग्रहः गणयितुं विस्मृतः। तेन तवेयम् अवस्था जाता। आः यज्जातं जातम्। सम्प्रति मृत्तिकारजोभिः रुधिराणि आच्छादय, आच्छादय। यतस्तद्विलोकनतः शोक-शल्येन मम हृदयं विदार्यते।

सूत्रधार :—एवं दैवज्ञनापिताभ्यामुपालम्भा मृतकल्पा कुब्जा निजालयं जगाम। अथ दश-पुत्रान् सम्बुध्य राजा बाण उवाच—

बाण :—अये पुत्राः, दशभ्रातरो यूयं शीघ्रं यात शीघ्रं यात। कुब्जाकथितं सत्यम्वामिथ्या वा जानीत, जानीत।

राजपुत्रा :—हे हे पितर्महाराज, बाढम् यामो वयम्।

सूत्रधार :—एवमुक्त्वा शीघ्रमन्तःपुरं गत्वा एकत्र ऊषानिरुद्धौ विलोक्य राजपुत्राः ऊचुः।

राजपुत्रा :—अरे लम्पट स्त्री चौर, कथमेवं गर्वायसे, किमसि लोहबद्धकन्धरः? अहो कुपित-सिंहेनालापं करोषि। आः रत्नाशया आशीर्व्विषशिरसि हस्तो न्यस्तः। रे रे पामर, पृष्ठे हस्तौबद्धा भवन्तमधूना वयं नेष्यामः। तत् शीघ्रं स्वयमागच्छ, यावत् केशेषु आकृष्य नानयामः।

सूत्रधार :—तत् श्रुत्वा ससम्भ्रमं अनिरुद्ध उवाच।

अनिरुद्ध :—हे हे राजकुमाराः, श्रीकृष्णस्य नप्ता कामदेवस्य पुत्रो नामतो अनिरुद्धोऽहं। भवतां भगिन्या ऊषया आनीतः, तां विवाहयामि स्म। तस्य च अष्टौ दिनानि यातानि। एवं घटितं सम्बन्धं नोच्छेदयत। जामात्रे मह्यं राजा मा कुप्यतु इति निवेदयत निवेदयत।

राजपुत्रा :—रे रे दुराचार चौर, एवं कातरवाक्येन भवन्तं न परिहरामः।

सूत्रधार :—एवमुक्त्वा धर धर, मारय मारय, ताडय ताडय इति कोलाहलं कुर्व्वन्तस्ते अनिरुद्धमधावन्। तद्दृष्ट्वा क्रोधाग्निना जाज्वल्यमानो अनिरुद्धः सपदि तुङ्गस्थूल-गृहस्तम्भमेकं उत्पात्य हस्तेन धृत्वा गृहाद्बहिर्भूय भ्रामयामास। तद् दृश्यतां श्रूयतां भण्यतां जयहरगौरी।

## ( गीतम् )

राग—खट् ।

ताल—एकतालि ।

रुरुचे कामकुमारशरीरम् ।
पीताम्बरधरमधिकमधीरम् ॥१४॥
उरुतररोपहुताशनिधानम् ।
नवकिशलयसहकारसमानम् ॥१५॥
ताम्रनयनकुटिलभ्रूसुहास्यम् ।
श्रमजलविन्दुमदिन्दुनिभास्यम् ॥१६॥
भवनस्तम्भविराजितहस्तम् ।
सजलजलदरुचिकरग्रस्तम् ॥१७॥
अयमनिरुद्ध इमं नरदेवम् ।
श्रीशिवसिंहमवतु कृतसेवम् ॥१८॥

सूत्रधार :—एवं ससंरम्भः कुलालचक्रवत् स्तम्भं भ्रामयन् अनिरुद्ध उवाच ।

अनिरुद्ध :—अरे दुर्विनीता दानवाधमाः, शृगालवालकाः सिंहं तर्ज्जयत । धिग्युस्मान् अधुना यमगृहं प्रस्थापयिष्यामि ।

सूत्रधार :—एवमुक्त्वा दशप्रहारेण दश बाणपुत्रान् मारयामास । ततो गृहं प्रविश्य ऊषाम्प्रति अनिरुद्ध उवाच ।

अनिरुद्ध :—हे हे प्राणेश्वरि, तव भ्रातृवधेन महदकार्यं कृतं मया । किञ्च पुनरपि इतोधिकमकाय मिलितप्रायं, तस्मात् विदायं देहि ! निजदेशं यामि निजदेशं यामि ।

सूत्रधार :—एतत् श्रुत्वा सचकितं भुजलतया पतिं गले बद्धा सलोतकमुखी गद्गदं सुमधुरं ऊषा उवाच ।

ऊषा— हे हे प्राणश्वर भवता विरहिता क्षणमपि प्राणान् न धारयिष्यामि । अवश्यं मरिष्यामि । अतो जहि भातृशतञ्च । तत्र मम चिन्ता नास्ति, तत्र मम चिन्ता नास्ति ।

सूत्रधार :—एवमामाप्य प्रीतौ तौ दम्पती एकत्रशय्यायां द्यूतखेलया स्थितवन्तौ । तद्-दृश्यतां श्रूयतां भण्यतां जयहरगौरी ।

भृङ्गः श्रीशिवसिंहभूपतिरसौ भृङ्गी च तस्य प्रिया
देवी श्रीप्रमथेश्वरी-गिरिसुतापादाम्बुजाश्रिते ।
एते कल्पपुरःसरद्रुमलते भिक्षाम्विनार्थप्रदे
वर्द्धेतामवलम्बिते गुणवकैः कान्तैरमुक्ते मिथः ॥१९॥

इति श्रीप्रमथेश्वरीप्रियतमश्रीश्रीशिवसिंहमहीमहेन्द्रशासितद्विज-कविचन्द्रकृतौ श्रीभागवत-हरिवंश-समुद्धतकामकुमारहरणनाटके चतुर्थोऽङ्कः ॥

# पञ्चमोऽङ्कः

दशबलिसुतपुत्रान् सूनुना शम्बरारेः, शमनसदननीतान् सङ्गरे तान् विलोक्य ।
द्रुतपदमयसद्यः स्वामिनोऽग्रेमिलन्तः, कृतकरयुगयोगारक्षकाः सम्प्रचल्युः ॥१॥

रक्षकाः—हे हे स्वामिन् महाराज, अहो आश्चर्यम् । तव दशपुत्रान् स स्त्रोचौरः अवधीत्, इति विज्ञाय कर्त्तव्यं कुरु, कर्त्तव्यं कुरु ।

सूत्रधारः—एतत् श्रुत्वा शोकक्रोधाभिमानवह्नित्रयेण कालाग्निरिव ज्वलन् राजा बाण उवाच ।

बाणः— अये पुत्रा, अग्रे यूयं सर्व्वे शीघ्रं यात शीघ्रं यात । स स्त्रोचौरः यथा न पलायते तथा कुरु, पश्चादहमपि यामि । राजपुत्रा ऊचुः ।

राजपुत्राः—हे हे पितर् महाराज, भद्रं भद्रं, एते वयं भ्रातृवधकारिणं प्रति सपदि यामः सपदि यामः ।

सूत्रधारः—एवमुक्त्वा नवतिः बाण-तनयाः रथगजहयारूढाः बहुसेना-सहिताः शीघं जग्मुः । अत्रान्तरे चित्रलेखया स्मृतमात्रो नारदः सपदि शोणितपुरं प्राप्य अनिरुद्धमभाषत । नारद उवाच ।

नारदः—हे हे तात अनिरुद्ध, मा भैः मा भैः, शुभन्ते भूयात् । तवानुकूलः प्राप्तोऽस्मि ।

सूत्रधारः—नारदं दृष्ट्वा अभिवाद्य अनिरुद्ध उवाच ।

अनिरुद्धः—हे गुरु, तव प्रसादेन मम किञ्चिदपि भयं नास्ति ।

सूत्रधारः—तदनन्तरं स्वयमपि राजा शस्त्रास्त्रपाणिश्चतुरङ्गसेनासहितो दिव्यरथारूढो बाणः प्रतस्थे । अथ श्वशुरमागतं विज्ञाय द्युतखेलं विहाय शीघ्रमुथ्थाय वहिरागत्य नतकन्धरः कृताञ्जलिः अनिरुद्ध उवाच ।

अनिरुद्धः—हे हे महाराज, अहं गोविन्दस्य नाम्रा कामदेवस्य पुत्रः । तव दुहित्रा परम प्रयत्नेन आनीतः । अहं तां विवाहितवान् । तस्य च दिनाष्टकं यातं तव ये दशपुत्रा आगता अतीव मूढा मां बहु तिरश्चक्रुः । तथापि मया क्षान्ताः । केशानाकर्ष्टुं इच्छन्ति इति दृष्ट्वा क्रोधात् मया हताः । एष दोषः क्षम्यतां क्षम्यताम् ।

बाणः—अरे अरे दुराचार स्त्रोचौर, त्रिभुवनविजयीदनुजप्रवरवीरबाणस्य दशपुत्रान् मारयित्वा जिजीविषांकुरुषे । एवं साहसिकस्य तव कथमिदानीं कातरवाक्यम, विक्रमं दर्शय किञ्च । कातर्य्यं परिहर्त्तव्यम् ।

सूत्रधारः—एवमुक्त्वा धर धरेति बाणदिष्टा दैत्यकटकाश्चतुर्दिशमनिरुद्धं अधावन् । तत् दृष्ट्वा साटोपं भुजदण्डभ्राम्यमाण महास्तम्भोऽनिरुद्धो घोरनादं चकार । तेन नादेन व्याप्त-

दिगदिगन्तरेण दैत्यसेना व्यामुमोह। तथाहि केचन कर्णौ पिदधुः, केचन मूर्च्छिता भूमौ निपेतुः, केचन बन्धुवर्गमाजग्मुः, केचन उन्मत्तहयहस्तिभिर्दलिताः, केचन प्राणपरोप्सवः पलायिताः। एवं विलोक्य असहमाना वाणस्य नवति पुत्रा युगपत् शरवर्षेण अनिरुद्धं आच्छादयामासुः। अनिरुद्धेन च स्तम्भभ्रामणेन ते शरा दशदिक्षु उड्डायिताः। किञ्च स्तम्भपाणिना प्रतिकम्पकृतभूमिकम्पं धावता अक्षौहिणीत्रयं पदातीनां, अयुतं हस्तिनां लक्षं रथानां सप्तलक्षान घोटकानां चत्वारिंशद्वा पुत्राणां यमालयमनीयन्त। एतस्मिन समये गगने तिष्ठन् नारद उवाच।

नारद :— हे हे वीर अनिरुद्ध साधु साधु धन्योऽसि धन्योऽसि। श्रीकृष्णस्य यशो विस्तारितवानसि।

सूत्रधार :—तदानीं वाणस्य प्रथमपुत्रः कुम्भवीरः प्रखरतरविंशतिशरप्रहारेण अनिरुद्धहस्ते स्तम्भं चिच्छेद। अथ निरायुधो अनिरुद्धः सूर्य्यं तुष्टाव। अनिरुद्ध उवाच।

अनिरुद्ध :—हे हे जगदीश्वर दिवाकर त्रयीमयमूर्त्ते त्रैलोक्यनेत्र ग्रहराज, तामहं शरणं गतोऽस्मि। अस्मिन् समरसंकटे निरायूधस्य मम रक्षां कुरु रक्षां कुरु।

सूत्रधार :— एवं स्तुतः प्रसन्नः श्रीसूर्य्यसशरंशरासनञ्च प्रस्थापयामास। गगनादवलम्बमानं दिव्यं सबाणंः तद्धनु दृष्ट्वा अनिरुद्धः सानन्दं गगनादेव धृत्वा तस्य टङ्कारघोरघोषेण दानवानीकं त्रासयामास। इदमद्भुतं विलोक्य स्वगतं राजा बाण उवाच।

बाण :— अहो असौ दिव्यं धनुः प्राप्तवान। अतो नायमल्पः पुरुषः, अनेन धनुषा यावदस्मान् न मारयति तावदेनं नागपाशेन बध्नामि।

सूत्रधार :—एवं विचिन्त्य नागपाशं प्रहृत्य तं ववन्ध। तदा सहवाणं तद्धनुः स्वर्गं जगाम। अवान्तरे परमो दयालुः श्रीसूर्यदेवोऽनिरुद्धशरीरे अभेदकवचं न्ययुंक्तः। अथ अनिरुद्धवधकामनया बाणासुरो नाना प्रयासमकरोत्। तद्दृश्यतां श्रूयतां भण्यतां जयहरगौरी।

## ( गीतम् )

राग—कर्णाट।

ताल—चुटा।

बाणधरणिपतितरयमनिरुद्धम्।
धावति खरतर खड्गगदाधरपाणिरपावृतयुद्धम् ॥२॥
बहुतनयाहृति कोपाकुलमतिरहितानन्दशरीरम्।
विविधायुधवरधरदशशतकर आपतितं भुवि वीरम् ॥३॥

ग्रामनसमानो बहुयतमानो भास्करकृपयादीनम् ।
अञ्जनगिरिसमतनुरफलश्रमायूथपीडाहीनम् ॥४॥
श्रीशिवसिंहनृपतिमतिदयितप्रमथेश्वरीमनुपमितम् ।
गमयतु हर्षं सुकृतसतर्षं कविचन्द्रद्विजभणितम् ॥५॥

सूत्रधार :—एवं खड्गशूलगदादि नानास्त्रशस्त्रप्रहारेषु निष्फलेषु दशमत्तदन्तिनः प्रेरयामास। तेषु च निष्फलप्रयासेषु अगाधजले पातयामास। तत्र च यदा न निमग्न आसीत् तदा बाणासुरो बहु विषादं प्राप्तवान्। तदानीं मन्त्रीप्रवरः कुम्भाण्ड उवाच।

कूम्भाण्ड :—हे हे महाराज, अनेन गान्धर्व्वविवाहेन तव कन्या सङ्गता, अतो जामातुरस्य वधः साधुर्न्न लक्ष्यते। किञ्च नायमल्पपुरुषः। पश्य एकाकी महाबलः सर्व्वानस्मानयोधयत्। अधुना नागपाशबद्धोऽपि नास्मान् गणयति। अतः कोऽपि महापुरुषोऽयं तस्मादेवमेनं नागपाशबद्धं रक्षिणे दत्वा कारागृहे स्थापय। एवं कस्यपुत्रः कुत आयातः केनानीतः इतिबुद्धा पश्चात रक्षितुं यदि युज्यते रक्षितव्यः, हन्तुं यदि युज्यते हन्तव्यः। एवं अहं वदामि, यद्रोचते तुभ्यं तत्कुरु।

सूत्रधार :—एवं साध्विति मन्त्रिवचनमनुमोदमानो राजा बाण उवाच।

बाण :— अये रक्षकजना, एनं नागपाशादमुक्तं सावधाना रक्षत।

रक्षका :—हे हे महाराज, यथा तव आज्ञा तथा कुर्म्मो वयम्।

सूत्रधार :—एवं नियुज्य राजा निजगृहं जगाम। अथ बन्धमोक्षकामो दुर्गादेवीं स्तुवानः अनिरुद्ध उवाच।

अनिरुद्ध :—हे हे चराचरमातर्भगवति कात्यायनि जगदीश्वरि नारायणि दीनदयामयि निजभक्तपरिपालिनि दुष्टदैत्यनिकालिनि देवि दुर्गे, तव शरणं गतास्मि। एतस्मात्बन्धनात् मां मोचय, मोचय।

सूत्रधार :— अथानिरुद्धस्य बलेः छतेन तथानिरुद्धस्य बलेन बद्धा।
इतिस्तुतिप्रीतियुतान्तरात्मा दुर्गाविरासीद्गजवैरिवाहा ॥६॥

एवं प्रत्यक्षभूता अनिरुद्धं सम्बुध्य दुर्गा वदति स्म।

दुर्गा :— हे हे वत्स कन्दर्पकुमार, मा विषीद मा विषीद। अल्पकालात् एव भवन्तं श्रीकृष्णो मोचयिष्यति। किञ्च एतं नागपाशबन्धमपि अहं शिथिलं करोमि।

सूत्रधार :—एवमुक्त्वा निजकराग्रेण संस्पृश्य स्वयं बन्धशैथिल्यं कृत्वा देवी तत्रैव अन्तर्दधे। अनिरुद्धोऽपि तां नमस्कृत्यं बन्धपीडारहितः सुखं तस्थौ। एवमनिरुद्धे बद्धे अतीव व्याकुला सलोतकमुखी क्रन्दन्ती बहु विलपन्ती स्वामिगुणान् वगयन्ती ऊषा वदति स्म।

## लेछारी-मुक्तावली ।

हा प्राणेश्वर सर्व्वाङ्गसुन्दर नाहि पटन्तर यदुवीरवर
विधियो लिखिले तोमार हेन बिलाय ।
आति सुभनय मदनतनय गहन आशय सर्व्वगुणालय
तयु दुख देखि किसक प्राण नेयाय ॥७॥

हा मोर प्राण कन्दर्प्पसमान सुवेश सुठान विधिर निर्म्मान
मयि अभागिनी करिबो कोन उपाय ।
सुचान्दवदन रतिर नन्दन कमलनयन सर्व्वसुलक्षण
अनाथिनि भावे याइबो मयि कोन ठाइ ॥८॥

हा प्राणधन कमलरमण कामिनीमोहन मोहोर जीवन
तोमार विरहे दहे मोर सर्व्वकाय ।
श्याम परकाश मुखे मृदुहास गजेन्द्रसंकाश गमनबिलास
दिलो हेन दुख तोमाक मइ अनाइ ॥९॥

हाँ महावीर सागरगम्भीर सुथिर सुधीर कोमल शरीर
कि रूपे रहिबा हेन बन्ध पीड़ापाइ ।
मिलिल स्वञाल कि मोर कपाल नसाधिलो भाल वाप भैल काल
मोर बुके शाल थैलेक इतो बैसाइ ॥१०॥

हा प्राणपति तोमार विपत्ति देखिया सम्प्रति बियाकुल मति
हरि गैल मोर श्रुति बुद्धि समुदाय ।
जले झाम्प दिबो कटारि हानिवो अग्नित परिबो गरल भक्षिबो
आत विने मोर आन एको गति नाइ ॥११॥

हाँ नाथ मोर यादव किशोर मिलिलेक तोर अथान्तर घोर
नपाओ उपाइ किमते आक एड़ाइ ।
हरि हरि रति आइ महासती मोर शाशु अतिशय दयावती
शोकते मरिबा तनयर बार्त्ता पाइ ॥१२॥

हा गुणनिधि भैल कार्य्य सिद्धि मिलाइलेक विधि सपोनर निधि
मरो मञि आवे तोमासाक हस्वाइ ।
शोके हियाभेद करि खाइ मेद भैल आशा छेद बुले बर खेद
नातिर वृत्तान्त नजानिला यदुराइ ॥१३॥

हां छकुमार कामर कुमार त्रिभुवने सार तुमि विने आर
मोहोर जीवन धरिबाक नयुवाइ।
धिक धनजन जीवन यौवन धरो अकारण ढ्टो घन स्तन
गल काटि मरो खाण्डा आन आइ वाइ ॥१४॥

एवं वहु विलप्य गलच्छेदेनात्मघातं कर्त्तुं वाणनन्दिनी समीपे प्राप्तं खड्गं हस्तेनोत्तोल्य धारयामास। तद् दृष्ट्वा ससम्भ्रमं हस्तात् खड्गं दूरे निक्षिप्य चित्रलेखोवाच।

चित्रलेखा—अये अविदग्धे मुग्धे, कथमेवं अकार्य चिकीर्षसि? कुत्र दृष्ट्वा मर्त्तुमिच्छसि? आः बाणवंशवने अनलतुल्यासि, अनल तुल्यासि। हा हा कृष्णेन सह कलहो मिलितः। ज्ञातं बाणासुरस्य स्कन्धः पतितः। अहो अचिन्त्यमहिम्ना प्रकृति पुरुषनायकेन श्रीकृष्णेन सह वाणोऽयं जाल्मः किल कलहमारभत! हरि हरि एतादृशवाणकोटिभिरपि तस्य किं कर्त्तव्यम्। हे हे सखि राजकुमारि, वृथा विषीदसि। तृतीये चतुर्थे वा दिने श्रीकृष्ण आगत्य अनिरुद्धमुद्धारयिष्यति। अतो निश्चिन्ता स्वस्था भव स्वस्था भव।

सूत्रधार :—एवं सखिवचनेन ऊषा किञ्चित स्वस्था स्थितवती। तदानीं अनिरुद्धमुपागम्य नारद उवाच।

नारद :—हे हे तात अनिरुद्ध, मा शङ्किथाः। श्रीकृष्णो भवन्तं त्रिचतुर्दिने मोचयिष्यति। एष तमहं विज्ञापयितुं शीघ्रं यामि, शीघ्रं यामि।

सूत्रधार :—एवमुक्त्वा नारद आकाशपथा पवनाधिकवेगेन द्वारकां जगाम। तद् दृश्यतां श्रूयतां जयहरगौरी।

## ( गीतम् )

राग—विहागडा।

ताल—एकतालि।

नारदवरगगणपथचारी।
हरिनगरीमनु हरिगुणकारी ॥१५॥
वीणारणितकुतूहलकारी।
पिङ्गजटाहरिणाजिनधारी ॥१६॥

आलोकितकलिकलूषविदारी ।
अविरतपरमानन्दविहारी ॥१७॥
सदसत्शुभाशुभसमसञ्चारी ।
धवलिमहिमगिरिमदविनिवारी ॥१८॥
श्रुपिरयमवतु हरेरवतारी ।
श्रीघिवसिह नरेशममारी ॥१९॥

सूत्रधार :—एवं सपदि श्रीकृष्णमुपागम्य नारद उवाच ।

नारद :—हे हे भगवन् श्रीकृष्ण तव विद्यमानस्य नप्ता अनिरुद्धः शोणितपुरे बाणासुरेण ऊषापहारकारणात् बहुसन्त्याड्य वद्धा रक्षितः। हरि हरि सूर्य्यप्रसादात् कथमयि जीवनं वर्त्तते। अतस्त्वं मोचयितुं शीघ्रं याहि, शीघ्रं याहि ।

सूत्रधार :—एतत् श्रुत्वा क्रोधाग्निना चतुर्द्दशभुवनब्रह्माण्डं दहन्निव जाज्वल्यमानः श्रीकृष्ण उवाच—

कृष्ण :— भो भो यादववीराः, देवर्षिभाषितं शृणुत शृणुत। अहो प्रलयवह्निं तरसा लङ्घयितुं झम्पं करोति। शलभोयं कियान् बाणासुरः। तत् शीघ्रं सज्जा भवत, शोणितपुरं यामः ।

यदुवीरा :—हे हे श्रीकृष्ण, वयं सज्जा एव, उत्तिष्ठामः शोणितनगरमुत्सादयामः ।

सूत्रधार :—ततः सकलयादवसहिते श्रीकृष्णे अस्तव्यस्तं प्रयाणाभिमुखे पुनरपि नारद उवाच ।

नारद :— हे हे श्रीकृष्ण, सम्प्रति गरुडं स्मर, तेन प्रयाणं समुचितम्। तस्य तत्र कार्यं वर्त्तते ।

सूत्रधार :—एतत् श्रुत्वा श्रीकृष्णेन स्मृतमात्रो गरुडस्तत्र मिलितवान्। तं प्रणम्य गरुड उवाच ।

गरुड :— हे हे भगवन् श्रीकृष्ण, किमर्थमहं स्मृतो भवता ? पक्षविक्षेपैः कस्य पुरमुच्चाटयामि, आज्ञापय, आज्ञापय। अहो कोऽयं सपरिवारो यमसदनं यियासति ।

श्रीकृष्ण :—हे हे विनतानन्दन पतगराज गरुड, शोणितनगरे बलगर्वितेन बाणेन मम नप्ता अनिरुद्धो नागपाशेन बद्धा कारानिकारान् प्रापितो वर्त्तते। अतस्तेन युद्धं करिष्यन् एष यामि। अत्र साहाय्यं कुरु, साहाय्यं कुरु ।

गरुड :—हे हे महाप्रभो अहं तवाज्ञाकारी। अतो यथानिदेशं तव करिष्यामि। इति मां सद्य आरुह आरुह ।

सूत्रधार :—एवमुक्तवन्तं गरुडं कण्ठे आलिंग्य अर्घपात्रं हस्ते कृत्वा श्रीकृष्ण उवाच ।

कृष्ण :—हे हे महाभाग गरुड, शत्रुविनाशाय मयादत्त एषोर्घ्यः प्रतिगृह्यताम् ।

सूत्रधार :—एवं गरुडाय अर्घ्यं दत्वा तदुपरि आरुह्य, हयगजरथारूढानां धनुष्टङ्कारेण दशदिशः पूरयतां घनघोरघोषं गर्ज्जतां लक्षकोटिपदातिसहितानां बलभद्रप्रद्युम्नगदसाम्बपुरः-सराणां यादववीराणां समूहेन सहितः श्रीकृष्णो नगर्यां निर्ययौ। एवं गच्छन् एकादशसहस्रयोजनदूरं शोणितपुरं दिनत्रयेण प्राप्तवान्। अथ गगनतलं लेलिह्यानं प्रज्वलितज्वालाजालकरालं विशालं वह्निप्राकारं समासाद्य कृष्णम्प्रति बलभद्र उवाच।

बलभद्र :—हे हे प्राणभ्रातः श्रीकृष्ण, अतीव दुःसहं परितः प्रज्वलितं किमिदं तेजो, यदीयतापेन शरीरमस्माकं कनकवर्णमासीत्।

श्रीकृष्ण :—हे हे आर्य, एष आहवनीयवह्निर्बाणस्य सन्तुष्टः शोणितपुररक्षकः परितो ज्वलन् प्राकारभावं प्राप्तो वर्त्तते।

बलभद्र :—हे हे श्रीकृष्ण, तर्हि यथा अस्माभिर्गन्तुं शक्यते तथा अस्य निर्व्वाणार्थं यतस्व।

सूत्रधार :—ततो बाढमिति बलभद्रवचनमनुमोदमानो गरुडम्प्रति श्रीकृष्ण उवाच।

श्रीकृष्ण :—हे हे पक्षिराज वैनतेय, अस्य वह्निप्राकारस्य निर्व्वापणे उपायं कुरु। यदि भवता न शक्यते तर्हि मया कर्त्तव्य उपायः।

गरुड :—हे हे महाप्रभो, अस्य निर्व्वापणे कियान् प्रयासः। पश्य एतत्क्षणं निर्व्वापयिष्यामि।

सूत्रधार :—एवमुक्त्वा विहङ्गराजश्चञ्चुसहस्रं कृत्वा ऊर्द्ध्वमुड्डीय आकाशगङ्गाजलं चञ्चुभिरानीय वह्निप्राकारोपरि मुहूर्त्तद्वयं ववर्ष। ततः प्राकारभङ्गं दृष्ट्वा तत्प्रवर्त्तका रुद्रा-नुचराः कल्माषकुसुमदहनशोषणतापनपुरःसरा सर्व्वे अग्नयः कोपेन कम्पमाना अस्त्र-शस्त्रपाणयो गरुडसंग्रामे प्रविशन्ति स्म। ततस्तेषां पक्षपाती महाऋषिः शस्त्रास्त्रपाणिः स्वर्गतो अङ्गिरा अवततार। अथ तेन मिलिताः सगर्व्वाः अग्नयः ऊचुः।

अग्नय :—अरे अरे पापपतगाधम, अग्निभिः सह विरोधं कुर्व्वाणः को भवान्, तिष्ठ तिष्ठ। अद्य भवन्तं यमालयं नेष्यामः।

सूत्रधार :—ततो गरुडमाश्वास्य तान् प्रति श्रीकृष्ण उवाच।

श्रीकृष्ण :—रे रे अज्ञाग्नयः, किमिति गर्वं कुरुत। न वयं तृणकाष्ठनिर्मितानि गृहाणि, न च कुशकाशनलवीरणवनानि दग्ध्वा भस्मा कर्त्तव्याः। अपितु जानीत वयं अन्तकान्तकाः। भवतामधुना गर्वं दूरीकरिष्यामः। पश्यामि सम्प्रति मम प्रहारं कथं सहध्वं।

सूत्रधार :—एवं परस्परं प्रवदन्तो युद्धं चक्रुः। ततः अङ्गिराः श्रीकृष्णम्पति त्रिशूलं चिक्षेप। श्रीकृष्णोऽर्द्धचन्द्रबाणैर्मुनेः त्रिशूलं चिच्छेद। ततस्तं बाणेन श्रीकृष्णोऽङ्गिरसं

हृदि विव्याध। तत्प्रहारविद्धः रुधिरलिप्ताङ्गः मुर्च्छितोऽङ्गिरा भूमौ पपात। तस्य तां अवस्थां दृष्ट्वा अन्ये अग्नयः पलायिताः। एवं अग्निगणं विजित्य गच्छन्तं श्रीकृष्णं नारद उवाच।

नारद :— हे हे श्रीकृष्ण, पश्य एतत् शोणितपुरं प्राप्तोऽसि। अत्र भक्तस्य बाणस्य रक्षार्थं गौरीसहितः शङ्करो निवसति।

श्रीकृष्ण :—हे हे गुरो, यदि बाणस्य सहायः शङ्करः आयाति तेन सह यथाशक्ति युद्धं करिष्यामि।

सूत्रधार :—तदनन्तरं ससैन्यः श्रीकृष्णः शोणितपुरद्वारं प्राप्य पाञ्चजन्यं शङ्खं दध्मौ। तदानीं भेरिदुन्दुभिप्रभृतिवादितनानाविधवाद्यशब्दकोलाहलः स्वर्गभुवनं लङ्घयामास। तत् दृश्यतां श्रुयतां भण्यतां जयहरगौरी।

## ( गीतम् )

राग—भाटियाली।

ताल—एकतालि।

बाणपुरे समागतो वनमाली।
बलसोहितो योऽतुलबलशाली ॥२०॥
सहकौमोदकीनन्दकधारी।
विनतानन्दनवाहनचारी ॥२१॥
पीतवसनपरिधानविलासी।
अमृतस्रावीमनोहरहासी ॥२२॥
प्रकृतिविशङ्कटयदुभटसङ्गी।
खलपटलक्षयखेलनरङ्गी ॥२३॥
सह प्रमथेश्वरीनृपमघहारी।
एतमवतु सज्जनहितकारी ॥२४॥

सूत्रधार :—अथ भयोद्विग्ना अस्तव्यस्तं बाणराजमुपागम्य पुरजना ऊचुः।

पुरजना :—हे हे महाराज, सागरसङ्काशं परचक्रमुपागतम्। वह्नि-प्राकारभङ्गेन अङ्गिरसा सहितं अग्निगणं विजित्य नगरमस्माकं प्रविष्टं वर्त्तते। तत् शीघ्रं सावधानो भव, सावधानो भव।

सूत्रधार :—एतत् श्रुत्वा ससम्भ्रमो राजा बाण उवाच।

वाण :—अये मन्त्रीप्रवर कुम्भाण्ड, अद्य अस्माकं दैत्यदानवराक्षससैन्यं यावदस्ति अत्र तावत् सकलं शीघ्रं मिलतु, शीघ्रं मिलतु। एकोऽपि गृहे नावशिष्यताम्।

कुम्भाण्ड :—हे हे महाराज, अस्मदादेशम्बिनैव परचक्रभयोद्भ्रान्तं सत्रसैन्यं उपागतमासीत्। तद्विलम्वं विहाय प्रयाणं कुरु।

सूत्रधार :—ततः सपदि सन्नद्धो धृतास्त्रशस्त्रो दिव्यं रथमास्थाय काककङ्कगृध्रश्येनचिल्लमयूरपेचकसर्पनकुलशूकराश्वश्रृगालव्याघ्रभल्लुकमहिषवराहसिंहगण्डारोष्ट्रहयहस्तिरथनानायानारूढसेनानायकनिकरलक्षकोटिपदातिपरिवृतो दण्डच्छत्रचामरादिभिरुपशोभमानो वाणोराजा युद्धाय निर्जगाम। अथासौ यात्रासमये कलहासक्तं विधवाद्वयं, नीयमानं कतिपयकाष्ठभारं तैलभाण्डं शून्यकुम्भं च शिरः पातं चिकीर्षतः काकगृध्रान, दीर्घरावं मुञ्चतः श्वश्रृगालान् ददर्श। तथापि तान् उत्पातानविगणय्य बलदर्पितः प्रययौ। तत् दृश्यतां श्रूयतां जयहरगौरी।

**नरेश्वरः श्रीशिवसिंहदेवो नरेश्वरी श्रीप्रमथेश्वरीह।**
**इमौ भवानीचरणाम्बुजस्य भृङ्गश्च भृङ्गी च शुभं लभेताम्॥२५॥**

इति श्रीप्रमथेश्वरीप्रियत्तमश्रीश्रीशिवसिंहमहीमहेन्द्रशासितद्विजकविचन्द्रकृतौ श्रीभागवत्-हरिवंशसमुद्धृतकाम-कुमारहरणनामनाटके पञ्चमोऽङ्कः।

# षष्ठोऽङ्कः

सूत्रधार :— घनरवगुरुगर्ज्जद्वीरवर्गाग्रतोऽसौ, रभसमभिधावन् बान्धवो धूमयोनेः।
दशशतभुजदण्डैरायुधानां सहस्रं, निशितमथदधानः प्रापकृष्णं सबाणः ॥१॥

तत उभयबलस्य मेलने परस्परवादितबहुविधवाद्यतुमुलघोषः स्वर्गमाघ्रातवान्। तं श्रुत्वा सचकितं चन्द्रसूर्यवह्निवरुणयमकुवेरनिऋतिप्रमृतिदेवगणेषु सुधर्म्मायां मिलितेषु इन्द्र उवाच।

इन्द्र :— हंहो देवगणाः, श्रूयतां श्रूयताम्। केन कुत्र किं वाद्यं वाद्यते। अहो तत् श्रुत्वा मम हृदि कम्पो जायते। आः मम स्वर्गराज्यमाहर्तुं कोऽपि वीरः समायाति, तत् शीघ्रं यूयं सज्जा भवत, सज्जा भवत।

बृहस्पति :—हे हे देवराज, शङ्कां मा कुरु शङ्कां मा कुरु। श्रीकृष्णः शोणितपुरं आक्रामत्। तत्र तस्य बाणेन सह संग्रामः प्रवर्त्तते। तेनैव कोलाहलः श्रूयते, किञ्च हरिहर-युद्धं मिलित प्रायम्।

इन्द्र :—हे हे गुरो, तर्हि तत् कौतुकविलोकनाय वयमधो अवतरामः।

सूत्रधार :—एवमुक्त्वा सुरगणसहितो देवराजोऽवलम्बमान आसीत्। तदानीं सिद्धगन्धर्व्व-चारणकिन्नरकिम्पुरुषविद्याधरनिकरैर्गगनतलं सङ्कुलमभूत्। तत् दृश्यतां श्रयतां भण्यतां जयहरगौरी।

## ( गीतम् )

राग—गुञ्जरी।

ताल—छुटा।

शुशुभे सुरकुलमतिशयवामम्।
हरिहरसमरनिरीक्षणकामम् ॥२॥
शोणितनगरोपरि समवेतम्।
नभसि मनसि रभसं समुपेतम् ॥३॥
अचलाचलघनघटितविमानम्।
बहुविधभूषण बहुविधभाणम् ॥४॥

निजरिपुपटलापचयनिदानम् ।
हरिजयमविरतमाशंसानम् ॥५॥
नृपशिवसिहमिदं सहकान्तम् ।
अहरहरर्च्चितमवतुनितान्तम् ॥६॥

सूत्रधार :—एवं देवगणे गगने कौतुकं निरीक्षमाने श्रीकृष्णबाणासुरयोः सैन्यानां परस्परं नानास्त्रशस्त्रप्रहारैरति भयङ्करं युद्धं अभुत्। ततो रामः कामः सात्यकिश्च त्रयोवीराः वाणसैन्येषु बहुकदनं कृतवन्तः। अथ तेषां प्रहारं सोढुमपारन्तः वाणसेनागणाः परावृत्य नगरीं प्रवृष्टाः। तानभिधावन्तो यादवभटाः शङ्करमठं प्राप्य तत्र नानोपद्रवं चक्रुः। तद्विलोक्य प्रकुपितः श्रीशङ्कर उवाच ।

शङ्कर :— अये महाकाल, अये भैरव, अये नन्दीश्वर, अये भृङ्गिरिट, चत्वारो यूयं सेनापतयः ससैन्याः शीघ्रं यात शीघ्रं यात। बाणपक्षपातिनो माधवेन सह युद्धं कुरुत ; युष्मत्-सहायो अहमपि सत्त्वरं यामि।

सेनापतय :—हे हे जगदीश्वर, गौरीनाथ प्रयाणं कुरु, प्रयाणं कुरु। एते वयं भवदाज्ञया कृतयात्राः ।

सूत्रधार :—एवमुक्त्वा ते चत्वारः शीघ्रं गत्वा ससैन्याग्रतो युद्धे मिलिताः। ततो गणेश कार्त्तिकेयसहितो वृषभवाहनो भूतप्रेतपिशाचसेनानायकप्रमथयूथपरिवृतः पिनाक-त्रिशूलपाणिः स्वयमपि प्रयाणमकरोत्। तदनन्तरं श्रीकृष्णेन सह शङ्करस्य, सात्यकिना सह वाणस्य, बलभद्रेन सह कुम्भाण्डस्य, गदेन सह कूपकर्णस्य, कामेन सह कार्त्तिकेयस्य, साम्बेन सह गणेशस्य अद्भुत युद्धं अभूत्। अथ शङ्करः पिनाकधनुः टङ्कारं कृत्वां श्रीकृष्णम्प्रति विंशतिशरप्रहारं कृतवान्। श्रीकृष्णः शाङ्ग धनुषा तावन् शरवर्षेण सकलं खण्डं खण्डं चकार। ततः शङ्करस्य शतकोटि प्रमथाः दशदश वाणान् प्रजघ्नुः। शङ्करोऽपि शरकोटिश्चिक्षेप। श्रीकृष्णस्तान् सर्व्वान् त्रिखण्डं त्रिखण्डं चकार। ततः श्रीकृष्ण प्रमथगणान् प्रत्येकं कोटिभिः कोटिभिः शरैः हृदि विव्याध। अथ तान् पलायमानान् विलोक्य प्रकुपितः श्रीशङ्करो अग्निशरं प्रजहार। श्रीकृष्णो वरुणबाणेन तं निर्व्वापयामास। श्रीशङ्करो वायुबाणं प्रजहार, श्रीकृष्णो पर्व्वतबाणेन निराकृतवान्। श्रीशङ्करः त्रिशूलेन पर्व्वतवाणं खण्डं खण्डं चकार। तद्दृष्ट्वा हरिः चक्रं दधारः। तत्क्षणं हरो ज्वरं प्रेरयामास। अथ त्रिशिराः त्रिचरणः षड्भुजो रक्तनवचक्षुः कालकलेवरो ज्वरो ज्वलद्भस्म चिक्षेप। तेन श्रीकृष्णसहिताः सर्व्वे यादवाः शुष्कमुखाः पिपासार्त्ताः पीडितकटिपृष्ठशिरोग्रीवमूर्द्धा विजृम्भमानाश्च कम्पिरे। अथ क्षणेन

चेतनाम्प्राप्य श्रीकृष्णेन विष्णुज्वरे प्रेडिते पलायमानः शिवज्वरः शङ्करं शरणं जगाम। ज्वर उवाच।

शिवज्वर :—हे हे सदाशिव महाप्रभो, मम परित्राणं कुरु, परित्राणं कुरु।

शङ्कर :— अये ज्वर भवान्मया रक्षितुं न शक्यते। अतः शीघ्रं गच्छ, शीघ्रं गच्छ। श्रीकृष्ण-शरणं याहि, शरणं याहि।

सूत्रधार :—एतत् श्रुत्वा सपदि परावृत्य धावन् शिवज्वरो हरिणा शरेण त्रिखण्डीकृत आर्त्तनादं चकार। ज्वर उवाच।

शिवज्वर :—हे हे दीनदयासिन्धो भक्तजनबन्धो श्रीकृष्ण, मम प्राणरक्षां कुरु, प्राण रक्षां कुरु।

सूत्रधार :—एवमादि बहु तुष्टाव। ततः सम्प्रसन्नः श्रीकृष्ण उवाच।

श्रीकृष्ण :—अये ज्वर, मम वरेण त्वं अजरामरो भव। तव मम संवादं यः शृणोति तं नाक्रमिष्यसि।

ज्वर :— हे हे जगदीश्वर श्रीकृष्ण, साधु, साधु शरण्योऽसि यतः तव समानो देयालुर्देवो नास्ति। हे हे महाप्रभो भद्रं भद्रं, तवाज्ञामहं नैव उलङ्घयिष्यामि।

सूत्रधार :—एवमुक्त्वा त्रिमूर्त्तिज्वरो निजभवने जगाम। ततो हरम्प्रति हरिः मोहन-जृम्भन-निद्राबाणत्रयं चिक्षेप। तेन हरो विमुह्य मुहुर्विजृम्भमानो वृषभोपरि सुष्वाप। ततो वृषभं प्रति हरिः शरत्रयं चिक्षेप। तेन हरसहितं वृषभं त्रिप्रहरपथं प्रस्थापयामास। तदानीं साधु साधु इति वदन्तो देवगणा गगनतः श्रीकृष्णशिरसि पुष्पवृष्टिं चक्रुः। तदनन्तरं बलभद्रप्रहारेण कुम्भाण्डः, गदस्य प्रहारेण कूपकर्णः, कामस्य प्रहारेण कार्त्तिकेयः, साम्बस्य प्रहारेण गणेशः पीडिताः पलायाञ्चक्रिरे। ततः एकैकमभिधावन्तं अनुबाणं कुटबाणं शङ्कुबाणं अपरमपि एकोणशतबाणं प्रद्युम्नो यमालयं निनाय। तथा साम्बो बाणस्य पुत्रान् एकावशेषान् चकार। एतस्मिन समये सात्यकिं विहाय साम्बं प्रतिधावन्तं दैत्येन्द्रं बाणं निवारयन् श्रीकृष्ण उवाच।

श्रीकृष्ण :—अरे अरे दानवाधम बाण, विद्यमानं मामपहाय किमिति शिशुं धावसि, अद्य इदं बाहुसहस्रं सफलं कुरु, सफलं कुरु।

बाण :—अये गरुडध्वज द्विबाहो, सहस्रबाहुं मां किमिति विकथ्थसे। आः कालग्रस्तोऽसि। अद्य गृध्राग्रं सुवर्णवर्णं द्रक्ष्यसि। अये दुर्म्मते, शृणु शृणु तावत्। द्वारकागमने आशां विहाय यमगृहाय यातुं सपरिवारः सावधानोभव सावधानोभव।

सूत्रधार :—एतत् श्रुत्वा नारदऋषिः अट्टहासघोषेण घनगर्ज्जितानुकारिणा गगनं पूरयमास। ततः पञ्चशतधनुर्द्धरो बाणः कृष्णश्च परस्परं युयुधतुः, ततो हरिणा रथध्वजे सारथौ च

छिन्ने बाणो मयूरमारुरोह। तदानीं गरुडमयूरयोर्म्महायुद्धं अभूत्। अथ गरुड प्रहारेण मयूरे मुर्च्छिते महादेवदत्तं सिंहयुक्तरथं बाण आरूढवान्। तमास्थाय नानास्त्रशस्त्राणि मुञ्चन्तं बाणं श्रीकृष्णो निजास्त्रशस्त्रप्रहारेण मूर्च्छयामास। तद्‌दृष्ट्वा नारद ऋषिः कक्षास्फोटनं कृत्वा सौधोपरि ननर्त्त। तद्‌दृश्यतां श्रुयतां भण्यतां जयहरगौरी।

## ( गीतम् )

राग—कौ।

ताल—एकतालि।

सुरऋषिरतिशय कौतुकशाली।  
अकुरुत नर्त्तनमपघनचाली ॥७॥  
साधु साधु वचनानुनिगादी।  
जय दामोदर मुहुरितिवादी ॥८॥  
भङ्ग-भङ्गबहुभङ्गीविलासी।  
अनुकृतघनरवशब्दितहासी ॥९॥  
प्रमुदितकक्षाहतिततिकारी।  
उच्चविशालगृहोपरिचारी ॥१०॥  
सह प्रमथेश्वरीगृपणिर्वसिहम्।  
मुनिरयमनिशमवतु नरसिंहम् ॥११॥

सूत्रधार :—अत्रान्तरे असंख्य लक्षकोटिबाणसैन्ये श्रीकृष्णेन हन्यमाने उथ्थिता कवन्धाः शस्त्रास्त्रपाणयः परस्परं युयुधुः। ततो रणस्थलीं गताः मांसशोणिताहारसन्तुष्टाः श्रीकृष्णं प्रति प्रेता ऊचुः।

प्रता :— हे हे वीरवर चिरञ्जीव। तव प्रसादादस्माकं एतावत् भक्ष्यं मिलितम्।

सूत्रधार :—एवमुक्त्वा रुधिरदिग्धाङ्गा अन्त्रनाडीकरचरणमुण्डमण्डिता आनन्दिता ननृतुः। तदानीं कोमलमांसलब्धानां श्वशृगालकाकगृध्राणां महान् कलहमासीत्। एतस्मिन् समये चेतनां प्राप्य बाणासुरः श्रीकृष्णाय ब्रह्मास्त्रं प्रजहार। अथ व्याप्तद्यावापृथिवीतत्तेजोजगदभिभूयज्वलितं विलोक्य श्रीकृष्णः चक्रप्रहारेण ब्रह्मास्त्रं शमयामास। तत पुनरुपागतं चक्रं हस्तेन धृत्वा श्रीकृष्ण उवाच।

श्रीकृष्ण :—अये दुस्मर्ते दनुजाधम बाण, पूर्वकृतं विकथ्थनं कुत्र गतन्ते ? इदानीमपि विकथ्थस्व, अयमस्मि युध्यमानः, साटोपं युद्धं कुरु, पुरुषो भव। अधुनाहं तव बाहुसहस्रसम्भवदर्पं दूरीकरिष्यामि।

सूत्रधार :—एवं वदन्तं श्रीकृष्णं धृतचक्रम्विलोक्य गौरीम्प्रति सम्भ्रमं श्रीशङ्कर उवाच।

शङ्कर :—हे हे प्राणप्रिये गौरि, पश्य मम भक्तोऽयं बाणः श्रीकृष्णेन हन्यते। अत एतस्य रक्षणे उपायं कुरु, उपायं कुरु।

सूत्रधार :—एतत्श्रुत्वा निजाष्टमभागरूपां कोटवीं प्रति देव्युवाच।

देवी— अये कोटवि, शीघ्रं याहि शीघ्रं याहि। श्रीकृष्णं निवार्य्य बाणं रक्ष, बाणं रक्ष।

कोटवी — हे हे मातः गौरी, भद्रं भद्रं एषाहं तवाज्ञां करोमि।

सूत्रधार :—एवमुक्त्वा पवनाधिकवेगा श्रीकृष्णाग्रे गत्वा विवस्त्रा तस्थौ, तां विलोक्य श्रीकृष्ण उवाच।

श्रीकृष्ण :—अये पिङ्गललोचने, रणे बाणरक्षार्थं विवस्त्रा ममाग्रे अवस्थितासि, तथापि बाणमेनं पश्य हन्मि।

कोटवी— हे हे श्रीकृष्ण भवन्तमहं सर्व्वेश्वरं जाने। अस्मदीयभक्तस्य अस्य बाणस्य अभयदानं देहि, अभयदानं देहि। एतं मयादत्तवरं रक्ष रक्ष। मामपि नष्टपुत्रिकां मा कुरु, मा कुरु।

श्रीकृष्ण :—हे हे कोटवि, भद्रं भद्रं एनं रक्षामि, किन्तु अस्य सहस्रबाहुबलदर्पं निराकरिष्यामि। अनेन द्विबाहुनामपि त्वं जीवत्पुत्रीभव।

कोटवी — हे हे सर्वेश्वर श्रीकृष्ण, तुभ्यं रोचमानम् एवं कुरु, एवं कुरु।

सूत्रधार :—ततश्चक्रं सम्बुध्य श्रीकृष्ण उवाच।

श्रीकृष्ण :—हे हे सुदर्शन, एतं युद्धदुर्म्मदं बाणं द्विबाहुं कुरु, द्विबाहुं कुरु।

चक्र :—हे हे महाप्रभो तवाज्ञया तथा करिष्यामि, शीघ्रं मां प्रहर।

सूत्रधार :—ततः श्रीकृष्ण प्रहृतं सहस्रकोटिसूर्य्यप्रज्वलितं तच्चक्रम् अलक्षितमधावत्। सपदि बाणं प्राप्य भ्रामं भ्रामं द्वितयावशिष्टं बाहुसहस्रं चिच्छेद। पुनरपि तच्चक्रं श्रीकृष्णहस्तमाजगाम। ततः कोटवीवाक्येन पलायमानो बाणः शङ्करमाससाद। शङ्करस्तं तथादृष्ट्वा भृशं चुकोप। ततः पुनरपि शूलपाणि-चक्रपाणीयुद्धाभिमुखौ बभुवतुः। तद् श्यतां श्रूयतां भण्यतां जयहरगौरी।

## ( गीतम् )

राग—मालसी।

ताल—छुठा।

हरिहरयुद्धमवर्त्तत घोरम्।
सकलसुरासुरधैर्यविचोरम् ॥१२॥
कम्पितभुवनत्रयमतिचित्रम्।
अभिमुखमुभयोर्दृष्टलवित्रं ॥१३॥
तरलितनिशितत्रिशूलचक्रम्।
भीषितवह्निवरुणयमशक्रम् ॥१४॥
मरणविशङ्काविपुलितशोकम्।
रहितायुधभटविहितविलोकम् ॥१५॥
सह प्रमथेश्वरी-नृपतिमभेदम्।
अमरवरद्वयमवतु सदेदम् ॥१६॥

सूत्रधार :—अथ ससम्भ्रमं पुरन्दरादिदेवगणसहितः समागम्य ब्रह्मा उवाच।

ब्रह्मा :— हे हे जगदीश्वरौ नेदं साधु, नेदं साधु, उपरम्यतां उपरम्यताम्। पश्य युवयोर्विग्रहेन जगत् प्रलयं याति। अहो अभिन्नमूर्त्तौ भवन्तौ किमिति कलहं कुरुताम्।

सूत्रधार :—ततो ब्रह्मनोवाक्येन उपशान्तः शङ्कर उवाच।

शङ्कर :— हे हे श्रीकृष्ण भक्तार्थे मया हठादेवं कृतम्। भवतातु शोभनमेवं कृतम्। इदानीं उपरम्यताम्।

श्रीकृष्ण :—हे हे जगद्गुरो श्रीशङ्कर, भवन्तं अहं नमामि, सर्वापराधं क्षमस्व।

सूत्रधार :—ततो बाणासुरो अनिरुद्धं समर्पयन् श्रीकृष्णं ननाम। तदानीं सहर्षो नारद उवाच।

नारद :— हे हे श्रीकृष्ण, तव प्रसादेन आनन्दविस्तरो मया प्राप्तः। इदानीं ऊषानिरुद्ध-योर्विवाहं सम्पादय। यतो अनयोर्मुखचन्द्रिकाविलोकने मम महत्कौतूहलं वर्त्तते।

श्रीकृष्ण :—हे हे गुरो तर्हि पुरोहितकर्म्मसकलं भवता क्रियताम्।

नारद :— हे हे परमेश्वर पुरोहितकर्म्मसर्व्वमहं करिष्यामि।

सूत्रधार :—तदानीं कुम्भाण्डं प्रति अनिरुद्ध उवाच।

अनिरुद्ध :—हे हे मन्त्रिवर कुम्भाण्ड, मत्पितुः पितृव्याय गदाय तव दुहितरं चित्रलेखां देहि।

कुम्भाण्ड :—ह हे वीरवर कन्दर्प्पकुमार, भद्रं भद्रं भवदाज्ञया तथाहं करोमि।

सूत्रधार :—तदनन्तरं बाणेन कुम्भाण्डमन्त्रिना च विवाहसम्भारे उपस्थापिते सखीगना मङ्गलगीतेन जलमुत्तोल्य तैलहरिद्रादिना गात्रमार्ज्जनं कृत्वा विचित्रवेदिकायां सुवर्णघटसहस्रेण वर-कन्याः स्नापयामास। तत्र मङ्गलगीतं यथा—

## ( मंगल-गीतम् )

### ( १ )

करावे विया ऊयाक
पानी तोले सखीभाक। घोषा
भेल वर रङ्ग बजावे मृदङ्ग
ताल खोल ढोल ढाक।
बजावे खञ्जरि भेरि कालि तोरि
दगर वेणु वीणाक ॥१७॥
दमादम दम बाजे मनोरम
गोमुख शङ्ख तबल।
नाना वाद्य बाजे नाचे नाना भावे
करे नाना कौतूहल ॥१८॥

### ( २ )

चित्रलेखार बिया हैल।
पानी तुलिबाक गैल॥ घोषा
आनन्दित मने सखीगणे घने
उरुलि मङ्गल कैल।
काखे हेमघट । जले फट फट
नदीर निकटे गैल ॥१९॥
शुनि मनोनीत गावे नाना गीत
आनिलेक जल तुलि।
बेद्द फुरावय नोवावय जय
गद अनिरुद्ध बुलि ॥२०॥

( ৩ )

বেহুর চৌপাশে ফুরে লয়লাসে
দুহু বরকন্যা দুহু ।
অনুকূল বিধি ভৈল কার্য্যসিদ্ধি
দেখি হরষিত দুহু ॥২১॥

দুহু বর পাশে বিবিধ বিলাসে
প্রকাশে দুহু সুন্দরী ।
মনত উল্লাস মুখে মৃদুহাস
মোহন মূরতি ধরি ॥২২॥

কনক কিঙ্কিণী কুরঙ্গনয়নী
মাথাত চারু কবরী ।
বিচিত্রবসনী সুচারু দশনী
সুকোমল কলেবরী ॥২৩॥

( ৪ )

এ ঊষাক লমিয়া আনন্দিত হিয়া
অনিরুদ্ধে করে বিয়া ।
নব ঘনশ্যাম তনু অনুপাম
নবরসে বিনোদীয়া ॥২৪॥

বাপর সমান সুবেশ ঠাম
শরীর চারু নিরুজ ।
আজানুলম্বিত ললিত বলিত
মনোহর দুহু ভুজ ॥২৫॥

পরম সুন্দর চন্দ্র পটন্তর
হসিত লসিত মুখ ।
গহন গম্ভীর চলে ধীরে ধীরে
দেখি মিলে মনে সুখ ॥২৬॥

( ৫ )

অনিরুদ্ধ গদ কাষে ।
উষা চিত্রলেখা আছে ॥
আগে দেবঋষি প্রকাশে হরিষি
সখীগণ শোভে পাছে ।

मने महारङ्ग करि अङ्ग भङ्ग
अपेचरागण नाचे ॥२७॥
आछ्य प्रचुर यत सुरासुर
सिठो महत्सव चावे ।
मनत उत्सुक उल्क-मुल्क
तरवर करि चावे ॥२८॥

( ६ )

ए भालारे तोमारे ऊषा भैल कामसिद्धि ।
सपोनर चोर कामर किशोर
हातते मिलाइल विधि ॥२९॥
भाग्य आछा करि सिहेतु सुन्दरी
पाइला हेन रूप पति ।
भालेतो विकली भैला उन्नावली
सपोनत देखि सती ॥३०॥
हेन मनोरम पुरुष उत्तम
आमि देखि शुनि नाय ।
सुन्दर नयन सुन्दर बयन
सुन्दर सकल काय ॥३१॥

( ७ )

ए सखिगण देखा ऊषा चित्रलेखा
अनिरुद्ध गद सङ्गे ।
विभूषित दुइ प्रकाशय दुइ
कुमारी मनत रङ्गे ॥३२॥
चन्द्रर सङ्गत रोहिणी येमत
सूर्यर सङ्गत छाया ।
दुइ वर सङ्गे दुइ कन्या रङ्गे
बिराजय चारु काया ॥३३॥
आति वर धन्या दुइ जना कन्या
धन्य धन्य दुइ वर ।
गद अनिरुद्ध परम सुबद्ध
मनोहर कलेवर ॥३४॥

( ८ )

ए मुनिराइ नारद गोसाइ
ऊषा चित्रलेखार विवाह चाइ।
हाते वीणा वाइ काखर बजाइ
आनन्दरे पार नाइ ॥३५॥

माथात पिङ्गट विराजय जट
गले फटिकर माला।
धौत सवदन्त प्रकट करन्त
पढ़े वेदमन्त्र भाला ॥३६॥

दाड़ि गोम्फचय हाते मोचरय
हरि ध्वनि करे घने।
हासे खलखलि बावे काखतलि
बर कौतूहल मने ॥३७॥

शिवसिंह नाम राजा अनुपाम
महिषी प्रसथेश्वरी।
दुहरो आज्ञा पाइ कविचन्द्र गाइ
मनत आनन्द करि ॥३८॥

सूत्रधार :—ततो नारदऋषिः परिचारकद्वारा तिलकुशादिकमानीय स्वस्तिवाचनं कृत्वा यथाविधिविहितं विवाहकर्म्मानुष्ठानं समापितवान्। ततो बाणपुत्रं निकुम्भं राज्ये अभिषिच्य श्रीकृष्णः सर्वान् सभासदान् विसर्जयामास। श्रीशङ्करश्च पारिषदीकृतेन बाणेन सह निजालयं जगाम। ब्रह्मादयोऽपि स्वं स्वं स्थानं ययुः। श्रीकृष्णश्च ऊषानिरुद्धौ गदचित्रलेखे च गृहीत्वा ससैन्यो द्वारकायां ययौ। तद्दृश्यतां श्रुयतां भण्यतां जयहरगौरी।

( पझटिका )

जय नरनाथनिगमपथपाल।
श्रीशिवसिंहनिखिल खलकाल ॥३९॥
उरसि विशाल हिरण्मयमाल।
चन्दनतिलकशोभितभाल ॥४०॥
चन्द्रचमत्कृतचारुशरीर।
सागरसमतर परम गभीर ॥४१॥

अरिकरिकेशरिविक्रमवीर ।
शान्तदान्तकान्ततरवरधीर ॥४२॥
मणिमयकुण्डलमण्डितगण्ड ।
काञ्चनकङ्कनशुभभुजदण्ड ॥४३॥
रसवशपरयुवतीजनषण्ड ।
गर्व्वितगार्व्वविखण्डनचण्ड ॥४४॥
हरहरदारपदाम्बुजभृङ्ग ।
अधिगतभूपतिहृंहृतिशृङ्ग ॥४५॥
सद्गुणमण्डितपण्डितसङ्ग ।
मदनमनोहरकृतबहुरङ्ग ॥४६॥
जयप्रमथेश्वरीनृपवररमणी ।
सुललिततरतरुणीगणकमनी ॥४७॥
दुखितदुःखपयोनिधितरणि ।
हयगजदोलावैभवसरणि ॥४८॥
या गजराजविराजितगमना ।
सज्जनपालनदुर्ज्जनदमना ॥४९॥
शारदशशधरशोभनवदना ।
सुस्मितजनितनरेश्वरमदना ॥५०॥
कुन्दमुकुलतुलसुन्दरदशना ।
नरवरवाञ्छनकाञ्चनवसना ॥५१॥
मधुरामृतोधिकसुमधुरवचना ।
नरपतिविहितविशेषकरचना ॥५२॥
अमलकमलदलविलसितनयना ।
जनहितचिन्तनहेलितशयना ॥५३॥
हर्षावदेवमनोहरललना ।
सकलकलाकुशलाकुलकमला ॥५४॥
निजजनतासु विपुलतरकरुणा ।
विविधविलासविमोहिततरुणा ॥५५॥
चामरपामररुचिकरचिकुरा ।
सकलसभाजनरञ्जनचतुरा ॥५६॥

श्रीप्रमथेश्वरीधनजतसहिता ।
आधिव्याधिविमङ्गलरहिता ॥५७॥
श्रीशिवसिंहनरेश्वरवनिता ।
जय जय कविचन्द्रद्विजभणिता ॥५८॥

सूत्रधार :— नाटकान्ते मंगलवाक्यम् ।
धन्यः श्रीशिवसिंह एष नृपतिः पुण्यार्जने सम्मतिः ।
धन्या श्रीप्रमथेश्वरीतद्बला नानाकलाकौशला ।
धन्यो भ्रातृगणः पुरोहितजनो धन्या सभाधीमताम् ।
धन्यश्चैषतदीयमन्त्रिनिवहो नदन्तु नित्योत्सवैः ॥५९॥

अपरश्च :— एतद् कुमारहरणं रतिवल्लभस्य यन्नाटकं रचितवान् कविचन्द्रविप्रः ।
तुष्यन्तु तेन सततं परकीयदोषरागोद्भवद्गुणधियः सुधियः समस्ताः ॥६०॥

इति श्रीप्रमथेश्वरीप्रियतमश्रीश्रीशिवसिंहमहीमहेन्द्रशासितद्विजकविचन्द्रकृतौ श्रीभागवत-हरिवंशसमुद्धृतकामकुमारहरणनामनाटके षष्ठोऽङ्कः समाप्तः ।

# विघ्नेशजन्मोदयम्

## प्रथमोऽङ्कः

विष्णुं विष्णुजनावदन्त्यहरहो यद्वै परं पुरुषं,
शाक्ताः शक्तिरिति ब्रुवन्ति परमाज्योतिर्म्मयी निर्गुणा ।
संजल्पन्ति शिवं शिवेशमितरे लोकेशमन्येजना,
एकं वस्तुहि वस्तुतस्तु परमं तं चिन्मयं चिन्तये ॥१॥

अपिच—

यः सृष्टिस्थितिभञ्जनेषु जगतामेकोऽपि मूर्त्तित्रयीम्,
सावित्रीकमलालयागतनयानारीसमालिङ्गिताम् ।
ब्रह्मोपेन्द्रहराभिधानविदितां बिभ्रद्वभौ भास्वतीं,
श्रीश्रीकान्तमनन्तमादिरहितं तं देवमीशं भजे ॥२॥

अपरश्च—

असितसितविकाशं बर्हिबर्हेन्दुचूडं विहगवृषभवाहं श्रीशिवालिङ्गिताङ्गम् ।
मकरभुजगभास्वत् कुण्डलोल्लासिवक्त्रं हरिहरमयदेहं वाञ्छितं नो विधत्ताम् ॥३॥

नान्द्यन्ते सूत्रधारः । अलमति विस्तरेण ॥

अथ भटिमा—

भज हृषिकेशं पुरुषविशेषं हृतमधुकैटभकंसम् ।
भुवनमहेशं मनोहरवेशं प्रकाशितयादववंशम् ॥४॥
वृन्दावनवासं शुचिस्मितहासं पीतवसनपरिधानम् ।
विहङ्गमयानं त्रिभुवनप्राणं सुभाषितमुरलीगानम् ॥५॥
स त्वं जय जय देवकृपामय सकलचराचरपाता ।
देवकीनन्दन देवनिरञ्जन यमलार्ज्जुणमुक्तिदाता ॥६॥

नूतनपयोधर श्यामनोहर हयवकदानवमारी ।
त्रिभुवनकारण पातकितारण निजबलरुक्मिणीहारी ॥७॥
यस्य तव गानं भवसिन्धुत्राणं कुरुते वसुदेवपुत्र ।
तवसम देवाः इहलोके के वा सन्ति कथय देव कुत्र ॥८॥
विषयातिलग्नं भवसिन्धुमग्नं निस्तारय मां दीनबन्धो ।
मयि वरदीने तव भक्तिहीने कुरु कृपां हे कृपासिन्धो ॥९॥
चारु विलक्षण देव सनातन विदूरय मे भवकष्टम् ।
शुद्धनिरामय मामनुकम्पय विषयविषधरदष्टम् ॥१०॥
यदि तव देवं पलायनमेव नवनीतभोजनभिया ।
सततताममसे मदीयमानसे क्रियतां प्रवेशनक्रिया ॥११॥
गोपिकारञ्जन ब्रह्माविमोहन सुरगणपूजितदेव ।
तव गुणगाने सुदर्शनपाणे प्रवेशय मन्मतिमेव ॥१२॥
तव भक्त्युपायं ज्ञानरूपरायं प्रदाय च निर्म्मलभासम् ।
कविसूर्य्यविप्रं नारायण क्षिप्रं कुरु त्वं निजदासदानम् ॥१३॥

अथ सूत्रधारः सभां परिक्रम्य सानन्दं सामाजिकान् प्रत्याह ।

सूत्रधार :— जयति भुवनभर्त्ता सृष्टिपालान्तकर्त्ता, त्रिपुरमदननाशी शैलकैलासवासी ।
वृषभरथविहारी शूलखट्वाङ्गधारी, विषमनयनकालीवल्लभः श्रीकपाली ॥१४॥

पिण्डीकृत्यकपोलभस्मनिचयं हस्तेन पुण्यालयं,
योनिर्म्मायागिरि तदीय शिखरे सम्प्रार्थितो दुर्गया ।
तस्यै प्रोच्य च योगमव्ययफलं पाषाणरूपोऽभवत्,
सोऽयं वोऽतिशयं सदाशिव उमानन्दाख्य आनन्दयेत् ॥१५॥

अथ गद्यम् ,

अनेना मन्दमन्दरान्दोलितमुग्धदुग्धपारावारहिण्डीरपिण्डपाण्डुरयशश्चन्द्रप्रकाशितदिङ्मण्डलेन, अपार-पारावारसंसारसारसकललोकपालकुलचूडामणिमरीचिमञ्जरीनीराजितचरणकमलयुगलेन, समस्तदिक्करिनिकरकर्णतालास्फालविशालवातसम्पातनर्त्तितप्रतापानलेन, समरभीमनिस्सीमपराक्रमातिदुर्दमासंख्य-विपक्षपक्षसीमन्तिनीसीमन्तसिन्दूरदूरोऽसारण-कारणेन, श्रीमतोमानन्ददेवेन विघ्नेशजन्मोदयं नाम नाटकं कर्त्तुमादिष्टोऽस्मि ।

श्रीब्रह्मवैवर्त्तमहापुराणादुद्धृत्य संक्षेपत ईशतुष्ट्यै ।
विघ्नेशजन्मोदयनामनाट्यं निर्म्माति यत्नात् कविसूर्य्यशर्म्मा ॥१६॥

अथैवं तावद् गद्यपद्यगानविनोदिनं सूत्रधारिनं नृत्यन्तं विलोक्य मार्दङ्गिकः पृच्छति ।

मार्दङ्गिक : - अये सूत्रधार, किमद्य प्रस्तुतं भविष्यति ।

सूत्रधार :—अद्य भगवान् गोलोकनाथः पार्वत्या व्रताराधितः प्रीतस्त प्रीतस्तस्यां पुत्रत्वनावततारेत्युत्सवो भविष्यति ।

तच्छ्रुत्वा मार्दङ्गिक आह :—

मार्दङ्गिकः—आः किमहो भाग्यमस्माकं, येन हरेरेतादृशावतारलीलामालोकयिष्यामः ।

इत्युक्त्वा सानन्दं मृदङ्गं वादयति ।

सूत्रधारः—अथ प्रविशति सदारः शङ्करः । तत् पश्यत शृणुत निरन्तरं जय जय रामरामेति वदत ।

## ( गीतम् )

निर्ज्जन विपिनं प्रतिगमनाय प्रविशति सभामध्ये मुण्डमालाधारी ।
तमादाय रतचित्तमुनिगणगुप्तवित्तवृषभपुङ्गवरथचारी ॥१७॥ ध्रं

यत्ते पुरा दैत्यवर परिभूताखिलामर
तेजोराशिभूता विलासिनी ।
दैत्यगणसंहारिणी दक्षस्नेहावतारिणी
सतीनामधेयप्रकाशिनी ॥१८॥

योगेनापमानवती स्वामिनो निन्दया सती
निजकलेवर त्यागवती ।
मेनकाया गर्भजाता सर्वचराचरमाता
शिवविवाहिता भगवती ॥१९॥

गन्धर्वकिन्नरगण सुरासुरसिद्धजन
वन्दितपादपद्मधारिणी ।
संसारसागरवर मग्नमहामूढतर
कविसूर्यद्विजसन्तारिणी ॥२०॥

सूत्रधार :—एवं प्रविश्य सर्वतोऽवलोकयति ।

अथ प्रविश्य भगवान् रमणीरमणोत्सुकः ।
गन्तुमेव मनश्चक्रे नर्म्मदातटिनीतटम् ॥२१॥

सूत्रधार :—अथ सशिवः शिवः सानन्दं नर्म्मदातटं जगाम ।

श्रीराजहंसकलहंसशकुन्तकान्तं पुंस्कोकिलालिकुलमञ्जुलरावबन्तम् ।
नानासुगन्धकुसुमं च वनं सुरम्यं निर्ज्जन्तुनार्म्मदतटं प्रययौ महेशः ॥२२॥

तत्र गत्वा शिवः शिवया सह रेमे ।

शय्यां तत्र सुगन्धचन्दनलसत् पुष्पादिभिश्चर्च्चितां,
कृत्वा दैवसहस्रवत्सरमहोरात्रानभिज्ञः शिवः ।
दुर्गास्पर्शनमात्रवर्द्धितमहाकामेन संमूर्च्छितो,
रेमे चण्डिकया समं निजपतिस्पर्शेण मूर्च्छालसया[१] ॥२३॥

अथैवं तत् शृङ्गारमालोक्य चिन्ताकुलितचित्ता देवा ब्रह्माणं पुरस्कृत्य सर्व्वे नारायणधाम जग्मुः ।

सूत्राधर :—तेच गत्वा तत्र चित्रपुत्तलिका इव तस्थुः । हरिं प्रणम्य ब्रह्मा सर्व्वं वृत्तान्तं कथयामास ।

ब्रह्मा— भो भो भगवन् हरे, दैववर्षसहस्रं रतौ रतो हरो न हि विरमति । तद्विरामे किम्भूतं अपत्यं भविता तत् प्रपन्नानामस्माकं कथय ।

सूत्रधार :—एवमाकर्ण्य हरिः निरीक्ष्य वक्ति । भगवानुवाच ।

भगवान्—हे ब्रह्मन् देवगणाश्च, मया सर्व्वं ज्ञातं, चिन्ता नास्ति । सकलमङ्गलमेव भविष्यति । मदेकशरणानां युष्माकं कुतो दुःखम् ? मद्वचनमाकर्ण्यताम् । यदि पार्व्वत्या उदरे शम्भोर्वीर्यं पतेत्तदा सुरासुरविमर्द्दकमपत्यं भविष्यति । अतो येनोपायेन तद्वीर्यं भूमौ पतति तत् कुरुध्वम् ।

सूत्रधार :—एवं हरिनादिष्टा देवा नर्म्मदातीरं जग्मुः । ब्रह्मा च निजालयं ययौ । तेच तत्र गत्वा सभीतास्तयोरतिमञ्जने परस्परं प्रेपयाञ्चक्रुः । तत्र प्रथमतः शङ्करं तुष्टाव । पुरन्दर उवाच । स्तुतिः ।

पुरन्दर :— तुभ्यं नमोऽस्तु जगदीश जगद्विधात्रे योगेश्वरेश भवभञ्जनभक्तिभाजाम् ।
देवेशदेवपरिचिन्तितयोगधर्म्म ज्ञानेश्वर त्वमिह किं नु करोषि कर्म्म ॥२४॥

सूत्रधार :—इत्युक्त्वा महेन्द्रो जगाम । तत्र सूर्य उवाच । स्तुतिः ।

सूर्य :— निःशेषलोकपरिपालकदेव देव श्रीपार्व्वतीश्वरमहेशनमोनमस्ते ।
योगेश्वरेश परिचिन्तितयोगधर्म्म ज्ञानालय त्वमिह किं नु करोषि कर्म्म ॥२५॥

सूत्रधार :—स्तुत्वैवं सूर्योऽपि ययौ । ततश्चन्द्र उवाच । स्तुतिः ।

---

१ । दुर्गाङ्गस्पर्शमात्रेण मदनान्मूर्च्छितः शिवः ।
मूर्च्छिता सा शिवस्पर्शाद्बुबुधे न दिवानिशम ॥ ब्रः वै. पु. (गणेश ख

चन्द्र :— पुण्यप्रदश्रवणकोर्त्तन भो नमस्ते त्रैलोक्यनाथ भगवन् विलसत्त्रिनेत्र ।
सम्पूर्णकाम परिचिन्तितयोगधर्म्म ज्ञानालय त्वमिह किं नु करोषि कर्म्म ॥२६॥

सूत्रधार :—इत्युक्त्वातिभीतश्चन्द्रो विरराम । ततः पवन उवाच । स्तुतिः ।

पवन :— हे नाथ नाथजगतां जगदेकबन्धो धर्म्मार्थकामपरमोक्षनिदान शम्भो ।
तुभ्यं नमोऽस्तु परिचिन्तितयोगधर्म्म ज्ञानालय त्वमिह किं नु करोषि कर्म्मम् ॥२७॥

सूत्रधार :—इत्येवं स्तुतिमाकर्ण्य शङ्करः श्रृङ्गारं त्यक्तुकामोऽपि पार्व्वतीभयान्न तत्याज । पुनरपि स्तोतुं समुद्यतानातिभीतान् देवान् दृष्ट्वा दयार्द्रचित्तो लज्जितश्च हरः सुखसम्भोगेन समं कण्ठलग्नां पार्व्वतीं विजहौ । ततः उत्तिष्ठतो भगवतो वीर्यं भूमौ पपात । तत्र कार्त्तिकेयो बभूव । तत्कथां पश्चात् कथयिष्यामि । अथ रतिं परित्यज्य शिवः पुरतः स्थितान् देवान् अवलोक्य वक्ति । शिव उवाच ।

शिव :—अये देवगणाः, युष्माकं दुर्गातिरुष्टा । यूयं तूर्णमितः पलायध्वम् ।

सूत्रधार :—एवमाकर्ण्यातिभीता देवाः सर्वे पलायिताः । हरोऽपि देव्याभीतश्चकम्पे । अथ शय्याया उत्थायातिरुष्टा दुर्गा देवानावलोक्य समुत्थितं कोपाग्निं स्तम्भयित्वा तान् शशाप । देव्युवाच ।

देवी :—अतः प्रभृति देवगणाः व्यर्थवीर्याः भवन्तु ।

सूत्रधार :—इत्येवं शप्त्वा क्रोधारक्तनयना नम्रवदना शोकाकुला सतीपार्वती स्थितवती । इत्येवं दुःखितामालोक्य देवीं स्ववक्षसि संस्थाप्य भीतो हरः सुमधुरं वचो वक्ति ।

## ( गीतम् )

शङ्कर :— अयि प्राणकान्ते प्रिये मामनन्ते मनोवाञ्छितन्ते वद त्वं सुरूपे ।
गिरिश्रेष्ठकन्ये कुलस्त्रीषु धन्ये करिष्यामि किन्ते ममप्राणरूपे ॥२८॥
प्रसन्ना भवानागमो मे वतो मे ममाज्ञातदोषप्रशान्तिं कुरु त्वम् ।
असाध्यञ्च किम्वावयोरस्ति लोके त्रिलोकेश्वरोऽहं त्रिलोकेश्वरी त्वम् ॥२९॥
क्षुधा त्वं तृषा त्वं जगद्बीजरूपा दया त्वं क्षमा त्वं मणीषा स्वरूपा ।
जगद्धेतुभूता जगन्मातृमाता कथं रोषयुक्ता मदेकानुरक्ता ॥३०॥
शिवोऽहं समेतस्त्वया सर्वभद्र-प्रदाता विनात्वां शवप्राय एव ।
भवानी ह्यवानीमिदानीं वद त्वं स्फुरद्धासपूर्वामपूर्वायताक्षि ॥३१॥

हे प्रिये, त्वत् कोपगोचरीभूतं मृतं मां शवं सस्मितवचसा सञ्जीवय ।

सूत्रधार :—श्रुत्वैवं देवीसन्तप्तहृदया सुमधुरवाचा वक्ति । देव्युवाच ।

## ( गीतम् )

लेछारी ।

देवी— कथयामि किं त्वामात्मराम सर्वरूपिदेव पूर्णकाम
शरीरिशरीरेष्ववस्थित ज्ञानालय ।
मनो मनोरथा विज्ञातारं कथयेदबलाप्रियवरम्
कथयामि किन्ते हृदयज्ञ कृपामय ॥३२॥
नारीलज्जाजन्मबीजमेव योषितामवाच्यमपिदेव
स्वगोप्यं तथापि कथयामि महेश्वर ।
नारीसुखमध्येषु पदेषु पुरुषेण सता विजनेषु
रतिभोग एव परमसुखमीश्वर ॥३३॥
रतिभङ्गजातदुःख सम- मस्ति न योषितां मनोरम
दुःखमतिशोकः स्वामिविरहत एव ।
कृष्णपक्षे दिने दिने यथा क्षीयमाणश्चन्द्र एव तथा
क्षीयमाणा सती पतिं विना देवदेव[२] ॥३४॥
चिन्ताज्वररोगो निखिलानां दयितविरहो वनितानां
वस्त्राणामातपो मैथुनमश्वानामेव ।
दुःखमेकं रतिप्रभञ्जनं द्वितीयञ्च वीर्यप्रपातनं
तृतीयञ्च दुःखतरमपुत्रता देव ॥३५॥

भो भो भगवन्, नाथ, त्रैलोक्यकान्तं पतिं प्राप्य पुन्नामनरकत्राणोपायीभूतं सुतं नाहं प्राप्ता, किमुपायं करिष्यामि कथय ।

सूत्रधार :—इत्युक्त्वा देवी नम्रवदना बभूव । एवं शिवया प्रार्थितः शिवः प्रहस्य शिवां सम्बुध्य वदति । शिव उवाच ।

शिव :—शृणु तावत् प्रिये, शतरूपानाम्नी मनोः पत्नी, साचापुत्रासीत् । ब्रह्मणोपदिष्टं वर्षैकसाध्यं सुपुण्यकव्रतं कृत्वा प्रियव्रतोत्तानपादौ पुत्रौ सा लेभे । तत्पश्चादेवं देवहुत्यादयोऽनेकाः सुन्दर्यो व्रतमिदं कृत्वा सर्व एव पुत्रान् लेभिरे । त्वमपि हरिमन्त्रमुपादाय पुत्रकामा व्रतं कुरु ।

---

२ । कृष्णपक्षे यथाचन्द्रः क्षीयमाणो दिने दिने । तथाकान्तं विना कान्ता क्षीणा कान्त क्षणे क्षणे । चिन्ताज्वरश्च सर्वेषामुपतापश्च वाससाम्, । साध्वीनां कान्तविच्छेदस्तुरगानां च मैथुनम् । रतिभङ्गोदुःखमेकं द्वितीयं वीर्य्यपातनम् । दुःखातिरेकि दुःखं च तृतीयमनपत्यता ॥
ब्र. वै. पु. (गणेश खण्ड) २।२४-२५

सूत्रधार :—इत्युक्त्वा देव्यासह शङ्करो गङ्गातीरं गत्वा सस्तवकवचं हरिमन्त्रं तस्यै प्रदाय व्रतविधानद्रव्यसमयनियमपुरोहितादिकं सर्वं कथयामास। शिव उवाच।

शिव :— हे प्रिये, मत्समानं सनत्कुमारं पुरोहितमादाय पण्मासहविष्यान्न, पञ्चमास फलादि, पक्षहविः पक्षजलभोजननियमात्मक व्रतारम्भं माघ शुक्लत्रयोदश्यां विधाय प्रतिदिनं षोडशोपचारादिना श्रीकृष्णं सम्पूज्य आज्यतिलैर्हुत्वा पूर्णहोमादिना व्रतं समाप्य विप्रेभ्यः समोज्यादि दक्षिणां दास्यसि।

सूत्रधार :—इत्यादिकमुक्त्वा हरस्तपसे जगाम।

ययौ परानन्दयुतः परं परामधिष्ठितो मूर्त्तिमशेषपूजिताम्।
स्मरन् वहिश्चान्तरतो हरो हरिं तपोविधाता तपसे तपोनिधिः ॥३६॥

सूत्रधार :—अथातिहर्षकारिणी भवानी किङ्करद्वारा सर्व्वानि व्रतयोग्यद्रव्याणि आनीय व्रतं कर्त्तुं समारेभे। अथ सनत्कुमारो विधेःसुतः ब्रह्मतेजसा प्रज्वलन् आजगाम।

सनत्कुमारोभगवान् वेदवेदाङ्गपारगः।
समायाति विधेःपुत्रः प्रज्ज्वलन् ब्रह्मतेजसा[१] ॥३७॥

सूत्रधार :—एवमागत्य स स्तत्रस्थितवान्। तदाकृष्टो ब्रह्मा समार्यं आयातः। पुरन्दरोऽपि-अतित्रस्त आयातः। एतस्मिन्नन्तरे विष्णुरायाति।

सरत्नयानेन सरत्नभूषणः सपार्षदो नूत्न-पयोद भास्वरः।
विलासिताङ्गोवनमालया श्रिया समं समायाति समुद्रमन्दिरः ॥३८॥

सूत्रधार :—एवं प्रविश्य स तत्रस्थितः। ततः सनकसनन्दसनातनकपिलयति-सुमति पुलस्त्यवशिष्ठादयो वहवो मुनयः सानुगा आगताः। ततश्च नरनारायणौ समायातौ। ततो दिक्पालदेवयक्षगन्धर्व्वकिन्नराः सगनाः पर्व्वतगणाश्च समागताः। अथ गजवाजिगोशत नानामाणिक्यरत्नादीन्यमादाय सदारः सानुचरः शैलेश्वरः समायाति।

समायाति गिरिश्रेष्ठो रत्नभूषणभूषितः।
महासम्भृतसम्भारो नाना द्रव्यसमन्वितः ॥३९॥

सूत्रधार :—एवमागत्य तत्रस्थितः। ततोविप्रा भिक्षवो वन्दिनो नागाश्चागताः। ततो

---

१। सनत्कुमारो भगवानाजगाम विधेः सुतः।
मूर्त्तिमांस्तेजसां राशिः प्रज्वलन् ब्रह्मतेजसा ॥ ब्र. वै. पु. (गणेश) ६।१०

विद्याधरादयो नाना वाद्यभाण्डसहिता आजग्मुः। एवं तानागतानालोक्य समुत्थाय हरः सिंहासनादीनि प्रदाय स्वागतादिना पूजयति स्म।

अथ देवर्षिगणपूर्णायां सभायां ब्रह्मादिष्टो हरो भक्त्या पुटाञ्जलिः श्रीहरिं वदति।

समुद्रसिंहासनवासवन्तं विद्याधरीनृत्यं विलोकयन्तम्।
गन्धर्वगीतं श्रुतवन्तमेवं देवं शुभं शम्भुरुवाच वाचम् ॥४०॥

शङ्करः—
हे हे देवनारायण धवल चामरघन
सान्दोलनपर भक्तजन-
शुद्धभावसेव्यमान पीतवस्त्रपरिधान
तपोयज्ञपूजाव्रतगण-
फलरूप दामोदर वाञ्छाकल्पतरुवर
शृणु मम प्रार्थनं सम्प्रति।
महामाया हैमवती पुत्रार्थिनी देवीसती
व्रतं कर्तुं पुण्यकमिच्छति ॥४२॥
इन्द्रमुख्यदेवव्रात- रतिभङ्गकृतजात
शोकवरसन्तप्तहृदया।
मदाननविनिसृत विविधवचनामृत
प्रबोधिता मतिव्रता मया ॥४३॥
मदीय निन्दया सती निजदेह त्यागवती
शैलगेहे पुनर्जाताशेष।
वृत्तान्तविज्ञातुस्तव वदामि किं लक्ष्मीधव
शुभामाज्ञां वद भुवनेश ॥४४॥
नारीरूपं मोहवीज- मेव कामदेवनिज-
शस्त्रं, मोक्षद्वारकपाटकम्।
अहङ्कारदोषालयं वैराग्यविनाशाश्रयं
हरिभक्तिविरोधकारकम् ॥४५॥
कामवृद्धिसुकारणं रागवरविवर्द्धनं
तपस्विनामपि मोहकरम्।
संसारबन्धनपाशः चञ्चलस्वभावबाणः—
रूपं सर्वं निवेदितम् परम् ॥४६॥

भो भो भगवन् हरे, मया त्वयि सर्वं निवेदितम्; यद् भद्रं तत् कथय।

सूत्रधार :—इत्युक्त्वा हरो ब्रह्मणोमुखमालोक्य स्थितः। एवमाकर्ण्य हरिः प्रहस्य वदति। हरिरुवाच।

हरि :— हे हर, तव पत्ना सन्तानार्थं राजसूयसहस्रसमं पुण्यकव्रतं कर्त्तुमिच्छति। करोतु, व्रतप्रभावाद् गोलोकनाथः स्वयं पुत्रो भविष्यति।

सूत्रधार :—एवमाकर्ण्य हृष्टमानसो महेशो देवीं प्रतिवक्ति। शिव उवाच।

शिव :—भो भो भवानि, मद्वाणी श्रूयतां! शुभेऽस्मिन् काले व्रतारम्भं कुरु।

सूत्रधार :—अथ शिवेनादिष्टा शिवा हृष्टमनसा सुस्नातधौतवाससी परिधाय पूजामण्डपं प्रविश्य कृतनित्यक्रिया स्थितवती। तत्र सनत्कुमारो वस्त्रलङ्कारादिभिवृतो विधिमादाय पठति। यजमानो वाद्यवादनमङ्गलपूर्व्वकं ब्राह्मणान् स्वस्तिवाचयित्वा माल्यवस्त्रादिशोभितं रत्नघटं संस्थाप्य तत्रदेवपञ्चकं नवग्रहदशदिक्पालांश्च सम्पूज्य संकल्पं करोति। तद् यथा—अद्यत्यादि पार्व्वतीदेवी पुत्रप्राप्तिकामा पुण्यकव्रतमहं करिष्ये। इति संकल्प्य तत्रघटे श्रीकृष्णमावाह्य षोडशोपचारादिना सम्पूज्य घृताक्ततिलहोमं कुर्य्यादिति विध्यनुसारेण सनत्कुमारो देवीं याजयति स्म। तदानीं सामगानेन ब्राह्मणाः वेदान् उच्चैर्जगुः। मन्त्रो यथा।

मन्त्रः—सूर्याचन्द्रमसौ विष्णुरुद्रावश्विनौ वैश्वानरो मरुतो मरुत्वानपांपतिः प्रजापतिर्य्द्विभूतय, आहुत्या तृप्तः समायच्छताम् यजमानाया देव्याः पुत्रमिति॥

अपरो मन्त्रः—आदित्यः सोमो भौमः सौम्यो बृहस्पतिः भार्गवोमन्दोराहुः केतवश्च यष्टृभिरिज्यमाना कामदाभूता यो हविषा सतृप्तो यजमानाया देव्याः पुत्रं जनयताम्॥

अपरो मन्त्रः—यच्छतां स यन्मनसश्चन्द्रमा अजायत, चक्षुर्षोभास्वानजायत श्रोत्रयोनभस्वानभवन् मुखादग्निरजायताहुतिभिः तृप्तो यजमानाया देव्याः पुत्रमिति।

सूत्रधार :—एवं ब्रूते यत् यत् कर्त्तव्यं तत् सर्वं वत्सरैकं यावत् प्रत्यहं देवो चकार। ततो व्रतान्तदिने कुमारो देवीं प्रति वक्ति। कुमार उवाच।

कुमार :—भो भवानि, व्रते ते पतिर्दक्षिणा दीयताम्[४]। एवमाकर्ण्य देवी विललाप।

देवी— स्वपुत्रप्राप्तिकामनया सुपुण्यकनाम व्रतं मया
निजस्वामिनिदेशत अनुष्ठितमेव।
कृतं रत्नमुख्यनानादान- मिहतु तथापि मम प्राण-
दयितदक्षिणा पुरोहितार्थिता देव ॥४७॥

---

४। समाप्ति दिवसे विप्रस्तामुवाच पुरोहितः।
सुव्रते सुव्रते मह्यं देहित्वं पतिदक्षिणाम्॥ (गणेश खण्ड ७।१५)

हा हा प्राणनाथ त्रिलोचन त्वया विना मम नजीवन-
मन्तकसमानं व्रतमिदमेव जाने ।
पुरोहितवाक्यस्मरणतः प्राणइतोमम शरीरतः
निश्चितमिह तु प्रसरति व्रतस्थाने ॥४८॥

हा । हतास्मि ।

सूत्रधार :—इत्यादि बहुशो विलप्य संमूर्च्छितां तां बोधयितुं ब्रह्मादिभिरादिष्टः शिवः स्वाङ्के संस्थाप्य मधुरवचोभिः सचेतनीकृत्य वक्ति । शिव उवाच ।

शिव :—हे प्रिये, कर्म्मनां सारभूतादक्षिणा, तद्धीनं कर्म निष्फलं नरकप्रदम् । अतो विप्राय अवश्यं देया । मुहूर्त्तातीते दक्षिणा द्विगुणाभवेत् । वत्सरातीते कर्म निष्फलं जायते । ततश्च धर्मो नष्टो भवेदिति ।

सूत्रधार :—ततो हरिविरिञ्च्यादय ऊचुः ।

हरिविरिञ्च्यादय :—भो भवानि, विप्राय पतिदक्षिणां प्रदाय पूणहोमं कृत्वा स्वधर्मं रक्ष । अस्मासुपस्थितेषु किमभद्रं भविष्यति ?

सूत्रधार :—एवमाकर्ण्य देव्युवाच ।

देवी— भो भो देवेशाः, मद्वचनानि श्रयन्ताम् । यत्रतु भर्त्ता दक्षिणा तेन कर्म्मणा दक्षिणया पुत्रेण वा किम ? कारणे गते कुतः कार्यम् ? स्वच्छया प्राणास्त्यक्ताः देहैः किम् ? दृष्टिहीनस्य चक्षूषा किं प्रयोजनन् ? पतिमूलः पुत्रः, मूले नष्टे वाणिज्यं निष्फलं स्यादेव ।

सूत्रधार :—इत्यादि नानासम्बादो धर्मादिदेवैः सह देव्या कृतः । एतस्मिन्नन्तरे रत्नालङ्कृत-वनमालाशोभितश्यामचतुर्भुजपार्षदपरिवृतरत्नरथमाकाशे सर्व्वे ददृशुः । तस्माद्रथादवरुह्य श्रीविष्णुः समास्थलमाजगाम ।

लक्ष्मीपूर्वसरस्वतीनिजपतिः कन्दर्पकोटिस्फुरन् ।
नीलाभः परिपूर्णकोटिशशभृत्तुल्यप्रभः सुप्रभः ।
ब्रह्मादित्रिदशैरुपासनवशैरेकान्तसन्तोषितः,
शङ्खचक्रगदाम्बुजं निजकरैर्विभ्रत् सभामाययौ ॥४९॥

सूत्रधार :—एवं प्रविश्य सिंहासनमारुह्य स्थितोभक्त्या ब्रह्मादिभिः स्तुतोऽच्युतो भगवान् देवीं प्रति वदति । श्रीभगवानुवाच ।

भगवान्—हे शक्तिबुद्धिस्वरुपे, त्वयासमेता जीविनो बुद्धिशक्तिमन्तः ब्रह्मादितृणपर्य्यन्तं जगदाद्यायाः प्रकृतेस्तत्त्वीभूतं स्वयं व्रतफलदात्र्यास्तवव्रताचरणं लोकशिक्षार्थम् । पुनश्चाकर्ण्यताम्, पत्नीं दातुं स्वामी शक्तो यथा तथा सापि स्वामिनं दातुं शक्नोति ।

श्रुतिमतमवलम्ब्य पतिदक्षिणां प्रदाय व्रतपूर्णं कुरु। पुनश्च गोमूल्यं दत्वा स्वामिनं गृहान।

सूत्रधार :—इत्यादिकं सयुक्तिकं बहूक्त्वा भगवानन्तर्दधौ। तथैवं श्रुत्वा हृष्टा देवी स्वामिदक्षिणां विप्राय ददौ। कुमारः स्वस्तीत्युक्त्वा शिवदक्षिणामाददौ। ततो अतिभीता कृताञ्जलिर्देवी विप्रं प्रति वक्ति।

देवी— भो मुने, तुभ्यं गोलक्षं प्रयच्छामि, स्वामिनं देहि।

सूत्रधार :—एवमाकर्ण्य कुमार उवाच।

कुमार :—भो भवानि, विप्रस्य मे गोलक्षेण किं प्रयोजनम्? दिगम्बरं पुरस्कृत्य भुवनत्रयं भ्रमिष्यामि।

सूत्रधार :—इत्युक्त्वा कुमारः शङ्करं स्वाभ्यासे वासयामास। एवमालोक्य देवी नाभीष्टो देवो दृष्टः व्रतफलञ्च नाप्तमित्येवं विचिन्त्य शरीरं त्यक्तुमुद्यमं चक्रे। एतस्मिन्नन्तरे कोटिसूर्यदीप्तिकरं तेजसां निकरं परमाकाशे सर्व्वे ददृशुः। एवमालोक्य धौत वस्त्रा ज्वलदग्निस्वरूपा तेजोमयी शिवप्रेरिता शिवा तेजोरूपं परमात्मानं तुष्टाव।

## मुक्तावली

कृष्णनारायण देवसनातन त्रैलोक्यकारण संसारतारण ए
जानासि त्वमेव मादृशमुत्तमवेश।
नवघनश्याम जगदभिराम कोटिसूर्यधाम परिपूर्णकाम ए
न ज्ञातुमीश्वरी त्वामहं च हृषीकेश ॥५०॥
शङ्खचक्रवर गदापद्मधर धृतपीताम्बर सूक्ष्मसूक्ष्मतर ए
वेदावेदकृतो वेदज्ञा जानान्ति केवा।
कमलविलास सदास्मितहास मञ्जुलप्रकाश वैकुण्ठनिवास ए
अंशकलादिभिरज्ञाता त्वदीयसेवा ॥५१॥
निराकार भयहर निराश्रय निर्गुण सदय जगतमालय ए
निजतत्त्वं वेत्सि त्वमेव देवतादेव।
सततमुज्ज्वलमकरकुण्डल चारुगण्डस्थलवदनमण्डल ए
किमन्ये विज्ञातुं भवन्तमीश्वरा एव ॥५२॥
अनादिमध्यान्तं चतुर्भुजशान्तं दुर्जनकृतान्तं केचिल्लक्ष्मीकान्तं ए
ध्यायन्ति मानसे योगिन एव सर्वदा।
द्विभुजसुन्दरं गोपाङ्गनावरं गोपवेशधरं गोपीमनोहरं ए
केचिद्द्विजजना भजन्ते भवन्तं सदा ॥५३॥

देवी— भो भो भगवन् हरे, पुत्रहीना दुःखिताहं स्वामिदानेन शोकार्त्ता त्वां स्तौमि, भवद्विधं पुत्रं लब्धुमिच्छामि। हे दीनबन्धो कृपासिन्धो मम कृपां कुरु।

सूत्रधार :—एवमाकर्ण्य दयार्द्रचित्तो भगवान् दुर्ल्लभस्वरूपं दर्शयामास।

नवाम्बुजाभं शिखिबद्धचूडकं सगोपिकं वंशधरं किशोरकम्।
सपीतवस्त्रं शुचिचन्दनाङ्कितं ददर्शदेवी वनमालयान्वितम् ॥५४॥

सूत्रधार :—एवमालोक्य देवी तदनुरूपं पुत्रं मनसा वरयामास। ततो देव्यै एतद्वरं प्रदाय भगवानन्तर्दधौ। ततो देवा सर्व्वे कुमारं बोधयित्वा शिवायै शिवं ददुः। अथातिहृष्टा शिवा विप्रादिभ्यो नाना दानानि प्रदाय विप्रादीन् भोजयायास। ततः शिवा शिवं सम्पूज्य दुन्दुभिमृदङ्गादिवादनपूर्वकं गीतं गापयामास।

## ( गीतम् )

जय जय हरे देव चतुर्भुज सनातन।
गोपाल गोविन्द वनमालि जनार्द्दन ॥५५॥ ध्रुं
कृष्णविष्णो हृषीकेशत्रिजगदीश्वर,
माधव केशव पीताम्बर दामोदर।
वैकुण्ठ गरुडध्वज रामनिरञ्जन,
शङ्खचक्रगदापद्मधर नारायण ॥५६॥

सूत्रधार :—एवं व्रतं समाप्य शिवा शिवेन समं सोपकरणमन्नं भुक्त्वा कर्पूरादि सुवासितं ताम्बूलं भुंक्ते स्म। ततः कैलासस्यैकदेशे नन्दनसंज्ञकवने भ्रमरध्वन्यादियुक्ते पुष्पचन्दनाद्यन्वितां पयफेननिभां शय्यां निर्म्माय तत्र दुर्गा स्वामिना सह सुप्त्वा सानन्दं विजहार। ततो रेतः पतनकाले विष्णुर्वृद्धविप्ररूपं विधाय दण्डमालम्ब्य रतिमन्दिरद्वारं गत्वा वक्ति। विप्र उवाच।

विप्र :—हे महादेव, किं करोषि ? हे मातरुत्तिष्ठ, क्षुधा-पीडितं वृद्धं मां पश्य, ससुवासित-जलमन्नं प्रयच्छ ; शरनागतं मां परिपालय।

सूत्रधार :—अथैवमाकर्ण्य सशिवा शिवा द्वारमागत्य वदति।

देवी— हे विप्र कुत आगतोऽसि ? किं भोक्तुमिच्छसि ? मज्जन्म सफलं कुरु येनातिथिः पूजितस्तेन त्रिजगत् पूजितम्। अतो मे त्रिजगत्पूजनफलं देहि।

सूत्रधार :—इत्यादिकं सयुक्तिकं देवीवाक्यमाकर्ण्य विप्रो वक्ति।

विप्र :—हे मातस्तव पुत्रोहं, क्षुत्तृष्णापीडितः शरणागतः पिष्टकादिनानामिष्टान्नं भोक्तुमागतः,

यद्भुक्त्वा मे लम्बोदरं भवेत् तत् सर्वं दास्यसि। श्रीकृष्णः प्रतिकल्पं गणेशरूपेण तवात्मजो भविष्यति।

सूत्रधार :—इत्यादिकमुक्त्वा विप्रोऽन्तर्द्धाय बालस्वरूपं विधाय गत्वा देव्यास्तल्पे पतित शिववीर्य्ये मिश्रीभूय प्रसूतबालक इव गेहशिखरमवलोक्य शेते स्म[५]।

अथ कविरङ्कस्यान्ते श्रीहरिं स्तुवन् सामाजिकानाशास्ते।

प्रणमामि हरिं खगराजगतिं गतिगर्हितकुञ्जरवृन्दपतिम्।
पतिताकरतारणनामवरं वरकर्णरसायनदिव्यगिरम् ॥५७॥

गिरिजाचरितव्रततोषपरं परमं गणनायकरूपधरम्।
धरणीधरराजसुतावरदं रदनाग्रधरोद्धरहर्षकरम् ॥५८॥

करमण्डनकङ्कनदीप्तिकरं करचक्रसुसेवकभीतिहरम्।
हरमोहकरं परमार्थकविं कविसूर्यधरामरभद्रकरम् ॥५९॥

यज्ञध्वंसरुषा मरुत्वति मरुद्व्राग्रमभिवर्षति,
त्रस्यद्गोकुलगोपतिप्रभृतिकाल्लोकां सगोपं मुदा।
उत्पाट्यैककरेण भूधरवरं गोवर्द्धनं लीलया,
योऽबिभ्रत् सदयस्तदाहृतभयः पायात् स वो केशवः ॥६०॥

गौरीकान्तनिजाभिधानविदितो विप्राद् य आदत्तवान्,
नामश्रीकविसूर्य्य इत्यपरमानन्दायनो ब्राह्मणः।
भारद्वाज-पवित्रगोत्रजनिना विघ्नेशजन्मोदये,
नाटे तेन मनीषिणा विरचिते पूर्वोऽयमङ्को गतः ॥६१॥

---

५। तल्पस्ये शिववीर्ये च मिश्रितः च बभूव ह।
ददर्श गेहशिखरं प्रसूते बालको यथा॥ ८।८४

# द्वितीयोऽङ्कः

यो देव्या व्रततोषितोऽसितवपुर्गोलोकतोऽप्यागतो,
भक्तानुग्रहविग्रहामरवरो गोपाङ्गनावल्लभः ।
जातो योषिति शूलिनो निजशिरश्छेदात् शनैर्दृष्टितः,
श्रीनारायणयोजितोऽभवदनन्तं देवमीशं भजे ॥१॥

किञ्च— कान्ता यस्य धराधरेन्द्रतनया पाशत्रिशूले करे,
भस्माङ्गेषु विराजते कटितटे व्याघ्राजिनाच्छादनम् ।
यन्मौलौ विमला पवित्रकमलागङ्गातरङ्गोज्ज्वला,
तं नित्यं भजतां सतां भवभयाभावं भवं भावये ॥२॥

अपि च— या पुण्यकव्रतसमाचरणेन पुत्रं नारायणं कमलपत्रविशालनेत्रम् ।
लेभे सुदुर्ल्लभमनन्तमनादिमीशं तां पार्व्वतीं भगवतीं महतीं नमामि ॥३॥

अथ तिरोहिते भूते विप्ररूपे जनार्द्दने ।
ब्राह्मणान्वेषणं कृत्वा बभ्राम स्वामिना शिवा ॥४॥

सूत्रधार :—अथैवं देवी विप्रं नावलोक्य वक्ति ।

देवी— अयि वृद्ध विप्र पुण्यहर कुत्र गतोऽसि भो क्षुधातुर
प्रदाय दर्शनं रक्ष रक्ष मम प्राणम् ।
शिवसमुत्तिष्ठ शीघ्रमेव ब्राह्मणान्वेषणं कुरु देव
अतिथिमानीय कुरु मम प्राणत्राणम् ॥५॥

गृहिजनेनापूजितो हर तृषाक्षुधातुरो महेश्वर
पराङ्मुखातिथिर्यस्य गृहादपयाति ।
तस्यापिजीवनं वृथा देव तेनदत्तं देवो बलिमेव
तथा पितृगणः पिण्डजलं न गृह्णाति ॥६॥

हा ! हतास्मि । हे प्राणनाथ विप्रान्वेषणं कुरु, मम प्राणान् रक्ष ।

सूत्रधार :—एतस्मिन्नन्तरे आकाशवाणी बभूव ।

आकाशवाणी— मातः शान्ता भव विलपसि त्वं न नायं क्षुधार्त्तो,
विप्रः पश्य व्रततरुफलं मन्दिरे तं स्वपुत्रम् ।
कल्पे-कल्पे विधिहरिहराश्चित्ततो भावयन्ते,
यं यस्यापेऽखिलशुमनसां पूजनं विघ्ननिघ्नम्[६] ॥७॥

हे देवि, गृहं गत्वा परिपूर्णतमं ज्योतीरूपं गोलोकनाथं सनातनं स्वपुत्रं पश्य।

सूत्रधार :—इत्येवमाकाशवाणीं आकर्ण्य गृहं गत्वा देवी शयानं बालकं ददर्श।

उमेतिशब्दं मुहुरुक्तवन्तं स्तनार्थिनं बालकमारुदन्तम् ।
तल्पं शयानं शतचन्द्रतुल्य प्रभं शुभं तत्र ददर्श देवी ॥८॥

सूत्रधार :—इत्येवम्भूतमद्भुतरूपं बालकं दृष्ट्वा देवी शिवमुपगम्य गीतेन वक्ति। देव्युवाच—

## ( गीतम् )

देवी— मन्दिरमागत्यनाथ पश्य सनातनम्,
पुन्नामनरकत्राणकारणनन्दनम् ।
सर्वतीर्थस्नानफलं यज्ञेषु दीक्षणम्,
सर्वदानफलं नाना ब्राह्मणभोजनम् ॥९॥
भूमिप्रदक्षिणं सर्वदेवतासेवनम्,
नानातपोभवफलं व्रतमनशनम् ।
पुत्रमुखदर्शनपुण्यस्य विलक्षणम्,
नार्हति षोडशीं कलामिति च वचनम्[७] ॥१०॥

हे प्राणेश्वर, कल्पे कल्पे यं ध्यायसे सत्वरमागत्य पुण्यकारणं भवतारणं त्वत् पुत्रानन पश्य।

सूत्रधार :—इति पार्वतीवचनमाकर्ण्य प्रहृष्टमानसो महेशः तीव्रं गृहमागत्य पर्य्यङ्के शयानं तप्तकाञ्चनप्रभं पुत्रं ददर्श। ततो बालकं तल्पादानीय वक्षसि समादाय चुम्बनं कृत्वानन्दजलधौ निमग्ना सती पार्वती वदति।

---

६। शान्ता भव जगन्मातः स्वसुतं पश्य मन्दिरे,
कृष्णं गोलोकनाथं तं परिपूर्णतमं परम् ।
स्वपुण्यकव्रततरोः फलरूपं सनातनम्,
यत्तेजो योगिनः शश्वद्ध्यायन्ति सततं मुदा ॥ ब्र. वै. पु (गणेश खण्ड) ६।४६

७। स्नानं च सर्वतीर्थेषु सर्वयज्ञेषु दीक्षणम् ।
पुत्रसंदर्शनस्यास्य कलां नार्हति षोडशीम् ॥ (गणेश खण्ड) ६।३०

## दुलडी ।

निराश्रयास्थित- दावाग्निपतित-
जनानाञ्च प्राणमुत ।
निरग्निमाश्रयं प्राप्य हर्षमयं
तदा मनो यथाच्युत ॥११॥

दरिद्रस्य चित्तं प्राप्यानेकवित्तं
भवेद्यथानन्दवशम् ।
आयाते स्वामिनि चिर प्रवासिनि
सतीनां यथा मानसम् ॥१२॥

दुर्घोरदुस्तरे सङ्कटसागरे
पतितानां शीघ्रतरम् ।
लब्ध्वा नौकायानं विमानसमानं
मनो यथानन्दपरम् ॥१३॥

सुचिरमन्धानां निराश्रयस्थानां
चक्षुः प्राप्य मनोयथा ।
कृत्वानेकं यत्नं त्वाममूल्यरत्नं
सम्प्राप्य मनो मे तथा ॥१४॥

हे प्राणपुत्र, पूणतमं परं ब्रह्म त्वां पुत्रं प्राप्य मन्मानसमानन्दजलधौ निमग्नम् ।

सूत्रधार :—एवमुक्त्वा बालमङ्के निधाय सानन्दं देवी तस्मै स्तनं ददौ। ततो भगवानानन्दाकुलितमानसो महेशो बालकं क्रोडे निधाय तद्गण्डस्थले चुम्बनं कृत्वा चिरं जीवेत्यादि आशिषं तस्मै ददौ। अथशिवयासमं शिवः पुत्रमङ्गलाचरनार्थं वहिर्गत्वा विविधरत्नादिदानानि विप्रेभ्यो दत्वा नानाविधवाद्यानि वादयामास। ततो ब्रह्माविष्णुप्रमुख्या देवा अद्रिसमुद्रादयश्च विप्रेभ्यो नानागजवाजिरत्नादि दानानि ददुः। तदानीं ब्राह्मणादयो भारं वोढुमशक्ता विश्रान्ता गच्छन्ति।[८] ततो भगवान् विष्णुः मृदङ्गादिवाद्यवादनपूर्व्वकं सगीतगाननटीनर्त्तनं कारयामास। तत् पश्यत शृणुत निरन्तरं जय जय रामेति वदत।

---

८। दानानि दत्त्वा विप्रेभ्यस्ते सर्वे ददृशुः शिशुम् ।
परमानन्दसंयुक्ताः शिवपुत्रोत्सवे मुने ॥
भारं वोढुमशक्ताश्च ब्राह्मणा वन्दिनस्तथा ।
स्थायं स्थायं च गच्छन्तो धनानि पथिकातराः ॥
ब्र. वै. पु. (गणेश) १०।१६-१७

## गीतम् ।

(टुलडी)

शङ्कर तनये जाते ब्रह्ममये महामाया भगवती ।
महेशसहिता कौतूहलान्विता द्विजातिभ्यो वितरति ॥१५॥
नानागजवाजिमुक्तारत्नराजिमुख्यनानाविधदानम् ।
नटीनटगणा गन्धर्वचारणा नृत्यन्ति कुर्वन्ति गानम् ॥१६॥
जय जय वार्णीं कुर्वन्ति तदानीं देवीदेवा निरन्तरम् ।
नेदुर्दुन्दुभयो ब्राह्मणा मुनयो मङ्गलं कुर्वन्ति परम् ॥१७॥

सूत्रधार :—तदानीं विष्णुर्मुनीन्द्रानानीय वेदपुराणादिपाठाशीर्मङ्गलपूर्व्वकं तं बालकं सम्पूजयामास। ततो विष्णुर्बालकं प्रति वक्ति। विष्णुरुवाच।

विष्णु :— हे वत्स, शिवतुल्यो ज्ञानी, मत्समः पराक्रमी, सर्व्वसिद्धीश्वरश्च त्वं भव ।

ब्रह्मा— हे बालक त्वं सर्व्वाग्र एव सम्पूज्यो भव ।

धर्म :— अये वत्स, त्वं मत्समः धर्मिष्ठो हरिभक्तिपरायणो भव ।

शिव :— हे प्राण पुत्र, बुद्धि-विद्यापुण्यहरिभक्तिभिः मत्समो भव ।

लक्ष्मी :— भो बालकोत्तम, तव गेहो शाश्वती मत्स्थितिभवतु ।

सूत्रधार :—अथैवं देवीदेवा गिरिनागा मुनिसिद्धा विप्रभिक्षुकादायश्च सर्व्वे मङ्गलपूर्वकं तमाशंसन्ति स्म। अथ हरिः प्रसन्नहृदयः सभायां सिंहासने देवमुनिभिः सार्द्धं मुवास । तदानीं सवाद्यवादनं गन्धर्वकिन्नराः जगुः, नर्त्तकश्रेणी ननर्त्त, तत् पश्यत शृणुत निरन्तरं रामरामेति वदत ।

## (गीतम्)

सभामध्ये सिंहासने रत्नमये विलक्षणे
निवसति देव वनमाली ।
वामे तस्य प्रजापति- रग्रे धर्म्मो निवसति
विराजते दक्षिणे कपाली ॥१८॥
समीपेच पुरन्दर दिवाकर निशाकर
मुख्यदेवगणा निवसन्ति ।
किन्नरचारनगणा नानासिद्धमुनिजना
आनन्दहृदया विकशन्ति ॥१९॥

सूत्रधार :—तदा श्रुतयो हरिं तुष्टुवुः । श्रुतय ऊचुः ।

स्तुतय :— नमस्ते कमलाकान्त नमः कमलमालिने ।
नमः कमलनाभाय नमस्ते कमलाङ्घ्रये ॥२०॥
नमः कैवल्यनाथाय व्यक्ताव्यक्तस्वरूपिणे ।
नमः शान्ताय घोराय निर्गुणाय गुणात्मने ॥२१॥
प्रसीद देवदेवेश प्रसीद भक्तवत्सल ।
प्रसीद जगतां नाथ जगद्धाम्ने नमो नमः ॥२२॥

सूत्रधार :—एतस्मिन्नन्तरे शनैश्चरस्तत्राजगाम ।

ईषन्मुद्रितलोचनो नवघनश्यामोऽस्तपस्वी महान्,
योगी नम्रमुखोज्ज्वलज्ज्वलनाभः पीताम्बरः सुन्दरः ।
बाह्याभ्यन्तरतः स्मरन्नहरहः श्रीकृष्णपादाम्बुजं,
श्रीसूर्यात्मज आजगाम तनयं द्रष्टुं शनिः शाम्भवम्[१] ॥२३॥

सूत्रधार :—एवमागत्य शनिर्हरिहरादिदेवान् प्रणम्य तैरणुज्ञातो बालकं द्रष्टुं गत्वा प्रधानद्वारमासाद्य शूलहस्तं विशालाक्षं द्वारिणं सम्बुध्य वक्ति । शनिरुवाच

शनि :— अये शङ्करकिङ्कर, हरिहरादिभिरादिष्टोऽहं बालकं द्रष्टुं यामि, द्वारं देहि ।

सूत्रधार :—तद्वाक्यमाकर्ण्य विशालाक्ष आह ।

विशालाक्ष :—भो सूर्यात्मज, नाहं शङ्करकिङ्करः, मातुराज्ञां विना द्वारं दातुं अशक्तोऽहम् ।

सूत्रधार :—एवमुक्त्वा विशालाक्षस्तदाज्ञामादाय तस्मै द्वारं ददौ । ततो वक्रकन्धरः शनैश्चरः अभ्यन्तरं गत्वा देवीं ननाम ।

आनम्रः प्रणनामसूर्यतनयस्ताम्बूलसम्भोगिनीं ।
रत्नालङ्कृतविग्रहां गिरिसुतां हर्षान्वितां सस्मितां ॥
कृत्वा वक्षसि बालकं स्थितवतीं सद्रत्नसिंहासने ।
शश्वत् पञ्चसखीजनेन धवलैरासेवितां चामरैः ॥२४॥

सूत्रधार :—एवमानतं सूर्यसुतं निरीक्ष्य पार्व्वती वदति । पार्व्वत्युवाच ।

पार्व्वती । भो सूर्यपुत्र, त्वमतुल्यकल्याणभवनं, तत् कथमधुना नम्रवक्त्रो मां बालकञ्च न पश्यसि ।

सूत्रधार :—एवमाकर्ण्य शनिर्देवीं प्रतिवक्ति ।

---

१। एतस्मिन्नन्तरे तत्र द्रष्टुं शङ्करनन्दनम् ।
आजगाम महायोगी सूर्यपुत्रः शनैश्चरः ॥
अत्यन्तनम्रवदनः ईषन्मुद्रित लोचनः ।
अन्तर्बहिः स्मरन् कृष्णं कृष्णैकतानमानसः ॥ ब्र, व. (गणेश) ११।६

शनि :—हे मातः, सर्वे प्राणिनः स्वकर्मणा सुरनरादियोनिषु जाताः, शुभाशुभसुख-दुःखादीनि लभन्ते। अतः कर्म्माधीनो भार्य्यया शप्तोऽहं बालकं नावलोकयामि।

सूत्रधार :—एवमाकर्ण्य देवी पुनर्वक्ति।

देवी— अये शनैश्चर, कथं भार्य्यया शप्तोऽसि।

सूत्रधार :—एवं देव्या पृष्टः शनिरुवाच।

शनि :— हे शङ्करवल्लभे, त्वमस्माकं साक्षाज्जननी, तत् कारणमकथ्यमपि कथयामि। एकदा मद्दयिता ऋतुस्नाता सुवेशं विधाय सस्मिता मत्समीपमागता। हरिपादैकचेतसा मया नावलोकिता। सा क्रोधार्त्ता मां प्रत्याह—अरे मूढ, त्वया न दृष्टाहम्, ऋतुरक्षणं च न कृतमतस्त्वयावलोकितं वस्तु नश्यत्वित्येवं शप्तो नम्रवक्त्रोऽहं तत् प्रभृति किञ्चिदपि वस्तु नावलोकयामि।

सूत्रधार :—एवमाकर्ण्य किङ्करीभिः सहोच्चैः प्रहस्य देवी वक्ति।

देवी— अये ग्रहेश्वर, ईश्वरेच्छया यद्भवितव्यम् तत्केन निवार्येत। अतो मद्बालकं पश्य।

सूत्रधार :—एवं श्रुत्वा पश्यामि किं न पश्यामि इति विभाव्य शनिर्वामनेत्रकोणेन बालकमुखं ददर्श। अथ तद्दृष्टिपातेन तत्क्षणं छिन्नं तन्मस्तकं गोलोकं गत्वा श्रीकृष्णे विवेश। ततो देवी तत् सर्वाङ्गं सलोहितं अवलोक्य विललाप[10]।

## लेछारी।

सुपुण्यकव्रताचरणेन　　　　गोपाङ्गनानाथपुत्रमेन-
मलभमेवाहं कृतार्था पूर्णमानसा।
कुत्रगतं शनिदर्शनतो　　　　मस्तकं पुत्रस्य शरीरतो
मदीयललाटे लिखितं किं नु वेधसा ॥२५॥
नावलोक्य पुत्रमनोहरं　　　　तवमुखं पूर्णचन्द्रसमं
ममप्राण इतः शरीरादपगच्छति।
अतीव विषम निरुपम　　　　दैवगतिरेतादृशी मम
अद्यावधि पुत्रहीनाहमभाग्यवती ॥२६॥

हा हा हतास्मि। हे प्राणपुत्र मन्दभागिनीं मां विहाय क्व गतोऽसि।

---

१० । शनेश्च दृष्टिमात्रेण चिच्छेद मस्तकं मुने,
चक्षु र्निमील्यामास तस्थौ नम्राननः शनिः।
तस्थौ च पार्वतीक्रोडे तत् सर्वाङ्गं सलोहितम्,
विवेश मस्तकं कृष्णे गत्वा गोलोकमीप्सितम् ॥ ब्र. वै (गणेश) १२।७-८

सूत्रधार :—एवं विलाप्य मृतं वालकं वक्षसि निधाय देवी मृतेव भूमौ पपात। एवं दृष्ट्वा विस्मिताः चित्रपुत्तलिका इव सर्व्वेदेवाः तस्थुः। कैलासवासिनश्च सर्वे संमूर्च्छिता वभूवुः। ततो हरिरेवमवेलोक्य गरुडमारुह्य दिशमुत्तरां जगाम। एवङ्गत्वा हरिः पुष्पभद्रानदीतटस्थितं हस्तिनीभिः परिवृतं सुरतस्थमनिद्रितं गजेन्द्रमवलोक्य तन्मस्तकं चक्रेण छित्त्वा गरुडे स्थापयामास। ततस्तदङ्गविक्षेपोद्बोधिता हस्तिन्यः स्वामिनमेवमवलोक्य शुचातुराः हरिं तुष्टुवुः। हस्तिन्य ऊचुः।

हस्तिन्य :— लक्ष्मीकान्त महाशान्त पतगेश्वरवाहन।
शङ्खचक्रगदापद्मधारिणे ते नमो नमः ॥२७॥

भो भो भगवन् हरे, समस्त भोगदाता त्वमनाथनाथो दासीनामस्माकं स्वामिदानं देहि।

सूत्रधार :—एवं तत्स्तुतितुष्टो महाकारुणिको भगवान् अन्यगजस्य तन्मुण्डात्तुण्डं पृथक्कृत्य गजे संयोज्य तत्सर्वाङ्गे पादद्वयं प्रदाय तस्मै वरं ददौ। हरिरुवाच।

हरि— हे गजेन्द्र सपरिवारस्त्वमाकल्पं सञ्जीव।

सूत्रधार :—इत्येवं वरं प्रदाय भगवान् हरिः कैलासमागत्य तद्गजमस्तकं शिशौ संयुज्य पार्वतीं प्रत्याह। हरिरुवाच।

हरि— भो भवानि, सर्वेषां वुद्धिरूपया त्वया किमज्ञातमस्ति? ब्रह्मादिस्तम्वपर्यन्तं प्राकृतिकं जगत् स्वकर्मणा सुखदुःखानि भुंक्ते। परिपूर्णकृष्णोऽयं वेदविदित गजवक्त्रनामा तवात्मजो नात्र तच्छोकावकाशः।

सूत्रधार :—एवमाकर्ण्य शिवादिष्टा शिवा तुष्टा हरिं स्तुत्वा नत्वा वालकाय स्तनं ददौ। अथ हरि राशिराशिदानपूर्व्वकं भूषणोत्तमं कौस्तुभं वालकगले ददौ। एवं विलोक्य सर्वे देवीदेवा रत्नालङ्कारादीनि सानन्दं तस्मै ददुः। अथातिहृष्टमानसो महेशो देव्या समं मृतज्जीवितं वालकं अवलोक्य विप्रादिभ्यो गजवाजिरत्नमुक्तादिदानानि ददौ। एवं विलोक्य देवोदेवादयो हिमालयादयोऽपिशैलनदा दानानि तस्मै ददुः। तदानीं वेदपुराणादिपाठमङ्गलपूर्व्वकं हरिर्विप्रान् भोजयामास। अथैतत् सभामध्ये दुर्गातिरुष्टा शनिं शशाप।

दुर्गा— अरे शने, तवालोकनेन मदात्मजोऽङ्गहीनस्त्वमपि अङ्गहीनो भव।

सूत्रधार :—एवमाकर्ण्य कश्यपादित्ययमाः अतिरुष्टाः शङ्करालयाद्गन्तुकामाः समुत्तस्थुः। ततो हरिहरादिभिरादिष्टो व्रह्मा तान् प्रीत्या वोधयामास। ते च व्रह्माणं प्रत्यूचुः।

देवाः— हे व्रह्मन् वालकं द्रष्टुं शनिमादिश्य दुर्गा कथं शशाप? अत्र धर्म एव साक्षी। एवमाकर्ण्य व्रह्मोवाच।

ब्रह्मा— अहो कश्यपादित्ययमाः, सावला स्वभावचपला च, साधवो भवन्तस्तदीयापराधं क्षन्तुमर्हन्तु। हे दुर्गे, त्वयापि पुत्रं द्रष्टुमादिश्य गृहागतो निर्दोषो अतिथिः कथं शप्तः[११] ?

सूत्रधारः—एवम्बोधयित्वा ब्रह्मा शनिमानीय शापमोचनार्थं पार्व्वत्यै समर्पयामास।

सूत्रधारः—ततोऽतितुष्टा दुर्गा शनैश्चराय वरं ददौ।

देवी— हे वत्स शने, त्वमद्यप्रभृति ग्रहराजो, हरिभक्तो मत्शापमुक्तः चिरञ्जीवी भव। किन्तु शापमाहात्म्यात् किञ्चित् खञ्जो भविष्यसि।

सूत्रधारः—एवं श्रुत्वा कश्यपादित्ययमाः शान्ता बभुवुः। अथ तां जगदम्बां प्रणम्यातिहृष्टो देवसमाजं शनिर्जगाम। ततः शुभकाले मुनिभिः साकं हरिर्बालकाय सर्व्वसिद्धिब्रह्मज्ञानादीनि प्रदाय तं प्रत्याह। हरिरुवाच।

हरिः— हे वत्स, त्वमद्यप्रभृति विघ्नेश-गणेश-हेरम्ब-गजानन-लम्बोदरेकदन्त-शूर्पकर्ण-विनायकाष्टनामख्यातः, सर्वाग्रे सर्वपूज्यो भव।

सूत्रधारः—ततो ब्रह्मादिदेवाः देव्योमुनिशैलादयश्च सर्व्वे नाना द्रव्यैः पूजनपूर्वकं गणेशाय सिद्धासनादीनि ददुः। पृथिवी तस्मैवाहनाय मूषकं ददौ। अथैदानीं भवानी रत्नसिंहासने पुत्रं प्रवेश्य मुनिगणोक्तसूक्तमन्त्रैः अभिमन्त्रितेन तीर्थोदकपूर्णकलशशतेन संस्नाप्य नानापुष्पधूपदीपादिभिः पूजयामास। ततो हरिर्गणेशं संपूज्य तुष्टाव।

परं ब्रह्मज्योतिः प्रवरममराणां मुनिगणस्तुतं त्वां संस्तौमीश्वरवरदधर्म्मज्ञपरमम्।
गुरुं सिद्धेशानां भवविटपिनां बीजममलं सदायोगध्येयं प्रकृतिपरमानन्दरसिकम् ॥२७॥

अनन्तस्त्वां स्तोतुं दशशतमुखैरक्षमतरोऽक्षमत्वं संप्राप्तः पशुपतिरसौ पञ्चवदनैः।
चतुर्वक्त्रैर्ब्रह्मा न हि भवति शक्तस्तव परं स्तुतौ शक्तावाणी न हि सकलवेदाः स्वयमहम् ॥२८॥

---

११। शशाप पार्वती रुष्टा स्त्रीस्वभावाच्च चापल्यात्।
सर्वेषां वचनेनैव क्षन्तुमर्हन्तु साधवः॥
दुर्गं दत्वा तमाज्ञां च पुत्रदर्शनहेतवे।
कथं शपसि निर्दोषमतिथिं त्वद्‌गृहागतम्॥

ब्र. वै. (गणेश) १२।४१-४२

सर्वाग्रपूज्य सर्वेश सर्वात्मन् सर्वकारण ।
नमस्तुभ्यं नमस्तुभ्यं पार्वतीप्रीतिवर्द्धन[११] ॥२६॥

सूत्रधार :—एवं स्तुत्वा हरिर्विरराम। ततस्तत् सभायां देवादयः सर्व्वे हृष्टमानसा महामहोत्सवं पश्यन्तस्तस्थुः। एतास्मिन्नन्तरे पार्व्वती विष्णुं प्रतिवदति। देवी उवाच।

दवी— भो भो भगवन् हरे, त्वं सर्वलोकानां राजा, त्वयि स्थिते कथमराजकं जगत्? पुरा त्वयादिष्टैर्देवैरतिभङ्गकृते स्वामिनो वीर्यं भूमौ पतितं, कैर्निह्नुतं तदण्वेषणं कुरु।

सूत्रधार :—एवं देव्यावाक्यं श्रुत्वा हरिः प्रहस्य देवान् प्रतिवक्ति। हरिरुवाच।

हरि :— अये देवगणाः, देवीवचनमाकर्ण्यताम्, येन शिववीर्यं निह्नुतं तत्क्षिप्रमानीयताम्, नचेत् स दण्डमर्हति।

सूत्रधार :—एवं हरेर्वचनमाकर्ण्य परस्परमालोक्य सर्वे देवाः त्रासार्त्ता ऊचुः। तत्रप्रथमतो ब्रह्मोवाच।

ब्रह्मा— हे भगवन् तद्वीर्यं येन निह्नुतं स पुण्यक्षेत्रे पुण्याहे पुण्य-कर्मवञ्चितो भवतु।

सूत्रधार :—ततो महादेव उवाच।

महादेव :—हे हरे, येन स्ववीर्यं निह्नुतं स त्वत्सेवापूजने बञ्चितो भवतु।

सूत्रधार :—एवमेवेन्द्रादयोदेवाः सर्व्वे शपथश्चक्रु। ततो देव पत्न्यऊचुः।

देवपत्न्य :— भो भो भगवन् नारायण, याभिस्तद्वीर्यं निह्नुतं ता भर्त्तारं विहाय परपुरूषं गच्छन्तु, बन्धुहीनाः सन्तु।

सूत्रधार :—एवमाकर्ण्ये हरिः साक्षिणो धर्मसूर्यादीन् प्रत्याह।

हरि :—अहो धर्म्मादयो, यूयं कर्मणां साक्षिणः, भगवतोमहेशस्य जगद्गुरोरमोघं वीय किंभूतं तत् कथयताविलम्बितम्।

सूत्रधार :—ततो धर्म्मादयो परस्परं समालोक्य क्रमेनोचुः।

---

११। ईश त्वां स्तोतुमिच्छामि ब्रह्मज्योतिः सनातनम्।
नैवं वर्णयितुं शक्तोऽस्म्यनुरूपमनीहकम्।
प्रवरं सर्वदेवानां सिद्धानां योगिनां गुरुम्।
सर्वस्वरूपसर्वेशं गुणराशिस्वरूपिणम्।
अव्यक्तं अक्षरं नित्यं सत्यमात्मस्वरूपिणम्।
बायुतुल्यं च निर्लिप्तं चाक्षतं सर्बसाक्षिणम्॥ गणेश खण्ड १३।४०-४३

धर्म :— भो भो भगवन् जनार्द्दन, उत्तिष्ठतो महेशस्य वीर्यं भूतले पपात, तत्किम्भूतं त्वया ज्ञातम् ।

भूमी— भो भगवन्नाथ, अवलाहं, तद्वीय वोढुमशक्ता वह्नौ न्यक्षिपम् ।

वह्नि :— हे हरे, तद्वीर्यं वोढुमशक्तोऽहं शरवने न्यक्षिपम् ।

वायु :— भो दामोदर, स्वर्णरेखानदीतीरे शरकाननेषु पतितं वीर्य निरूपमसुन्दरो-बालको बभूव ।

सूर्य :— भो भो भगवन् रुदन्तं बालकमालोक्य कालचक्रप्रेपितोऽहमस्ताचलमगमम् ।

चन्द्र :— भो भो भगवन् नारायण, कृत्तिकागणा रुदन्तं बालकमालोक्यादाय स्वालयं जग्मुः ।

जलम्— हे हरे भगवत्यः कृत्तिकागणास्तव बालकमादाय स्तनं प्रदाय वर्द्धयामासुः ।

सन्ध्या— हे देव, साम्प्रतं कृत्तिकास्तं स्तन्यादिदानेन वर्द्धयित्वा प्रेम्ना कार्त्तिकेय इति नाम तस्य चक्रुः ।

रात्रि :— भो प्रभो नाथ, कृत्तिकास्तं बालकं क्षणमपि लोचनागोचरं न चक्रुः ।

दिनम् :—भो भो भगवन हरे, कृत्तिकास्त्रैलोक्यदुर्ल्लभं सुस्वादु वस्तु नित्यं बालकं भोजयामासुः ।

सूत्रधार :—ततः साक्षिनामेवं वचनमाकर्ण्य हरिस्तुष्टो बभूव । तत्रस्थाः सभ्याः सर्व्व हृष्ट-मानसाः हरिहरीत्यूचुः । ततः पुत्रवार्त्तामाकर्ण्यातिहृष्टा देवी विप्रेभ्यो वस्त्रालङ्कारादि-दानानि प्रददौ । अथैदानीं हरिविधिमुख्यदेवमुनिभिरादिष्टः शिवः शिवयालोच्य कृत्तिकास्थानं वीरभद्रादि वीरान् प्रस्थापयामास । तेच गत्वा कृत्तिकालयं वेष्टया-मासुः । अथ कृत्तिकास्तानेवमवलोक्य कुमारं प्रत्याहुः । कृत्तिका ऊचुः ।

कृत्तिका :—अहो वत्स, असंख्यसैन्यानि अस्माकं भवनम् वेष्टयामासुः । कस्यैतानि न जानीमो वयम् ।

सूत्रधार :—ततः तासां वचनमाकर्ण्य कुमारः कृत्तिकाः सम्बुध्य वदति । कार्त्तिकेय उवाच ।

कार्त्तिकेय :—हे हे मातरो यूयं भयं त्यजत, मयि विद्यमाने किम्वा भयम् !

सूत्रधार :—एतस्मिन्नन्तरे पुरतस्तिष्ठन् नन्दिकेश्वरः कार्त्तिकं प्रतिवक्ति । नन्दिकेश्वर उवाच ।

नन्दिकेश्वर :—हे भ्रातः, कैलासे विष्णुमुख्या देवाः गणेशोऽसवं कुर्वन्तो निवसन्ति । तत्र तत् स्थितिमन्वेषितुं जगदम्बया प्रेरितेण विष्णुणा कृत्तिकालयस्थितस्य तव वार्त्तां धर्म्मादि साक्षिणां मुखादाकर्ण्यादिष्ट शिवादिष्टोऽहमिहागतः । इतस्त्वमधुनागच्छ ।

सूत्रधार :—एवमाकर्ण्य कार्त्तिक उवाच ।

कार्त्तिक :—भो भ्रातः कथमितो गच्छामि ।

सूत्रधार :—एवमाकर्ण्य नन्दिकेश्वरो उवाच।

नन्दिकेश्वर :—हे भ्रातः, तवाभिषेकं सुरैः साकं विष्णुः करिष्यति। तारकं हत्वा नानाशस्त्रास्त्रं लप्स्यसे। किञ्च शुष्कवृक्षोयथा स्वकोटरे अग्निं गोप्तुं न शक्तः, तथा त्वामपि इमाः सर्वा न शक्ताः। अपरञ्च भक्तानुग्रहनिग्रहमनिर्व्वचनीयं त्वां देवा अपि न जानन्ति, कुतः कृत्तिका जानन्तीति ? अतस्तूर्णमितो गच्छ।

सूत्रधारः—एवं श्रुत्वा कार्त्तिक उवाच.।

कार्त्तिकेय :—भो भ्रातः त्रैकालिकं जानासि, सर्व्वज्ञस्य तव का मत्प्रशंसा ? कर्मणा योहि यत्र जायते स तत्रैव सुखं लभते। इमाः कृत्तिका योगिन्यः। आसामहं स्तनवर्द्धितः पोष्यपुत्रः, पार्वत्या अपि स्वामिवीर्यजातोऽहं, न गर्भजः। तथापि त्वया समं गत्वा देवगणं द्रक्ष्यामि।

सूत्रधार :—एवमुक्त्वा कार्त्तिकः कृत्तिकागणं सम्बुध्य वक्ति। कार्त्तिकेय उवाच।

कार्त्तिकेय :—हे मातरो मातरं देववर्गं बन्धुवर्गं च द्रष्टुं शङ्करस्थानं यास्यामि। विदायं करोमि।

सूत्रधार :—एवमुक्त्वा कार्त्तिकेयो मनसा हरिं स्मरन् यात्रां चकार। एतस्मिन्नन्तरे कार्त्तिकेयस्तत्र रथं ददर्श।

सम्वेष्ट्य पार्षदगणैः परितः स्तनोत्तं
मालाछशोभितमतीवमनोज्ञयानम्।
माणिक्यरत्नरचितं जगदीशपुत्रः
प्रस्थापितं गिरिजया रथमाददर्श ॥२०॥

एवमवलोक्य कुमारो रथमारूरोह। ततः रथमधिष्ठितं कुमारमालोक्य शुचातुरा मुक्तकेशाः स्तम्भिता उण्मत्ता इव कृत्तिका वदन्ति। कृत्तिकाऊचुः।

## लेछारी।

कृत्तिकाः— हा हा गुणार्णव प्राणपुत्र विहाय नोऽधुना यासि कुत्र
किम्बा कुर्म्मोवयं यास्यामः कस्य वाश्रमं।
स्नेहेनास्माभिस्तु वर्द्धितोऽसि प्राणतोऽप्यस्माकमधिकोऽसि
तथापि निर्दयं हृदयं ते निरूपमम् ॥२१॥
सम्प्रति जननीपरित्याग- रूपोनायं धर्म्मो महाभाग
कदापि जहाति पुत्र एव न मातरम्।
वयं कस्य पूर्णशशिसमं वदनं पश्यामो मनोरमं
तव विरहेण प्राणो नोपयान्ति परम् ॥२२॥

सूत्रधार :—इत्युक्त्वा कृत्तिकाः कार्त्तिकं वक्षसि निधाय संमूर्च्छिता बभूवुः। अथ कार्त्तिकेयः कृत्तिकाः सम्बुध्य पुनराह। कार्त्तिक उवाच।

कार्त्तिकेय :—हे हे मातरो दैवाधीना जन्मकर्मशुभाशुभसंयोगवियोगादयः, तत् परं बलं नास्ति। दैवञ्च श्रीकृष्णायत्तमतो गोविन्दं भजत, मोहं त्यजत।

सूत्रधार :—इति अध्यात्मवचनेन कृत्तिकाः बोधयित्वा पुरतः पूर्णकुम्भादीन् दक्षिणे राजहंसादीन्, वामे शृगालादीन् अवलोक्य सवाद्यमङ्गलध्वनिं हरिशब्दमाकर्ण्य सपार्षदो रथेन सानन्दं तातमन्दिरं कुमारो जगाम। एवं गत्वा क्षणेन कैलासं प्राप्य कृत्तिकाभिः समं क्षणमक्षयवटमूले स्थित्वा राजमार्गं कुमारो ददर्श।

सपट्टसूत्रैः कदलीसमूहैः श्रीखण्डपत्रैर्जलपूर्णकुम्भैः।
रत्नप्रदीपैरनुलेपनाद्यैर्विराजितं राजपथं ददर्श ॥३३॥

सूत्रधार :—ततो लक्ष्मी-सरस्वतीमुख्या देवाङ्गनाः पुरस्कृत्य सशिवं शिवं समालोक्य तूर्णं रथादवरुह्य शिरसा कुमारः प्रणाम। अथ देवी कुमारं अङ्के निधाय चुचुम्ब। ततो देवीदेवामुनिशैला अपि सर्वे तस्मै शुभाशिषं ददुः। ततः शिवालयमागत्य कुमारः सगणः सभामध्ये विष्णुं ददर्श।

ब्रह्मेन्द्रचन्द्रपवनादिसुरैरुपास्यं
नानामुनीश्वरनुतं स्मितचन्द्रास्यम्।
सिंहासने विमलरत्नमये वसन्तं
विष्णुं ददर्श शिवजो घनकान्तिमन्तम् ॥३४॥

सूत्रधार :—एवमालोक्य भक्त्या च नम्रीभूय पुलकाञ्चितसर्वाङ्गः कुमारः शिरसा विष्णुं प्रणम्य देवमुनिवरांश्च प्रत्येकं नत्वा तेभ्यः शुभाशिषं प्राप्य स्वर्णासने सानन्दमुवास। तदानीं शिवया शिवो विप्रेभ्यो दानानि ददौ। अथ भगवान् विष्णुः शुभे काले कुमारं रत्नसिंहासने उपवेश्य नानावाद्यवादनादिमङ्गलपूर्व्वकं वैदिकमन्त्राभिर्मन्त्रितैः सर्वतीर्थोदकपूर्णशतकुम्भैः स्नापयामास। ततः विष्णुमुख्यादेवादेव्यश्च सर्व्वे विचित्रवस्त्र-किरीटादिभूषणकृष्णमन्त्रयन्त्रादि परमैश्वर्यादीनि तस्मै ददुः। हिमालयस्तस्मै वाहनाय मयूरं ददौ। अथैदानीं प्रजापतिर्देवसेनानाम्नीं कन्यां तस्मै ददौ।

यां जल्पन्ति मणीषिनः खलु महाषष्ठीं जगन्मोहिनीं
सानन्दां शिशुपालिकां भगवतीं सच्छीलनीतिस्थिताम्।
रूपेणाप्रतिमां विवाहविधिना सूक्तेन सालङ्कृतां
तां स्कन्दाय शुभां प्रजापतिरदात् श्रीदेवसेनाभिधाम् ॥३५॥

एवं कुमारमभिषिच्य विष्णुमुख्या देवादेऽयो मुनिशैला अपि सर्वे शङ्करपूजिताः स्वं स्वं धाम सानन्दं जग्मुः। ततश्च कालान्तरे तान् सर्वानानीय वैवाहिक-विधिना शिवयासह शिवः पुष्टिनाम्नीं कन्यां गणेशाय ददौ। अथ दुर्गा कृतार्था हृष्टमानसा सर्वकामदं स्वामिनः पादपद्मं सिषेवे। विघ्नेशस्य विघ्नेश कारणाद्युक्तं तन्नविस्तारितं विस्तरभयादिति। अथ कविर्भगवद् वणनोद्रिक्त-प्रेमार्द्रहृदयो गीतेनाङ्कस्यान्ते श्रीहरिं स्तुवन् सामाजिकानाशास्ते।

## ( स्तुतिः )

प्रणमामि सुदर्शनचक्रधरम् ॥ ध्रुं

परमं पुरुषं मुणिवृन्दनुतं
निजभक्तपरायणनन्दसुतम्।
कमलावदनाम्बुरुहभ्रमरं
प्रणमामि सुदर्शनचक्रधरम् ॥३६॥

भवसागरतारणनामगणं
निजबाहुबलार्जितपुण्यजनम्।
नवनीरदमेदुरकान्ति धरं
प्रणमामि सुदर्शनचक्रधरम् ॥३७॥

यमलार्जणमुक्तिकरं वरदं
मुरलीरवलोकविमोहनदम्।
कविसूर्यधरासुरभद्रकरं,
प्रणमामि सुदर्शनचक्रधरम् ॥३८॥

श्लोक :—

आविर्भूय यदोःकुले सुरवरैर्ब्रह्मादिभिःप्रार्थितो
लीलानिर्मलसत्त्वविग्रहवर्ती मूर्त्ति परामाश्रितः।
भूभारान् वककंसमुख्यविबुधारातीनधर्मात्मनो
यो बालोऽप्यवधीत् स्वयं भुजबलैः पायात् स वः केशवः ॥३९॥

गौरीकान्तनिजाभिधानविदितो विप्राद य श्चादत्तवान्
नामश्रीकविसूर्यइत्यपरकं ब्रह्मायनो ब्राह्मणः।
भारद्वाजपवित्रगोत्रजनिना विघ्नेशजन्मोदये
नाटे तेन मणीपिना विरचिते मध्योऽयमङ्कोगतः ॥४०॥

# तृतीयोऽङ्कः

जन्मादीनि यतो भवन्ति जगतो यद्वर्णने सूरयो-
मुह्यन्ति प्रभवन्ति नैवमुनयो यत्तत्त्वसम्वेदने।
यस्यान्तं न विदुस्त्रीलोकगुरवो देवाविरिञ्च्यादय-
स्तन्नित्यं परमात्मरूपममलं सत्यं परेशम्भजे ॥१॥

अपिच :— श्रीपर्शुरामोनिजपर्शुना यद्दन्तद्वयस्यैकरदं बभञ्ज।
तं विघ्ननाथं गणदेवनाथं वन्दे जगन्नाथमनाथनाथम् ॥२॥
विघ्नेशाख्यानमध्ये तु कुमारचरितोदिते।
अथ यद् यद् भवत्येवं शृणुताहो सभासदाः ॥३॥

सूत्रधार :—अथ कार्त्तवीर्य्यार्जुनो नाम राजा नाना सैन्ययुतो मृगयां कर्त्तुं वनं गत्वा मृगान्निहत्य तत्र निशामुखे जमदग्न्याश्रमाभ्यासे परिश्रान्तो निराहारस्तस्थौ। ततः प्रभाते सरोवरे स्नाता राजा स्वेष्टमन्त्रं जजाप। ततो नृपमालोक्य जमदग्निः प्रीत्या मङ्गलं पप्रच्छ। राजा तं प्रणम्य वृत्तान्तं अनशनादिकं कथयामास। अथ मुनिर्नृपं निमन्त्र्य स्वालयं गत्वातिभीतः कामधेनुं प्रत्याह। मुनिरुवाच।

मुनि :— भो मातः, भोजयितुं राजा निमन्त्रितो मया केन भवितव्यम्।
ततो मुनेर्वाक्यमाकर्ण्य धेनुरुवाच।

धेनु :— अये मुने मयिस्थितायां किन्ते भयम्? जगद्भोजयितुमपि शक्ता; यथा च त्वं कथय तत् सर्वं दास्यामि।

सूत्रधार :—ततो मुनिना प्रार्थिता धेनुः राजभोग्यानि द्रव्याणि ददौ। अथैवमवलोक्य मुनिः सानन्दं राजानं ससैन्यमानीयातिदुर्लभद्रव्याणि भोजयामास। एवं भुक्त्वा विस्मयापन्नो राजा मन्त्रिं प्रतिवक्ति।

राजा— अये मन्त्रिवर, ममापि दुर्लभाणि द्रव्याणि मुनिना कुत्र प्राप्तान्यवलोकय। ततस्तदाज्ञामादाय मन्त्री मुनेर्गृहमालोक्य सर्वं राज्ञे निवेदयामास। सचिव उवाच।

मन्त्री— भो भो महाराज वह्निकुम्भयज्ञकाष्ठाद्यन्वितं तैजसाधारादिवर्जितं मुनेर्गृहं दृष्टम्। तत्प्रियासुता निर्भूषणा वृक्षचर्म्मपरिधाना दृष्टा मया। किन्तु तद्गृहैकदेशे साक्षाल्लक्ष्मीरिव चन्द्रवर्णा सर्व्वसम्पद्गुणाधारा मनोहरा कपिलेका दृष्टा, तां मुनिं याचस्व।

सूत्रधार :—एवमाकर्ण्य राजा सविनयं मुनिं याचते स्म। राजोवाच।

राजा— भो भगवन् मुने, पुरा दधीचिः स्वीयमस्थि देवेभ्यो अदात् इति श्रुतम, युष्माद्विधानामदेयं नास्ति। कामधेनुवर्गं कटाक्षतः स्रष्टुं शक्तोऽसि, अतो मह्यं धेनुभिक्षां देहि।

सूत्रधार :—एवं श्रुत्वा मुनिरुवाच।

मुनि :— अरे नृपाधम, व्यतिक्रमवादिने क्षत्रियाय तुभ्यं विप्रोऽहं दानं दास्यामि ? गोलोकजातेयम् कथं मत्सर्जनीया ? त्वमतिथिगृहं गच्छ, कोपं नैवं वर्द्धय।

सूत्रधार :—एवं तद्वाक्यमाकर्ण्य संक्रुद्धो राजा सैन्यमध्यं प्रविश्य तां धेनुं बलादानयितुं किङ्करान् प्रेषयामास। तदेवं श्रुत्वातिशोकार्त्तो मुनिर्धेनुसमीपं गत्वा तत्सर्वं कथयामास। अथैवं मुनिमालोक्य धेनुस्तं प्रत्याह।

धेनु :— अये तपोधन, स्वेच्छयाचेत्तस्मै मां ददासि तदा तेन सह यास्यामि। अन्यथा न यास्यामि। अत्र ते को विलापः, मद्गतेन सैन्येन नृपं विदूरय।

सूत्रधार :—इत्युक्तवत्याः कपिलायाः वक्त्रनासिकादिभ्योः नानाशस्त्रास्त्रमादाय शतसहस्राणि सैन्यानि निर्गतानि। एवमालोक्यः मुनिः सानन्दो बभूव। ततो दूतमुखात् कपिलासैन्यवृत्तान्तमाकर्ण्य राजातिभीतो दूतद्वारा स्वदेशात् कानिचित् सैन्यानि जहार। अथ राजादिष्टो दूतो मुनिमुपगम्य वक्ति। दूत उवाच।

दूत :— हे मुने, राज्ञादिष्टोऽहमिहागतः, याचकाय नृपाय कपिलां देहि, नोचेद् युद्धं देहि।

सूत्रधार :—एवमाकर्ण्य मुनिः प्रहस्य वदति। मुनिरुवाच।

मुनि :—अये दूत, यतो मया निराहारो नृपोऽन्नपानादिना पूजितः अतो मत् प्राणाधिकां कपिलां याचते सः। तां दातुं अशक्तोऽहं, युद्धं करिष्यामि।

सूत्रधार :—एवं श्रुत्वा दूतो नृपमुपगम्य मुनेर्वाक्यं निवेदयामास। अथ मुनिः कपिलादत्त-सैन्यमादाय रणस्थलं जगाम। राजा च ससैन्यो युद्धमागत्य मुनिं प्रणम्य तत् सैन्यैः सह युयुधे। ततो रथभङ्गादिना मुनिसैन्येन राजसैन्यं जितम्। यत्किञ्चित् अवशिष्टं तत् पलायितम्। राजाऽपि शस्त्राहतो मूर्च्छामवाप। अथ मुनिः स्वसैन्यं निवार्य्य आशीर्वादादिना संमूर्च्छितं नृपं सचेतनीकृत्य पुनर्गृह-मानीय भोजयित्वा वदति। मुनिरुवाच।

मुनि :— भो महाराज, स्वैरं निजलायं गच्छ।

सूत्रधार :—एवं मुनेर्वाक्यमाकर्ण्य राजा तं प्रत्याह। राजा उवाच।

राजा— भो भगवन् मुने अतिथये मह्यं धेनुं देहि, नोचेत् पुनर्युद्धं देहि।

सूत्रधार :—इत्युक्त्वा राजा युद्धाय रथमारुरोह। पुनरेवं तयोर्न्नाना शस्त्रास्त्रप्रहारैर्म्महद्युद्धं

अभूत्। एतस्मिन्नन्तरे ब्रह्मा तत्रागत्य तयोः प्रीतिं कारयामास। एवं कृत्वा ब्रह्मा स्वालयं ययौ। राजापि स्वपुरीं जगाम। एवं गृहमागत्य राजा हरिं संस्मृत्य विस्मयापन्नो मुनेराश्रमं पुनर्जगाम। तत् पश्यत शृणुत निरन्तरं राम-रामेति वदत।

## ( गीतम् )

रथिरथराजि-नानागजवाजि-महाबलपराक्रम।
सहस्रनृपतिसमेत-भूपतिगण-शिरोरत्नसम ॥४॥
कार्त्तवीर्यार्जुनो रूपेण मदनोपम एव लोकत्रयं-
विजेतुमीश्वरो महाधनुर्द्धरो जगाममुनेरालयं ॥५॥
मृदङ्गपणवनानावाद्यरव सैन्यरवे निरन्तरं।
प्रजाअतिभीता विशेषमूर्च्छिता अभवन्तदानीं परम् ॥६॥

सूत्रधार :—एवं गत्वा मुनेराश्रमं प्राप्य कपिलामादाय गृहं गन्तुं राजा मनश्चक्रे। एवं दृष्ट्वा हरिं स्मृत्वा शस्त्रास्त्रमादाय रणं गत्वा मुनिः शरजालं चिक्षेप। नृपवरोऽपि शस्त्राणि चिक्षेप। एवमुभयोर्म्महद्युद्धम् अभूत्। ततो दिव्यास्त्रेण राज्ञः सशरं धनुः सरथसारथिं मुनिश्छिच्छेद। अथातिक्रुद्धोराजा एकजन्तुघातिनीं शक्तिं चिक्षेप।

दत्तायदत्ता हरिणा पुरा या दत्तेन दत्तार्कनिभा नृपाय।
प्रकाशयन्तीं परितो दशाशाः चिक्षेप तां तत्र बलेन राजा[१२] ॥७॥

सूत्रधार :—तदानीमाकाशे देवा हाहेत्ति चक्रिरे। ततः शक्तिर्म्मुनेरुरो विदार्य्य हरेर्निकटं जगाम। तदा तत्रैव मुनिः प्राणान् तत्याज। ततो मुनिं मृतमालोक्य हा तात तातेत्युच्चार्य्य कृतरोदना कपिला गोलोकं जगाम। एवं मुनिं हत्वा प्रायश्चित्तं-विनिवर्त्य राजा स्वपुरं जगाम। अथेदानीं रेणुका मृतस्वामिनं वक्षसि संस्थाप्य मुहुर्व्विलप्य हा वत्स राम एहि पश्येत्युवाच। अथ क्षणेन पुष्करादागत्य रामो

---

१२। अथ राजा महाक्रुद्धो ददर्श स्वसमीपतः।
दत्तेन दत्तां शक्तिं तामेकपुरुषघातिनीम् ॥
जग्राह नत्वा दत्तं तं स नत्वा शक्तिमुल्वणाम्।
न्नर्णयामास तत्रैव शतसूर्यसमप्रभाम् ॥ ब्र. वै. (गणेश खण्ड) २७।२३-२४

मृतं तातं शोकार्त्तां जननीं च अवलोक्य पितुर्म्मरणवृत्तान्तं कपिलागमनञ्चाकर्ण्य मुहुर्व्विलप्य चन्द्रनैराज्यसंयुतां चितां चकार। ततो रेणुका रामं वक्षसि संस्थाप्य तद्गण्डे कृतचुम्बना भृशमारुरोद। रेणुका उवाच।

## लेछारी।

हाहा मम प्रणाधिक पुत्र त्वामहं विहाय यामि कुत्र

पापिष्ठेन राज्ञा पितृमातृहिनीकृतम्।

हे हे वत्स वत्स राम राम महाबाहो महापुण्य नामन्

सम्प्रतिवचनं शृणु मम समुचितम् ॥८॥

पित्रोः कृत्वा शेषक्रियाचयं न यास्यसि युद्धं महाभयं

न शुभं समरं दारुण क्षत्रियैः समम्।

वत्स तिष्ठ त्वं निजालये गुरूणाराधय पुण्याश्रये

शाश्वतीं तपस्यां कुरुत रामविषयम् ॥९॥

कपिलादर्शनलुब्धतरः दारुणक्षत्रियाधमवरः

हतस्तवतातो मुनिर्घोररणस्थले।

कपिलापिकृत्वानेकशोकं तत्क्षणं गत्वा सविष्णुलोकं

सम्प्रति मग्नाहं घोरशोकसिन्धुजले ॥१०॥

पुनरपि शृणु वत्स राम संसारतारक पूर्णकाम

तवानुजवर्गं समानं पालयिष्यसि।

तीर्थस्नानदानपुण्यचयं सदाकुरु चतुर्वर्गोदयं

वत्स कुलधर्मं कदापि नहि त्यक्ष्यसि ॥११॥

सूत्रधार :—एवं मातुर्व्वाक्यमाकर्ण्य राम आह।

राम :— हे मातः, त्रिसप्तकृत्वो निर्भूपां महीं करिष्यामि। कार्त्तवीर्यं निहत्य तत्क्षतजेन पितॄन्तर्पयामि। पितृघातकं यो न हन्ति स रौरवनरकं व्रजेत्।

सूत्रधार :—रामः इति प्रतिज्ञां कृत्वा मुहुर्व्विललाप। एतस्मिन्नन्तरे स्वयं भृगुरागत्य वदति। भृगुरुवाच।

भृगु :— मद्वंशजातस्त्वं कथं विलपसि? जगदिदं जलवुद्वुदवत्, केषां के पितरः केषां के पुत्राः? जगत्सारं कृष्णं भज। तेन यन्निरूपितं केन तत् वार्य्यते? अतो मा रोदीः, पारलौकिकं कर्म्म कुरु।

सूत्रधार :—भृगोरेवं वाक्यमाकर्ण्य रामस्तत्क्षणं शोकं तत्याज। ततो रेणुकोवाच।

रेणुका— भो भगवन् ब्रह्मन्, ऋतोश्चतुर्थदिने मृतोऽयं नाथः। तस्यानुगन्तुं इच्छामि। कात्र व्यवस्था ?

सूत्रधार :—एवं श्रुत्वा भृगुरुवाच।

भृगु :— हे मातः, ऋतोश्चतुर्थदिने नारी भर्त्तुः शुद्धा संशयो नास्ति स्वैरमनुगच्छ।

सूत्रधार :—ततो विध्यनुसारेण रामेण दत्तसंस्कृताग्निना तत्र चितायां रामरामेति वाक्यमुच्चार्य्य स्वामिना सह सा सती भस्मीभूता।

ततो हरिकिङ्करा आगत्य तौ दम्पती रथे कृत्वा हरिनिकटं निन्युः। अथ रामः पित्रोः शेषक्रियां समाप्य विप्रेभ्यो गोसुवर्णादिदानानि प्रदाय ब्रह्मलोकं गत्वा ब्रह्माणं ददर्श।

ब्रह्माणं परितोवृतं मुणिगणैः सिंहासने संस्थितं
दातारं तपसां फलस्यजगतां कर्त्तारमीशं परम्।
पूर्णं ब्रह्मजपन्तमीश्वरमथो विद्याधरी नर्त्तनं।
पश्यन्तं शुभगुह्मयोगनिलयं रामो ददर्शानतः ॥१२॥

सूत्रधार :—तमेवमवलोक्य प्रणम्य राम आह। राम उवाच।

राम :— भो भो भगवन् ब्रह्मन् मत्तातेनातिथ्येनार्च्चितः कार्त्तवीर्य्यः कपिलालोभतो मत् पितरमवधीत्, माताच तदनुगता, साम्प्रतं त्वं पितामाता, शरणागतमनाथं मां परिपालय, मां वैरिसूदनं कुरु।

सूत्रधार :—एवं श्रुत्वा ब्रह्मा रामं निरीक्ष्य वक्ति। ब्रह्मोवाच।

ब्रह्मा— अये राम, प्रतिज्ञा ते दुर्लभा, एकदोषेण तज्जातिं हन्तुं इच्छसि, भूमौ बहवो भूपाः शङ्करकिङ्कराः, अतस्त्वं शरणं व्रज।

सूत्रधार :—एवं ब्रह्मणादिष्टो रामस्तं प्रणम्य शङ्करमन्दिरं जगाम। एवं गत्वा रामः शिवलोकं ददर्श।

वामे यस्य शिवापदं हरिपदं दक्षे सदाशोभितम्,
योगेनैव तु योगिना विरचितं पुण्यात्मसंसेवितम्।
दिव्यैः राजपथैः शतैर्विकशितं शैवं पदं तत्परं,
सर्वेषामुपरिस्थितं निरुपमं रामो ददर्शाद्भूतम् ॥१३॥

सूत्रधार :—एवं शिवलोकमवलोक्य तन्मध्यदेशे रामः शाङ्करलयं ददर्श।

रत्नस्तम्भकपाटिभिः शतगृहैरत्नेन्द्रसंनिर्म्मितै-
र्नानाचित्रविचित्ररत्नकलसैराशोभितैः शोभितम्।
प्राकारैर्मणिनिर्म्मितैः परिवृतं क्षीराभमत्युच्छ्रितं
द्वारैः षोडशभियुतं पशुपतेः रामोन्ददर्शालयम् ॥१४॥

सूत्रधार :—एवं दृष्ट्वा पुरतः सुमनोहरे सिंहद्वारे रामो द्वारिणौ ददर्श ।

विशालनेत्रत्रयविकृतास्यौ भस्माङ्गरागौ जटिलौज्ज्वलन्तौ ।
सपट्टिशं शूलवरं दधानौ तौ द्वारिणौ तत्र ददर्श रामः ॥१५॥

एवं दृष्ट्वा तयोरग्रतो रामः सविनयमात्मवृत्तान्तं कथयामास । एवं तद्वाक्यमाकर्ण्य तुष्टौ तौ पुरं प्रवेष्टुं तस्याज्ञां ददतुः । एवं तयोराज्ञया प्रविश्य पुण्यात्मभिः सेवितां समामालोक्य तत्र रामो शङ्करं ददर्श ।

पञ्चास्यं सशिवं शिवं शिवकरं ज्योतिः स्वरूपं परं,
भक्तानुग्रहविग्रहं त्रिनयनं व्याघ्राजिनाच्छादनम् ।
सिद्धेशैः परिसेवितं धृतजटाजूटं विभूतिज्ज्वलद्-
रुद्रक्षेत्रपभैरवैः परिवृतं रामो ददर्शेश्वरम् ॥१६॥

सूत्रधार :—एवं अवलोक्य तां रामस्तुष्टाव । राम उवाच ।

## ( स्तुतिः )

अहं त्वां सदा स्तोतुमिच्छामि शम्भो,
भजे साम्प्रतं निर्म्मलज्योतिरम्भो ।
अजं त्वां शिवं स्तोतुमीशान-देवा
नशक्ताः परं स्तोतुमर्हन्ति के वा ॥१७॥

अनाथं प्रभो पाहि मां दीनबन्धो,
सुराणां पुरोगम्य कारुण्यसिन्धो ।
भजे चारुचन्द्रावतंसं महेशं,
महायोगिसारं मनोवाक्यपारम् ॥१८॥

फणिश्रेष्ठहारं जटाजूटभारं,
वहन्तं महान्तं विभूतिज्ज्वलन्तं ।
शरच्चन्द्रकुन्दावदाताङ्गभासं,
विशेषप्रकाशं धृताभीतिपाशम् ॥१९॥

अतन्त्रं स्वतन्त्रं महाविश्वतन्त्रं,
मुनिध्यानसाध्यं दुराराध्यमाद्यम् ।
धरापोऽग्निरूपं मखेशस्वरूपं,
मरुद्व्योमरूपं रवीन्दुस्वरूपम् ॥२०॥

राम :— भो भो भगवन् हर, भक्तानां स्वप्नादृष्टं त्वां साम्प्रतं स्वचक्षुसा पश्यामि। ममाहो किं भाग्यम्! जन्मनोऽप्यद्य साफल्यम्।

सूत्रधार :—इत्युक्त्वा रामो मुहुः प्रणम्य तच्चरणपद्मे पपात। एवमाकर्ण्य शङ्करो रामं वक्ति। शङ्कर उवाच।

शङ्कर :—अये वटो, कस्त्वं कस्यपुत्रः, कथं स्तौषि, किमिष्टं करिष्यामि वद।

सूत्रधार :—तच्छ्रुत्वा राम उवाच।

राम :— भो भो प्रभो भगवन् भक्तवत्सल, तव किङ्करं जमदग्नेः पुत्रं रामनामानं मां विद्यापण्येन क्रीणीहि।

सूत्रधार :—एवमुक्त्वा शोकार्त्तो रामस्तत्सर्वं तस्मै निवेदयामास।

राम :— भो भगवन् अनाथनाथ, मत्तातेनातिथ्येन पूजितः कार्त्तवीर्यो मत्पितरं कपिलालोभेनावधीत्, मातापि तदनुगता। साम्प्रतमनाथस्य मे त्वं पिता पार्वती च माता। हे नाथ, त्रिसप्तकृत्वो निर्भूपां महीं करिष्यामीति मया प्रतिज्ञा कृता। इति मेऽभीष्टं परिपूरय।

सूत्रधार :—तदेवं रामवाक्यमाकर्ण्य दुर्गाया मुखमालोक्य ईशानो नम्राननः बभूव। ततो रामं कटाक्षेण निरीक्ष्य पार्वती वदति।

पार्वती—अरे विप्र, बालकस्त्वं सहस्राज्जुनं हन्तुमिच्छसि, यस्य कटाक्षतो रावणस्य पराजय स्तं शङ्करः किं करिष्यति ?

सूत्रधार :—ततो भद्रकाल्युवाच।

भद्रकाली—अरे वटो वामनस्त्वं करेण चन्द्रमाहर्तुमिच्छसि ; दिगम्बरसहायेन मद्भृत्यं भूपं हन्तुमिच्छसि।

सूत्रधार :—ततस्तयोरेवं वाक्यमाकर्ण्य शोकार्त्तो रामस्तत्र प्राणां त्यक्तुमुद्यमं चकार। एवमवलोक्य महाकारुणिको भगवान् शिवो विनयेन दुर्गां कालींच सन्तुष्य तयोरनुमत्या रामं प्रत्याह।

शिव :— हे वत्स, शोकं त्यज तवाभिलषितं साधयिष्यामि, अद्य प्रभृति मत्पुत्रसमस्त्वं लीलया निर्भूपां महीं करिष्यसि, मत् प्रसादेन कार्त्तवीर्यं हनिष्यसि।

सूत्रधार :—इत्येवमुक्त्वा शङ्करस्तस्मै पाशुपातादि शस्त्रास्त्रसमेतं सस्तवकवचं कृष्णमन्त्रं सानुष्ठानादिकं ददौ। ततो रामः कतिपयकालं तत्र स्थित्वा शिवं दुर्गां कालीं प्रणम्य तदनुज्ञातः पुष्करतीर्थं गत्वा मन्त्रजपादिना हरिमाराधितवान्। ततस्तदाराधनेन प्रीतो हरिस्तदभिलषितं वरं प्रदायान्तर्दधौ। अथ हरेर्लब्धवरो रामस्तं प्रणम्य निजालयं गत्वा सशिष्यभ्रातृवर्गबान्धवानानीय तैः समं समालोच्य युद्धाय

यात्रां चकार। तदानीं हरिशब्दं जयन्ते भवितेत्याकाशवाणीं चाकर्ण्य जयसूचकान् विप्रादीन् ददर्श।

शुकं पिकं पूर्णघटं तुरङ्गमं
द्वीपं प्रदीपं पतिपुत्रिणीं सतीम्।
सजीवमत्स्यं चटचाटकादिकं
ददर्श रामो जयसूचकं शुभं ॥२१॥

सूत्रधार :—एवं शुभं विलोक्य स्वजयं वैरिक्षयं मनसा विज्ञाय रामः प्रदीपे गत्वा नर्मदा तीरे अक्षयवटमूले तस्थौ। तत्र पुष्पशय्यां निर्म्माय सुप्त्वा रामो निशाशेषे जयशूचकं नाना शुभस्वप्नं ददर्श। ततः प्रातः समुथ्थाय कृताङ्गीकारो रामो भ्रातृभिः समालोच्य सहस्राज्जुनपुरीं दूतं प्रेपयामास। ततो गत्वा दूतो मन्त्रिभिः परितो वृतं सभायां वसन्तं नृपं प्रत्याह। दूत उवाच।

दूत :— भो महाराज, रामेणादिष्टोऽहं इहागतः। त्रिसप्तकृत्वो निर्भूपां महीं कर्त्तुं रामोऽक्षयवटमूलेस्थितः। युद्धाय त्वं तत्रागच्छ।

सूत्रधार :—एवमुक्त्वा दूतो रामनिकटं जगाम। एवं श्रुत्वा युद्धं गन्तुमुद्यतं नृपं तत् प्रियत्तमा मनोरमा सन्निधौ धावयामास। ततो राजा मनोरमां निरीक्ष्य वक्ति। राजोवाच।

राजा— हे प्राणप्रिये, शङ्कराङ्कधवरो युद्धकामो रामो दुःस्वप्नावलोकिनं मां स्फुरद्वामाङ्गमाह्वयते।

सूत्रधार :—ततः स्वामिनो वाक्यमाकर्ण्य रुदन्ती सती मनोरमा सगद्गदा प्रियं प्रत्याह। मनोरमोवाच।

मनोरमा—हे प्राणनाथ, मद्वचनमाकर्णयतां, हरस्य शिष्यः हरेरंशजातो महाबलो रामः, तस्य प्रतिज्ञा कदाचिद्विफला न हि भवेत्। अतस्तच्छरणं व्रज।

सूत्रधार :—तदेवं श्रुत्वा राजोवाच।

राजा— हे प्रिये, तस्य वध्योऽहमिति ज्ञात्वापि तच्छरणं कथं यास्यामि, प्रतिष्ठितस्य दुर्यशो मरणाधिकम्।

सूत्रधार :—अथैवमुक्त्वा राजा नानावाद्यवादनमङ्गलपूर्व्वकं शतकोटिनृपसमेतो युद्धाय समुद्यमश्चक्रे। अथैवं दृष्ट्वा मनोरमा क्षणं वक्षसि निधाय तन्मुखपद्मं पश्यन्ती परम्ब्रह्मणि मनोनिवेश्य प्राणान् तत्याज। अथ तां मृतामवलोक्य सन्नाहं परित्यज्य तां वक्षसि कृत्वा राजा विललाप।

## लेछारी ।

अयि समुत्तिष्ठ मनोरमे न यास्यामि युद्धं निरुपमे
सचेतनीभूय पश्यमान्तु शोकाश्रयम् ।
भार्गवेनसह युद्धवरं नहि करिष्यामि भयङ्करं
साम्प्रतमुत्थाय ब्रजमया सहालयम् ॥२२॥
समुत्तिष्ठ प्राणप्रियेक्षणं पुष्पभद्रानदीतीरवनं
ब्रजमया समं विहाराय रूपवति ।
अथवा मलयाचलवरं चन्दनविपिनमनोहरं
ब्रज तत्र त्वयासह रमिष्यामि सति[13] ॥२३॥

राजा — हे प्रिये, मत् शरीरे चन्दनागुरुकस्तुरीलेपनं कुरु, सुमधुरवचनं वद, कटाक्षं दृष्ट्वा कथं मां न निरीक्षसि ?'

सूत्रधार :— इत्येवं विलप्य नृप उच्चैरुरोद । एतस्मिन्नन्तरे आकाशवाणो बभूव — अये राजन् कथं रोदनं करोषि ? स्थिरोभव, जगदिदं जलवुद्वुदवत् पश्य । सा कमलांशा कमलालयं गता । युद्धं कृत्वा त्वं वैकुण्ठं गच्छ । एवमाकर्ण्य राजा शोकं विहाय पुत्रद्वारा तस्या दाहादिक्रियां समाप्य ससैन्यो युद्धाय गत्वा प्रतिपथममङ्गलं ददर्श ।

स्त्रीयं रुदन्तीमतिमुक्तकेशिनीं धवात्मजाभ्यां रहितां स डाकिनीम् ।
शठं खलं पिण्डतिलं समोटकं ददर्श राजाशुभमेवमादिकम् ॥२४॥

सूत्रधार :—इत्यादिकमशुभं दृष्ट्वापि राजा निःसङ्कोचं गत्वा रणाजिरं प्रविवेश । ततो राममवलोक्य रथादवरुह्य राजा दण्डवन्ननाम । एवं नतं नृपमालोक्य रामस्तस्मै स्वर्गं याहि इत्याशीर्व्वादं ददौ । अथ रामो नृपं प्रति वक्ति, राम उवाच ।

---

१३ । मनोरमे समुत्तिष्ठ न यास्यामि रणाजिरम् ।
सचेतना मां पश्येति विलपन्तं मुहुर्मुहुः ।
मनोरमे समुत्तिष्ठ मयासार्द्धं गृहं ब्रज ।
नकरिष्यामि समरं भृगुणा सह भामिनि ।
मनोरमे समुत्तिष्ठ नन्दनं ब्रजसुन्दरि ।
पुष्पभद्रा नदीतीरे विहरिष्यामि निर्जने ।
मनोरमे समुत्तिष्ठ मलयं ब्रजसुन्दरि ।
तया सार्द्धं रमिष्येहं तत्र चन्दनकानने ॥ ब्र. वै. पु. (गणेश) ३५।६-१२

राम :— अये राजन्, चन्द्रवंशजातस्य धामतः तव कथं कुबुद्धिजाता ? मत् पित्रातिथ्येनार्चितेन त्वया कथं निरीहो विप्रो हतः ? शोकार्त्तो माता च तदनुगता, तयोर्वधेन परत्र ते किं भविष्यति ?

सूत्रधार :—इत्यादिकमुक्त्वा रामो विरराम। तदेवं श्रुत्वा राजा रामं प्रत्याह।

राजा—अये राम, रागान्धेन राज्ञा मया रागतो धेनुभिक्षा कृतेति दोषं पश्यता निरीहेन विप्रेण तत्पित्रा कथं बहवो नृपा हताः ? साम्प्रतं त्वं प्रतिज्ञां पालय।

सूत्रधार :—इत्यादिकं सयुक्तिकं बहूक्त्वा राजा विरराम। तदेवमाकर्ण्य रामेणादिष्टो भ्रातृवर्गो युद्धाय समुत्तस्थौ, ततस्तानेवमवलोक्य राज्ञादिष्टो मत्स्यराजोऽप्युत्तस्थौ। ततस्तेषां नाना शस्त्रास्त्रप्रक्षेपैर्महद्युद्धमभूत्। ततो दिव्यास्त्रेण मुनयो राज्ञः सरथं सारथिं सशरं धनुः सन्नाहं च चिच्छिदुः। नृपमेवमवलोक्य मुनिस्तं हन्तुं शूलं दधार। एतस्मिन्नन्तरे आकाशवाणी बभूव।

आकाशवाणी—हे मुने तस्यराज्ञो ब्रह्माण्डविजयं नामकवचमस्ति। तद्याचनेनानीय तं मारय।

सूत्रधार :—एवं श्रुत्वा रामो धृतसन्यासिवेशो याचनेन तत् कवचमादाय मत्स्यराजम् अवधीत्। अथ तं पतितमालोक्य कार्त्तवीर्य्येण प्रेषिता बृहद्बल-सोमदत्तादयो राजानो युद्धायाजग्मुः। तेचागत्य शरजालैः रामभ्रातृवर्गान् वारयामासुः। अथैवमवलोक्य ज्वलदग्निशिखोपमो रामो नानाशस्त्रास्त्रैः बृहद्बलादीन् वीरानवधीत्। तदैवं तान् हत्वा रामः सुचन्द्राख्यं नृपं हन्तुं नागास्त्रं चिक्षेप। तदानीं नृपो गारुडेन नागास्त्रं चिच्छेद। एवं तच्छित्वा राजा पुनःपुनर्जहास। ततः क्रोधार्त्तो मुनिः तं हन्तुं नारायणास्त्रं चिक्षेप। शतसूर्य्यप्रभं तत् शस्त्रमागतमालोक्य राजा रथादवरुह्य न्यस्तशस्त्रो नारायणं शिवञ्च प्रणनाम। तं नतं दृष्ट्वा तदस्त्रं नारायनान्तिकं जगाम। ततो रामेन मुषलादि शस्त्रास्त्रं यद् यत् क्षिप्तं तत् सर्वं राजा जग्रास। अथ राम स्तज्जयोपायं नावलोक्य भीतो भक्त्या दुर्गां तुष्टाव।

## ( स्तुतिः )

राम :—

भजे महेशगेहिनीं मदीयवैरिमर्दिनीम्।
अशेषलोकमातरं त्रिलोकपावनीं परम् ॥२५॥
त्वदीय पादपङ्कजे मतिर्ममास्तु शैलजे।
भव प्रसन्नतावती ममाखतोषिणीसती ॥२६॥

प्रसीद भक्तवत्सले प्रसीद सर्वमङ्गले ।
प्रसीद पङ्कजेक्षणे प्रसीद पङ्कजानने ॥२७॥
शरणं यामि ते पदे प्रतिज्ञां सार्थकीं कुरु ।
त्वयि मे विमुखायां च को मां पातुमिहेश्वरः ॥२८॥
यो युष्माभिर्वरोदत्तः शिवलोके पुरामम ।
तमेव सकलं कर्त्तुं त्वमर्हसि हरप्रिये ॥२९॥

सूत्रधार :—एवं स्तुतिं श्रुत्वातिप्रसन्नागत्य चण्डी 'मा भैः' रामेत्युक्त्वान्तधीयत। एतस्मिन्नन्तरे ब्रह्मा तत्रागत्य रामं प्रत्याह। ब्रह्मोवाच।

ब्रह्मा— हे राम, तस्य कण्ठे कालीकवचं विद्यते, तद्याचनेनानीय तं जहि।

सूत्रधार :—एवं ब्रह्मणोपदिष्टो रामो धृतसन्यासिवेशो गत्वा याचनेन कवचमादाय शूलेन सुचन्द्रमवधीत्। अथैवं तस्मिन पतिते तत्पुत्रेण पुष्कराख्येन सह सप्ताहं संयुध्य रामः सबान्धवं ससैन्यं तं ब्रह्मास्त्रेण जघान। अथ तेषु पतितेषु द्विलक्षाक्षौहिणीसैन्यवृतः सुवर्णरथमारुह्य कार्त्तवीर्य्यो नृपः स्वयं युद्धाय समुत्तस्थौ। तदानीमुभयसैन्ययोर्म्महद्युद्धमभूत्। ततोऽर्ज्जुनबाणपीडिता सशिष्या रामभ्रातृवर्गाः सर्व्वे पलायिताः। ततो रामार्ज्जुनयोर्नानाशस्त्रास्त्रक्षेपैर्म्महद् भयङ्करं युद्धं बभूव। तदानीं शिष्य रक्षनार्थं भगवान् दत्तात्रेयस्तत्राजगाम। ततो राज्ञा शूलेन हतो रामो रणमूर्द्धणि पपात। तदा तं पतितमालोक्य ब्रह्माविष्णुशिवादयो भीताः सर्वे तत्राजग्मुः। एवमागत्य शङ्करो महाज्ञानेन रामं जीवयामास। ततो सचेतनीभूय रामः पुरतो देवानालोक्य भक्त्या तान् प्रणम्य अर्ज्जुनं हन्तुं पाशुपातास्त्रं जग्राह। एतस्मिन्नन्तरे आकाशवाणी बभुव।

आकाशवाणी—भो शम्भो, तस्य दक्षिणबाहौ कृष्णकवचं विराजते, भिक्षया तदानीय तं घातय।

सूत्रधार:—इत्येवमाकाशवाणीमाकर्ण्य शङ्करो विप्ररूपं धृत्वा भिक्षया तत् कवचं जग्राह। अथैदानीं रामो राज्ञासमं कृतसम्वादो ब्रह्मास्त्रेण राजसैन्यं हत्वा पाशुपातेन तं कार्त्तवीर्यार्जुनाख्यं नृपं जघान। तत एव शिवं स्मरन् रामो गर्भस्थं मातृक्रोडस्थं शिशुं वृद्धं मध्यमं च क्षत्रियं हत्वा त्रिसप्तोकृत्वो निर्भूपां महीं लीलाय चकार। ततो रामः प्रतिज्ञामेवं सफलीकृत्यो हरिं स्मरन् स्वालयं जगाम। ततो महेशास्तस्य पर्शुणा रमणं दृष्ट्वा पर्शुराम इति नाम चक्रे। अथ देवादयो राममूर्द्धि पुष्पवृष्टिं चक्रुः। दिवि दुन्दुभयो नेदुः, हरिशब्दो बभूव। ततो ब्रह्मभृगुशुक्रच्यवनादयो ब्रह्मलोकादागता रामेण दण्डवत् प्रणतास्तस्याशिषं चक्रुः। अथ ब्रह्मा तातेति वदन् राममङ्क निधाय आह।

ब्रह्मा— हे वत्स राम, उत्तरोत्तर जनकान्नदातृ-मातृस्वामीष्टदेवेभ्यो मन्त्रदो गुरुः श्रेष्ठ इति श्रुतिश्रुतमतस्त्वं शङ्करं गुरुं शरणं व्रज।

सूत्रधार :—एवं ब्रह्मनादिष्टो रामो गुरुं शिवं तत् पत्नीश्च प्रणमितुं कैलासं जगाम। तदैवं गत्वा रामः शिवपुरं प्राप्य नन्दीश्वरादीनालापैः सन्तुष्य निरुपममन्तर्द्वारं प्रविवेश। एवं प्रविश्य तस्य वामे कार्त्तिकं दक्षिणे गणेशं वीरभद्रादिकं चावलोक्यान्तःपुरं प्रवेष्टुं मनश्चक्रे। एवं अवलोक्य गणेशो रामं प्रति वक्ति।

गणेश :— हे भ्रातः, क्षणं तिष्ठ, महेशनिर्देशमादाय त्वया समं यास्यामि।

सूत्रधार :—एवं श्रुत्वा रामो वदति। राम उवाच।

राम :— हे भ्रातः, यस्य प्रसादान्मत् प्रतिज्ञा सफलाजाता तं सत्यं शान्तं गुरुं प्रणमितुं साम्प्रतं यामि।

सूत्रधार :—एतदाकर्ण्य गणेशो रामं प्रति पुनर्व्वक्ति। गणेश उवाच।

गणेश :—हे भ्रातर्मद्वचनमाकर्ण्यताम स्त्रीसंसक्तं पुरुषं यः पश्यति स नराधमः पापीयानिति श्रुतिश्रुतम्। अतः क्षणं तिष्ठ।

सूत्रधार :—एवं श्रुत्वा क्रोधार्त्तो रामः प्रहस्याह। राम उवाच।

राम :— अहो गणेश, तद्दोषः कामिनां, निर्व्विकारस्य शिशोन, क्रीडालज्जादयो भ्राम्यस्य, नेश्वरस्येति मया श्रुतौ श्रुतम्। तव पितामाता ममैवापि, किन्ते तिष्ठेति वचसा ?

सूत्रधार :—इत्युक्त्वा गच्छन्तं रामं गणेशो वारयामास। ततोऽति क्रुद्धो रामः पुनः पुनः प्रहस्य मनसा हरिहरौ प्रणम्य परन्तुं परशुं प्रक्षेप्तुं मनश्चक्रे। एवमालोक्य गणेश उवाच।

गणेश :—अये विप्र त्वमस्माकं प्रियशिष्यः, अतस्त्वामहं सहे, नाहं कार्त्तवीर्य्यः क्षुद्रजन्तुः, विश्वेश्वरात्मजं मां न जानासि ?

सूत्रधार :—इत्युक्त्वा योगेशो गणेशः हस्तं दीर्घीकृत्य रामं धृत्वा भूर्लोकादि सप्तलोके भ्रामयित्वा ब्रह्माण्डं दर्शयामास। ततश्च सप्तसागरान् पीत्वा पुनरुद्गीरणं कृत्वा तदुदके रामं समर्प्य पुनस्ततो गणेशो जग्राह। पुनश्च स एवं तं भ्रामयित्वा लक्ष्मीविष्णुसमेतं वैकुण्ठं प्रदर्श्य क्षणं भ्रामयित्वा गोलोकस्थितं गोपगोपीसमावृतं श्रीकृष्णं प्रदर्श्य भूमौ पुनः संस्थापयामास। ततः कृष्णदर्शनेन तत्क्षणं रामस्य भ्रूणहत्यादि पापक्षयो बभूव। ततः अति क्रुद्धो रामो गणेशं प्रति परशुं चिक्षेप। तदानीं गणेशः पितुरव्यर्थशस्त्रमागतं दृष्ट्वा दन्तेन जग्राह। ततः परशुर्निपत्य समूलकं दन्तं छित्वा पुनश्च रामहस्तं जगाम। ततस्तत्क्षणं दन्तो महाशब्दं कुर्व्वन् भूमौ सलोहितः पपात। एतस्मिन्नन्तरे दिवि देवाः हाहेतिशब्दं चक्रुः, पृथिवीच भीता

चकम्पे, कार्त्तिकादयो भूमौ पेतुः, कैलासस्थाः सर्व्वे मूर्च्छामापुः। ततः ससम्भ्रमं शिवयासह शिव आगत्य सरक्ताननं गजाननं ददर्श। अथ देवी कार्त्तिकमुखाद्वृत्तान्तमाकर्ण्य मुहुर्विलप्य क्रोधार्त्ता स्वामिनं प्रत्याह। देव्युवाच।

देवी— भो नाथ, पुत्रशिष्ययोः कस्य दोष इति विचारय, वीरभद्रादयः साक्षिणः सन्तु।

सूत्रधार :—इत्युक्त्वा दुर्गा परशुरामं निरीक्ष्य वक्ति।

देवी— अरे राम, अस्माद्गुरोः परशुं प्राप्य, क्षत्रिये परीक्षां कृत्वा त्वया गुरुपुत्रस्य दन्तो भग्नः इत्युचितं दक्षिणां गुरवे त्वं ददासि। गणेशं जित्वा, शिवं हत्वा लोकपूजितो भव।

सूत्रधार :—इत्युक्त्वा देवी रामं शप्तुं उद्यमं चक्रे। एतस्मिन्नन्तरे रत्नालङ्कृतोऽतिमनोहरो विप्रः स्थिरमुद्रां दर्शयन्नाजगाम।

तुलसीदलमालयान्वितः सितदन्तो धृतदण्ड एक तिलकोज्वलः।
द्विजबालक आययौ तदा सकुमारीशिशुरुज्ज्वलाङ्गकः ॥३०॥

तदेवमागतं दृष्ट्वा देवी भूमौ दण्डवत् प्रणनाम। अथ सानुचरः शङ्करस्तं षोडशोपचारैः सम्पूज्याह। शङ्कर उवाच।

शङ्कर :—भो ब्राह्मण, त्वामतिथिं प्राप्य ममाद्य जन्म सफलं भूतम्।

सूत्रधार :—एतदाकर्ण्य तुष्टो हरिः मेघगम्भीरया वाचा तं प्रत्याह। हरिरुवाच।

हरिः— हे हर, युष्माकं कोलाहलमाकर्ण्य श्वेतद्वीपादागतोऽहम्। हे भवानि, कार्त्तिकगणेशौ यथा ते पुत्रौ रामोऽपि तथा। त्वं सर्व्वज्ञो विचार्य्य यथोचितं कुरु। तव पुत्रस्य वेदोक्त नामानि च शृणु।

एकदन्तोगणेशश्च हेरम्बोविघ्ननायकः।
लम्बोदरः शूर्पकर्णो गजाननो गुहाग्रजः ॥३१॥

सूत्रधार :—इत्येवं हरिः नामाष्टकमुक्त्वा देवीं बोधायित्वा रामं प्रत्याह।

हरिः—हे राम, त्वमपराधी, स्तुतिभिः दुर्गागणेशश्च सन्तोषय।

सूत्रधार :—इत्युपदिश्य हरिर्जगाम। एवं हरेर्व्वाक्यमाकर्ण्य रामो गङ्गायां स्नात्वा धृतधौतवस्त्रो भक्त्या जगदम्बामाम्बिकां तुष्टाव।

## ( स्तुतिः )

जगत् स्रष्टुकामस्य कृष्णस्य वृन्दा-
वने देहजाता पुरा राधिकाख्या।
ससिन्दुरविन्दुः शुभा षोडशाब्दा,
ज्वलन्मालतीमालया मण्डिताङ्गा ॥३२॥

मुदाविभ्रती चारुमूर्त्ति स्मितास्या,
यया सृष्टिमिष्टां चकाराशुकृष्णः ।
त्वमेवासि सा भो भवानि प्रतीता,
शचीरोहिणीमुख्यदेवाङ्गनांशाः ॥३३॥
स्त्रियोमूर्त्तिभेदा जगदम्बिके ते,
क्षुधात्वं तृषात्वं भवे साररूपे ।
गृहे गेहलक्ष्मीर्नृपे राजलक्ष्मीः,
तपस्या तपोवर्त्तिनां बुद्धिरूपा ॥३४॥
सतां सत्यरूपा त्वमेवाम्बिके भो,
जगद्बीजरूपा सुनेत्रा सुरूपा ।
जले शैत्यरूपा विधौ कान्तिरूपा,
क्षितौ गन्धरूपा नभःशब्दरूपा ॥३५॥
यदादेशतो वातिवातो विवस्वान्,
जगद्ध्वान्तहीनं करोति प्रकाशैः ।
दहत्यग्निरिन्द्रः करोत्येववृष्टिं,
जगल्लोकनाथोऽजंत् पाति-पाता ॥३६॥
स्वकाले हरः संहरेत्तां नमामो,
जनन्या नकोपोऽपराधेशिशूनाम् ।
शिशुं मां सदा रक्ष रक्ष त्वदीयं,
मदीयापराधं क्षमस्व क्षमस्व ॥३७॥

सूत्रधार :—एवं स्तुत्वा रामः पुनः पुनः दुर्गां प्रणनाम । ततस्तुष्टा दुर्गा रामं प्रत्याह ।
देव्युवाच—

देवी— हे वत्स राम, मत् प्रसादात्त्वं चिरजीवी भव, सुस्थिरतां व्रज, हरौहरे च ते भक्तिरस्तु, सर्व्वत्र जयोऽस्तु ।

सूत्रधार :—इत्येवं वरं दत्त्वा दुर्गान्तःपुरं ययौ । ततो हरिंहरिरिति शब्दो बभूव । ततो हृष्टो रामो गणेशं सम्पूज्य तुष्टाव । राम उवाच ।

वन्दे गणपतिं देवं हेरम्बं विघ्ननाशकम् ।
लम्बोदरं शूर्पकर्णमेकदन्तं गुहाग्रजम् ॥
पुनश्च नौमि देवेशं गजवक्त्रं शुभप्रदम् ।
कविसूर्यद्विजे दीने वाञ्छितार्थप्रदं व्रतम् ॥३८॥

सूत्रधार :—एवं स्तुत्वा नत्वा रामस्तपसे वनं जगाम। एवं गणेश्वरोऽपि शिवाशिवान्तिके उवाच।

अथ कविर्नाटकान्ते निजनाथं शिवनाथं स्तुवन् स्वदेशाधिपं सामाजिकांश्चाशास्ते।

## ( स्तुतिः )

भजे भवेशमीश्वरं मुणीन्द्रवन्दितं परम्।
कृतार्द्धचन्द्रशेखरं शरत्शशाङ्कभास्वरम् ॥३९॥

अनङ्गकोटिसुन्दरं जटाच्छटामनोहरम्।
अनाथनाथशङ्करं गिरीन्द्रनन्दिनीवरम् ॥४०॥

विभूतिभूषिताङ्गकं प्रसूनवाणनाशकम्।
स्फुरत्कपालमालकं दरिद्रदुःखमोचकम्॥४१॥

धृताक्षशूलटङ्कं विशेष वक्त्रपञ्चकम्।
पवित्रनाममङ्गलं वृषेन्द्रवाहनोज्ज्वलम् ॥४२॥

भवाब्धिसारपारदं भजत्स्ववाञ्छितप्रदम्।
जगन्निदानमव्ययं त्रिलोकनाथमद्वयम् ॥४३॥

अपरञ्च—

यश्चन्द्रार्द्धमधादमन्दशिरसा मन्दाकिनीं मौलिना,
भूतेन्द्रं शरदिन्दुकुन्दधवलं सानन्दनन्दिप्रियम्।
तं वृन्दारकवृन्दवन्दितपदद्वन्द्वारविन्दं मुदा,
वन्दे स्कन्दगणेन्द्रनन्दनमुमानन्दं सदानन्दिनम् ॥४४॥

अङ्गं वङ्गं कलिङ्गं मगधगवकुरून् भोटकर्णाटलाटान्,
काशीकाश्मीरगौडान् द्रविडमणिपुरौ दुर्दमानूरम्यहर्म्यान्।
अन्यान् देशान् निशेषान् प्रबलरिपुगणान् स्वर्णपूर्णाजिषीत,
यो दोर्दण्डैः प्रचण्डैर्भवतु सकुशली कामरूपाधिनाथः ॥४५॥

मूर्खं गीष्पतिनासमं कवितया मूकं जनं वाग्मिनम्,
निष्पापं कुरुतेऽपि पापनिरतं सार्थं निरर्थं जनम्।
वन्ध्यां पुत्रवतीं सदृष्टिसहितं जन्मान्धकं यत्कृपा,
पङ्गुं लङ्घयते गिरीन्द्रशिखरं पायात् स वो केशवः ॥४६॥

पृथ्वीभुजाचलशशाङ्कमिते शकाब्दे याते वृषं दिनकरे द्विजराज वारे।
जाते च नाटक इह त्रितयाङ्कपूर्णे मात्सर्यदोषरहिता सुधियो भवन्तु ॥४७॥

यो भक्त्या परया सदाशिवमुमानन्दं सदासंस्थितं,
भस्माद्रेः शिखरे सयोगिनिकरे कैलासशैलोपमे ।
सानन्दं समपूजयद्धरपरो गोविन्दनामाद्विजो,
काव्यज्योतिष··················जगन्मण्डले ॥४८॥

तस्यात्मजः श्रीकविसूर्यनामा श्रीशम्भुपादाम्बुरुहैकधामा ।
पुटाञ्जलिः प्रार्थयते कवीन्द्रान् ख्यातं············॥४९॥

गौरीकान्तनिजाभिधानविदितो विप्राद् य आदभोवान्,
नाम श्रीकविसूर्यइत्यपरकं मह्यायणो ब्राह्मणः ।
भारद्वाजपवित्रगोत्रजनिना विघ्नेशजन्मोदये,
नाटे तेन मनीषिणा विरचिते यातोऽयमङ्कःपरः ॥५०॥

---

# शङ्खचूडवधम्

## प्रथमोऽङ्कः

विद्याकण वशीकृता हृदि यदा विद्याक्षपां शाश्वतं,
यज्ज्योतिर्विदुपामुदेति सततं स्वान्ते प्रशान्तीकृते ।
जीवे ब्रह्मणि भेदरूपविरहा योगादजं भास्वतं,
नित्यानन्दमुपास्महे भगवतो ब्रह्मेशविष्णोःपदम् ॥१॥

अपिच—

राधावाणीकुमुद्वतीकमलिनी दाक्षायणी पद्मिनी,
नाथं देवमनाथनाथमथ तं श्रीदेवकीनन्दनम् ।
नौमीन्द्राद्यसुरारिजालकलितस्वस्वाधिकारर्द्धिदं,
दैतेयारणिराशितीव्रदहनं मायाविहीनं विभुम् ॥२॥

अथ कविः मन्त्रिणं प्रत्याशीर्व्वादमाह ।

श्रीमान श्रीशक्रवंशोद्भवनृपतिरतीकान्तसंक्रान्तमूर्त्तिः,
नानाभूपालशीर्षप्रणतपदयुगोऽमित्रपक्षे कृतान्तः ।
तत्श्लाघ्योऽमात्यमुख्यः सकलबुधजनप्रीतिदः शुभ्रकीर्त्तिः,
सन्दिकेवंशजन्मा जयति विमलधीः श्रीवृहत्फुकनोऽसौ ॥३॥

नान्द्यन्ते सूत्रधार :

श्रीमदमरनिकरवरकिरीटकोटिकुट्टमणिभिरञ्चितचरणनलिनेन, हरविरिञ्चिसञ्चिततनुवैभवस्वभावनिर्जितोर्जितातनुसहस्त्रेण, कलकण्ठकीकिलकण्ठीरवसटासक्तारक्तलोचनमोचनोत्तुङ्गमातङ्गरिङ्गमाणगुरुपुर्य्यवस्थाधीश्वरेण, लक्ष्मीविलासलासितान्तःस्फुरणसरणेन, श्रीमताहृदयसरसीरुहशायिना नारायणेन शङ्खचुडवधाख्यनाटकमभिनेनुमादिष्टोऽस्मि । तदद्याभिनयामि, सभासद तत्पश्यत ।

अथ सूत्रधारः सामाजिकान् प्रत्याह—

क्षीराम्भोधिसुता सुरेशतटिनीवाणीविवादैः समं,
तीव्रैर्वेदवतीतपःसमुदयैः शाकं मनीषामृताः।
देवनामरिशङ्खचूडवधनाटं तुलस्युद्वाहयुतं,
शृणुताद्दतबुधसभासद्भिरतत् किल नाटकम् ॥४॥

अपिच—

यादेव्यः सततं हरेरनुगताः सौभाग्यशीलान्विताः,
दाक्षिण्यादिगुणैः प्रमादजनकैः संप्रीणयन्त्योहरिम्।
भावैर्विश्वसृजेच्छयाकलहतः पृथ्वीतलेजज्ञिरे,
तत्सर्वं हरिभक्तिदं प्रमुदिताः पश्यन्त्विदं सज्जनाः ॥५॥

अलमति विस्तरेण। अथ भट्टिमा।

जयघनसुन्दरश्यामकलेवरपीतवसनयुगधारी।
मस्तकरञ्जितकिरीटिसुवेशित मुनिमनमोहनकारी ॥६॥

चारु चतुर्भुज-करतलनीरुजविधृतअस्त्रविशेष।
कुण्डललोलितगण्डप्रकाशितशशीधररुचिरसुवेश ॥७॥

कण्ठविलुण्ठितचारुमनोनीत-कनकविलोकितहार।
नयनकमलदल-मुखशशीमण्डल भ्रूवयुगमदनविकार ॥८॥

चारुनलिनदलनिन्दितपदतलमञ्जुलमञ्जीरघोष।
मृगयूथमर्दनसिंहविलक्षण वक्षसि रोमविशेष ॥९॥

गिरिवरधारण गोकुलतारण खण्डितसुरपतिदर्प।
अघबकनाशन-केशीविघातन-मर्द्दितकालियसर्प ॥१०॥

भवविधिसंस्तुत श्रुतिगणसंगीत गुणगणकीर्त्तनतोष।
शेषसहस्रवदनाजस्रकीर्त्तितकीर्त्तिविशेष ॥११॥

यदुकुलतारण-कंसविनाशन-मर्द्दितचानुरवीर।
सन्ततनिजजनदुःखविमोचनविधृतमनुजशरीर ॥१२॥

दानवखण्डन-गोपिनीरञ्जन-मर्द्दितमहीगुरुभारम्।
नौमि परेशं ब्रह्मविशेषं मुनिजनकृतहृदिहारम् ॥१३॥

माधवकेशवजलधिसुताधव तवचरणे पतितोऽहम्।
भवहृदनीरे विगलितपारे कलिभलजनितप्रदाहम् ॥१४॥

तवपदकमले सरसिजविमले भवतु सदा मम वासम्।
हे निजबन्धो करुणासिन्धो वितरय ममाभिलासम् ॥१५॥

अथ मादङ्गिको वदति—

मार्दङ्गिक :—अये सूत्रधार किमद्यप्रस्तुतं भविष्यति।

सूत्रधार :—अये मार्दङ्गिक त्वं पात्रपटलपटीयान्। अद्य वैकुण्ठे वसतो नारायणस्य विवदमानानामन्योन्यं शपयन्तीनां गङ्गालक्ष्मीसरस्वतीनां महत्कलहोऽभूत्। तत् श्रुत्वा ताः शान्तयन् शापस्यान्तं दत्वा यत्कृतवान् तत् पश्यत, पश्यत।

तत् श्रुत्वा मार्दङ्गिको वदति।

मार्दङ्गिक :—आः किमहोभाग्यमस्माकम्। कोटिकोटि निर्म्माणदक्षस्य भगवतस्तिसृणां भार्य्याणां गङ्गालक्ष्मीसरस्वतीनां कलहपूर्वकं शापं हरिकर्त्तृकतुलस्यात्रतमङ्गञ्च हरद्वाराशङ्खचूडवधरूपं भगवल्लीलामहामहोत्सवञ्च वयं पश्यामः।

सूत्रधार :—इत्युक्त्वा सानन्दं मृदङ्गं वादयति। अथ कविः हरिं स्तौति।

योयं देववरो दधार विपुलं मीनादिरूपं पुरा,
तस्येदं चरितं पुराणगुणितं पश्यन्तु सर्वेजनाः।
कान्तानां कलहं बभञ्जनितरां प्रादाच्च शापान्तताम्,
तं देवासुरवन्दिताङ्घ्रियुगलं वन्दे विभुं श्रीहरिम् ॥१६॥

अपिच—

शृणुत सकल सर्व एते हरेर्वै चरितमिदमपूर्वं मुक्तिदं सारभूतम्।
अजभवसुरवर्य्यैर्दुर्निरीक्ष्यं समन्तात् सकलशुभनिधानं हर्षदं सज्जनानाम् ॥१७॥

सूत्रधार :—एतस्मिन् अन्तरे लक्ष्मीसरस्वतीगंगामि सह नानापार्षदगणैः परिवृतो भगवान हरिः समां प्रविवेश। तत्पश्यत शृणुत निरन्तरं जयजय कृष्णेति वदत।

## ( गीतम् )

राग—चालेङ्गी।

विराजे वैकुण्ठे नारायण।
माथातकिरीटउज्वले वनमाला गले लोले
रुचिर देखिय चारिभुज।
केयूर कङ्कण राजे चरणे नुपुर वाजे
रूपे काल विग्रह निरूज ॥१८॥

चन्दने चर्चित अङ्ग　　पद्तल गौर अङ्ग
आसि प्रवेशिला सभामाजे।
सङ्गे पारिषद् चय　　सवे चतुर्भुजमय
पद्मा गङ्गा वाणी संगे राजे ॥१९॥
योगी याक यत्नकरि　　सदाये धियान धरि
स्वप्ने नेदेखय यार पद।
दीन द्विजे वोले वाणी　　शुनियो रसिक प्राणी
धन्य धन्य वैकुण्ठ सम्पद ॥२०॥

सूत्रधार :—अथ श्रीहरिसन्निधौ गंगामहालक्ष्मीसरस्वत्यः प्रेम्ना तस्थिरे। तस्मिन् समये गंगा सकटाक्षं हरेर्मुखं निरीक्षमाणासती किञ्चिज्जहास। तद्दृष्ट्वा हरिः कियद् हसनं चकार। तयोरन्योन्यहसितं दृष्ट्वा सरस्वती रक्तलोचना क्रोधयुक्ता बभूव। अथ क्रोधयुक्तां महाविद्यां निरीक्ष्य तां सान्त्वयन्ती लक्ष्मीरुवाच।

लक्ष्मी :—हे हे सरस्वति, मायया सह कः पुरुषः रोषहासदिकं न करोति? तत्र अस्माकं कोपेन किं भविता। अतः क्रोधं संजहि।

सूत्राधार :—ततो महालक्ष्म्याः प्रबोधनेनापि सा नचशान्ता अति कोपेनोज्ज्वलिता स्वामिनं भर्त्सयन्ती आह।

सरस्वती—अये स्वामिन् त्वमस्माकमसद्भर्त्तासि। अन्यस्यैवं सत् स्वामिनः भार्यासु विषमा-बुद्धिर्न भवति, यतः गङ्गायां तवाधिका प्रीतिर्वर्त्तते। कमलायामपि कियदस्ति, मयि तु तव किञ्चिदपि प्रीतिर्नास्ति। अपरञ्च लक्ष्म्यासह अधिकतरा प्रीतिः, अतः असौ क्षमाञ्चक्रे। बन्धुहीना तव प्रेमवञ्चिताहम्। सपत्न्याः ममाग्रे उन्नतिं कथं सोढुं शक्नोमि।

सूत्रधार :—सरस्वत्याः एवं निष्ठुरवचनं निशम्य लज्जया नम्रवदनः मनसि तत्कलहमेवालोच्य हरिः बहिः सभां जगाम[२]।

अथ नारायणे याते वाणी प्रस्फूरिताधरा।
निष्ठुरैर्वचनैर्गङ्गां भर्त्सयन्तीत्युवाच सा ॥२१॥

---

२। सरस्वतीवचः श्रुत्वा दृष्ट्वा तां कोपसंयुताम्।
मनसातु समालोच्य स जगाम बहिः सभाम् ॥
गते नारायणे गंगामवोचन्निर्भयं रुषा।
वागधिष्ठात्री देवी सा वाक्यं श्रवणदुःसहम् ॥
(ब्रह्मवैवर्त्त, प्रकृति खण्ड) ६।२८

एवं नारायणे सदसि प्रविष्टे सा सरस्वती गंगां निर्भत्सयामास ।

सरस्वती—अये निर्लज्जे. ममाधीनोऽयं स्वामीति मत्वा अस्मान् स्वामिसौभाग्यं दर्शयसि। अद्य तव मानचुर्णं करोमि । पश्य, तव कान्तः हरिः मां किं करिष्यति ।

सूत्रधार :—इत्युक्त्वा सरस्वती अतीव कोपेन कम्पमाना सती गङ्गायाः केशं ग्रहीतुमुद्यमं चक्रे । तत स्तां कोपयुक्तां केशग्रहणद्यतां दृष्ट्वा तयोर्मध्ये स्थिता सती महालक्ष्मी-र्निवारयामास । ततो गङ्गाय हितकर्त्री मध्यगतां महालक्ष्मीं शशाप । सरस्वत्युवाच ।

सरस्वती—अये लक्ष्मी, एतद्विपरीतं दृष्ट्वा किमपि नोक्तासि। त्वमपि मामेव निवारयसि। अतो भारते सरितृक्षरूपा भव।

सूत्रधार :—ततः सत्त्वमयी सा महालक्ष्मीः सरस्वत्या शप्तापि असन्तुष्टमानसा तस्याः हस्तयोर्गृहीत्वा मध्ये तस्थौ। अथ महालक्ष्म्याः शापं निशम्य गंगा कोप-ज्वलिता प्रत्युवाच।

गङ्गा— हे पद्मे, सदाकलहयुक्तामेनामुत्सृज। वाक्यदुष्टा इयं मां किं करिष्यति। अद्य अस्याः मम च बलं पश्य।

सूत्रधार :—एवमुक्त्वा सा गङ्गा तां सरस्वतीं शशाप। गङ्गोवाच।

गङ्गा— अये कलहप्रिये, तवाद्य मानं करोमि। निरपराधां पद्मां कथं शप्तासि, अत स्त्वमपि सरिद्रूपं याहि ।

सूत्रधार :—ततो गङ्गाया इदं निष्ठुरं शापरूपवचनं निशम्य तामपि अशपत्। सरस्वत्युवाच ।

सरस्वती :—अये पतिवल्लभ निर्लज्जे गंगे, भारते सरिद्रूपा भव, तयि स्नात्वा पापिनो पापानि मोक्ष्यन्ति। तैः पापैः त्वमपि पापयुक्ता भविष्यसि ।

सूत्रधार :—अथ भगवान् श्रीहरिः तासां कलहं शापांश्च ज्ञात्वा पार्षदप्रवरैः सहाभ्यन्तरं जगाम । तत् पश्यत शृणुत निरन्तरं जय जय श्रीकृष्णेति वदत ।

## ( गीतम् )

राग—वरारी ।

ताल—एकताल ।

नवघन रुचिर सवेश श्यामराय ।
पीतवस्त्रे प्रकाशय सौदामिनी प्राय ॥ २॥
त्रिवलिर्वलित गले कौस्तुभेर ज्वाला ।
आजानुलम्बित बाहु आछे वनमाला ॥ २३॥

तात परि भ्रमरे सदाये करे रोल ।
सर्वक्षणे देखि लक्ष्मी कामे पावे मोल ॥२४॥
कोटि कन्दर्परमूर्त्ति जिनिया प्रकाशे ।
पार्षद प्रवरे वेरि आछे चतुष्पाशे ॥२५॥

सूत्रधार :—ततः परस्परं शापप्राप्तानां तासां गङ्गादीनां सम्वन्धि सान्त्वनारूपम् इदं वाक्यं हरिरुवाच ।

हरि :— हे गङ्गालक्ष्मीसरस्वत्यः, यूयं कलहं त्यजत । एवं विधे सति युष्माकं का सुख-प्रीतिभविता । अहो युष्माकमीदृक्कलहो भारते लोक पावनाय भवति ।

सूत्रधार :—ततस्ताः भगवद्वाक्यं शृण्वन्त्यः प्राप्तस्वरूपज्ञानाः असूयां परिहृत्य मौनीभूय तस्थुः ततः सत्त्वमयी पद्मा नम्रवदना भगवती नारायणाय कलहजनितं शापं विज्ञापयामास । लक्ष्मीरुवाच ।

लक्ष्मी :—हे सर्व्वनियामक भगवन् भवदीच्छयैवास्माकं एवम्विधः कलहपूर्व्वकः शापः प्रवृत्तः । यद् योग्यं साम्प्रतं तत्कुरु ।

सूत्रधार :—अथ हरिः लक्ष्मीमुखात् तासां वृत्तान्तं श्रुत्वा प्रथमं महालक्ष्मीं प्रति उवाच ।

हरिः — हे सुभाषिणि पद्मे, त्वं सरस्वतीशापाधीना दक्षसावर्णिवंशे धर्म्मध्वजस्य राज्ञः गृहे अयोनिसम्भवा तुलसीनाम्नी कन्या भविष्यसि । तत्र अतीव दुस्सहं तपः कृत्वा ब्रह्मणो वरात् योगीद्रं दानवप्रवरं शङ्खचूडं स्वामिनं प्राप्स्यसि । पश्चात् शङ्खचूड-रूपेण तत्र व्रतभङ्गे कृते श्रीरुद्रः तव पति हनिष्यति । ततः शरीरं विसृज्य मत्पत्नी भविष्यसि । अपरञ्च एकया कलया वृक्षरूपा सरिद्रूपाच सती पृथिव्यां लोकपावनाय तिष्ठ । तस्माद् अविलम्वं भारतं गच्छ ।

सूत्रधार :—एवं पद्मामाभाष्य सरस्वतीं प्रत्यवदत् ।

हरि :— हे सरस्वति, एकया कलया त्वमपि भारतं गत्वा सरिद्रूपा भव । अंशेकेन ब्रह्मसदनं गत्वा सावित्री नाम्नी ब्रह्मणः पत्नी भव, अपरांशेन मत्सन्निधौ तिष्ठ ।

सूत्रधार :—अनन्तरं गङ्गां प्रत्युवाच ।

हरि :— हे गंगे, एकांशेन शम्भोः जठां याहि । अपरांशेन मत्सन्निधौ तिष्ट । एकांशेन भारतं गत्वा नरलोकपापनाशाय सरिद्रूपा सती तिष्ठ ।

सूत्रधार :—इत्येव ताः सम्बुध्य स्वयमेवात्मानं निन्दयन् हरिरुवाच ।

हरि :— अहो यत्र गेहे स्त्रीपुमानिव वर्त्तते, योहि पुरुषः स्त्रीवशः स्यात् तस्यजीवनं धिक् । तस्य स्त्रीजितस्य पदे पदे अशुभमेव भवति । अपरञ्च भावदुष्टा योनिदुष्टा सदा-कलहरता च यस्य स्त्री भवति तद गृहान् महारण्यमेव श्रेयःतरम् । अपिच

स्त्रीजितानां पुंसां दुष्टा स्त्रीसन्निधौ स्थितानां अग्निप्रवेशहिंस्रजन्तुसन्निधौ स्थितिरेव श्रेयसी। दुष्टस्त्रीणां मुखपद्मालापान्मरणमेव वरम्मन्ये। अपिच यत्र गृहे दुष्टा स्त्री तिष्ठति तत्गृहे यत् कर्म्म करोति तच्च निष्फलम्। परलोकेऽपि नरकवास एव भविष्यति।

सूत्रधार :—इत्यात्मानं निन्दयन् भगवान् विरराम। ततो भगवद्विषादवचनं निशम्य तद्विश्लेषभीताः सर्व्वास्ता देव्यः उच्चैः रुरुदुः।

## ( मुक्तावली )

कि काम करिलो समूलि मरिलो
स्वामी हल्वाइलो आत्मघाती भैलो ए
हे प्राणनाथ विहिला उचित दण्ड ॥२६॥
दैव भैला मन्द लगालोहो द्वन्द्व
नुबुजिलो फन्द प्रभु यदुचान्द
कि दोषे आमाक करिलाहा रण्डभण्ड ॥२७॥
तयु मनकष्ट नकरिला स्पष्ट
ताती भैलो नष्ट तुमि देव इष्ट ए
केने चलवादे बञ्चिलाहा देव हरि ॥२८॥
तोमार विरहे शरीर नसहे
शोके प्राण दहे पीड़े आति स्नेहे ए
नाथ तोमासाक चाड़ याइबो केने करि ॥२९॥
शयने भोजने जाना सर्व्वक्षणे
सदा भावो मने नाथ नारायण ए
दिवारात्रि सेवि थाकोहो तयु चरणे ॥३०॥
कमलर नय चरण दुतय
अति मनोमय पातक दहय ए
हेन चरणक बञ्चित भैलो एखने ॥३१॥

---

३। व्याधिज्वाला विषज्वाला वरं पुंसां वरानने।
दुष्टस्त्रीणां मुखज्वाला मरणादतिरिच्यते॥ ब. व. (प्र. ख) ६।५६

मैलो कुलक्षिणी आमि अभागिनी
पाइलो मने गुणि प्रभु चक्रपाणि ए
करोहो कातर नकरा प्रभु बञ्चित ॥३२॥
चाड़ि इटो पुरो वैकुण्ठ नगरो
मृतकर सरि मैलो आजि धरि
आमि अनाचारी कि कैबो बहुत हरि ॥३३॥

सूत्रधार :—एवं विलपन्त्यस्ता देव्यः शोकार्त्ताः क्रमेण स्वामिनमूचुः। तत्र सरस्वती उवाच।

सरस्वती—हे नाथ त्वयि आश्रितानामस्माकं का गतिर्भविष्यति। सत् स्वामिविहीनाहं कथं जीवामि[४]।

सूत्रधार :—ततः सरस्वतीवचनं श्रुत्वा गंगा भगवन्तं प्रत्युवाच।

सरस्वतीवचः श्रुत्वा गंगा प्रोवाच माधवम्।
अति शोकेन सन्तप्ता स्वामिविश्लेषकातरा ॥३४॥

गंगा— हे भगवन् जगत्पते, अपराधशून्यां मां कथं त्यजसि? तव त्यागादस्माकं प्राणत्याग एव भद्रः। त्वया विहीनाहं कथं जीवामि?

सूत्रधार :—ततः गङ्गायाः कारुण्यवाक्यमाकर्ण्य महालक्ष्मीरुवाच।

लक्ष्मी :—हे हे भगवन् सत्त्वस्वरूप भार्यास्वस्मासु कथं कोपयुक्तोऽसि। गुणातीतस्य अहंकारादि रहितस्य तव क्षमा एव धर्म्मः। क्रोधं संजहि।

सूत्रधार :—श्रीहरिः महालक्ष्मीवाक्येन विगतामर्षः बाढमित्युक्त्वा तूर्ष्णीं तस्थौ। महालक्ष्मीरपि भगवन्तं प्रणम्य कृताञ्जलिः शापान्तमयाचत।

लक्ष्मी :—ह हरे, तव किंकरीणामपराधं क्षमस्व। भारते कियत्कालमवस्थाय पुनस्तवपादमूलागमनमित्यनुग्रहं कुरुष्व, कुरुष्व। अपरश्च अस्मासु पापिनः स्नात्वा पापानि त्यक्ष्यन्ति। केनोपायेन तेषां पापानां नाशः स्यात् तत् कथय।

सूत्रधार :—इत्येवं पृष्ट्वा सा महालक्ष्मीर्भगवत्मुखपङ्कजं विलोक्य प्रेमाम्बुधौ निमग्ना। तत्र पादपद्मे मूर्द्धानमवस्थाप्य विमुक्तकेशकलापैश्चरणं वेष्टयित्वा उच्चैरुरोद।

---

४। प्रायश्चित्तं देहि नाथ दुष्टायां जन्मशोधकम्।
सत्स्वामिना परित्यक्ता कुत्रजीवन्ति काः स्त्रियः॥ ब्र. वै. (प्र. ख.)६।७०

( लेछारी )

लक्ष्मी निगदति देव हरि प्रणामो तोमार पावे परि
नकरा नैराश नाथ तुमि नारायण।
कि दोष करिलो अभागिनी जिज्ञासि चाहियो चक्रपाणि
पर अपराधे दण्डा केने अकारण ॥३५॥

गंगा सरस्वती केला द्वन्द्व डुइवे लागे तासम्वार मन्द
नकरि विचार दण्डि लाइा केने मोक।
तोमार प्रथम पत्नी आमि नकरिवा त्याग मोक स्वामी
तोमाक सुमरि गावे ज्वले मोर शोक ॥३६॥

पतित तारण पद दुइ याक देखि मन सुखी हुइ
महााहरे याक सेविबे याक नपाय।
हेन चरणक प्रतिनिते सेविछिलो कायवाक्य चित्ते
हरि हरि नाथ बच्चिलाहा समुदाय ॥३७॥

नेदेखि तोमाक एकेक्षणे जाना मोर फुटि याइ प्राण
चिरकाल केने नेदेखि रैवे जीवन।
जानिलो मैलोहो सर्व्वनाश जीवनरो दूर मैल आश
एकोरूपे थिर करिते नपारो मन ॥३८॥

करा कृपानाथ देव हरि कोन सते याइवो परिहरि
सुमरि सुमरि गावे मोर अग्नि ज्वले।
कि मैल मोहर कैक याइवो तुमि हेन स्वामी कैत पाइवो
जानोहो मैलेक आपोन कर्म्मर फले ॥३९॥

एहि बुलि आर्त्तराव करि कान्दे सती कृष्ण पावे धरि
हृदय द्रविल मुखत वाक्य नोलाय।
लक्ष्मीर देखिया शोक पाछे कृपामय हरि चाहि आछे
शोके नभापिल रहिलेक मुख चाइ ॥४०॥

सूत्रधार :—एवं विलपन्ती पादयुगले पतितां साश्रुनेत्रां तम्बिलोक्य भगवान् हरिः कृपया तां महालक्ष्मीमुत्तोल्य वक्षसि निधाय आश्वास्य इदमब्रवीत्।

हरि :— हे पद्मे चारुभाषिणि, यूयं शापान्तं शृणुत। सरिद्वृक्षरूपेण कियत् कालं तिष्ठ। कलेः पञ्चसहस्रेषु वर्षेषु गतेषु यूयं मत्पदं वैकुण्ठाख्यं आगमिष्यथ। इत्येवं

भगवद्वाक्यं निशम्य ताः देव्यः महाशोकसमुद्रमग्नाः श्रीहरिं नमस्कृत्य स्व स्व स्थानानि ययुः।

## ( गीतम् )

राग—काफिर।

ताल—चुटा।

गोविन्द बिदाय हैल   शापर क्षान्ति मैल
तिनि माइ लरिल कान्दिया।
सरस्वती गगासती   लक्ष्मीदेवी भगवती
गोविन्दक निहाले फिरिया ॥४१॥
शोके अंग बिदगध   चलाइते नपारे पद
नयने नादेखे दिशपाश।
चक्षुर लोतक बहे   मर्म्मे आति देहा दहे
सनातने सदा रैल आश ॥४२॥
खणोक्षणे याइ चलि   खणो खणो परे ढलि
रैया थाके माथे दिया हात।
दीन द्विजे बोले वाणी   शुन माइ ठाकुराणी
आत्मदोषे विरह इमत ॥४३॥

सूत्रधार :—अथ परमधार्मिकः दक्षसावर्णिमनुरासीत्। तदवंशोद्भवः श्रीमत शङ्करपरायणो वृषध्वज नामा नृपसत्तमश्चासीत्। सच पात्रमन्त्रिकलत्रकैर्नाना रथगजपदातिभिः परिवृतः सभां प्रविवेश।

श्रीमत्शङ्करकिकरोऽखिलनृदेः संसेव्यपादाम्बुजो-
भूपालो वृषभध्वजो क्षितितले चासीत् सुरेशप्रभः।
यद्गेहे च मुदा सुरारिदलनः शम्भूः स्थितोऽमृतसदा
नानापात्रकलत्रपार्सभिरसौसार्द्धं सभामाययौ ॥४४॥

अपिच—

अथ प्रविश्याखिलभूपसत्तमो वृषध्वजो रुद्रपरायणः सभाम्।
परिवृतो यत्कृतवान् जनैः समं तत् पश्यताहो सदसि प्रविष्टाः ॥४५॥

सूत्रधार :—ततो वृषध्वजः सदसि प्रविश्व मन्त्रिणं प्रत्युवाच।

वृषध्वज :—हे मन्त्रिन्, सत्त्वरं पूजोपहारं पूजामण्डपञ्च निर्म्माय राज्ञे निवेदय। हे मन्त्रिणः इष्टदेवं श्रीरुद्रं पूजयितुमिच्छामि, यूयं तदर्थं सत्त्वरं मण्डपादिं कुरुत।

मन्त्रिण :—हे अखिलभूपतिसेव्यमानपादसरोज, भवदाज्ञया सदाशिवस्य अर्च्चनाय पूजोपहारः मण्डपादिकञ्च कारितम्। साम्प्रतं यद् युक्तं तत् कुरु।

सूत्रधार :—ततो मन्त्रिणो वाक्यमाकर्ण्य सत्त्वरमुथ्थाय वृषभध्वजः शङ्करं पूजयामास। ततः तस्य पूजनेनाशुतोषो भगवान् शङ्करः तुष्टः सन् तदग्रतः आविर्बभूव। तत् पश्यत, शृणुत, निरन्तरं जयकृष्णेति वदत।

श्रीमत्खट्टाङ्गपाणिस्त्रिनयनविलसत्पञ्चवक्त्रस्त्रिशूली
देव्याः पाणिं गृहीत्वा वृषभवरमधिस्थाय चन्द्रार्द्धचूडः।
गंगाधाराप्रदीप्तैर्निजकचनिचयैः कम्पितभ्रूप्रवाहः
सर्पालंकारसारो विमलतनुधरः श्रीशिवश्चाविरासीत् ॥४६॥

## ( गीतम् )

राग—तुर।

ताल—चुटा।

ए भोलानाथ दिगम्बर राजिछे ॥ ध्रुं
आइला देव शूलपाणि माथे राजे मन्दाकिनी।
आरो शोभे जटाजुट कण्ठदेशे कालकूट ॥४७॥
भाले शोभे शशीकला प्रीवे लोले मुण्डमाला।
रजतगिरिर शृङ्ग तेन्नि शोभे शिवेर अङ्ग ॥४८॥
नागे भेल आभरण व्याघ्रचर्म्म परिधान ॥
वृषभ वाहने चड़ि आइला देव त्रिपुरारि।
दीन द्विजे वोले हर भवार्णवे पारकर ॥४९॥

सूत्रधार :—एवं तद्भक्त्या प्रत्यक्षीभूतं वृषभवाहनं शङ्करं पार्व्वत्या सहितं सम्भ्रमेनोथ्थाय दण्डवन्निपत्य कृताञ्जलिस्तुष्टाव। वृषध्वज उवाच।

वृषध्वज :—

ज्वलन्नागमालं शिरे गांगमालं
भजे विश्वनाथं विश्वविश्वेशवन्द्यम्।
करेभालपात्रं भवानीकलत्रं
भजे लोकनाथं सुरेन्द्रैः प्रपद्यम् ॥५०॥

दधन्मुण्डकूटं गले कालकूटं
भजे भूतनाथं गिरीशं महेशम् ।
कटीचर्म्मचेलं वहन्मर्मशीलं
भजे शम्भुनाथं सुरेशं गणेशम् ॥५१॥
त्यजन्मोहवेशं जटाजुटभूपं
भजे विश्वनाथं मुनीन्द्रैः प्रणीतम् ।
श्मशाने विहारं लसद्धेमहारं
भजे गौरीनाथं सुरैः सेवितन्तम् ॥५२॥

सूत्रधार :—एवं तस्य राज्ञो भक्तिरज्ज्वा वद्धः भक्तिपरायणः श्रीरुद्रः तस्मिन् वृषध्वजे राज्ञि पुत्रादप्यधिकं स्नेहं कृत्वा तदाश्रमे त्रियुगमावात्सीत्। स च राजापि सर्व्वान् देवान् परित्यज्य स्वेष्टदेवं श्रीरुद्रमतिशयेन पूजयामास ।

एवं स्थिते शिवे तस्मिन् राज्ञोगेहे युगत्रयं ।
ततः परन्तु यद्वृत्तं तच्छृणुध्वं सभासदाः ॥५३॥

सूत्रधार :—अथैकदा श्रीशङ्करं द्रष्टुं श्रीसूर्यः वृषध्वजस्य गृहमागतवान् । ततस्तस्य गृहमागतमपि श्रीसूर्यं वृषध्वजः किञ्चिदपि सत्कारं नाकार्षीत्। तस्य अवहेलनं दृष्ट्वा क्रुद्धः इदम्वाक्यं श्रीसूर्य उवाच ।

सूर्य :— अरे दुर्बुद्धे, आशुतोषं शङ्करं वशीकृत्य अस्मान् अवमन्यसे, परम्पराप्राप्तं राजधर्मञ्च विलोपयसि। अतः अद्य श्रीमदान्धस्य तव देवानामप्यधिमतमुचितं दण्डं साधयामि। अरे दुष्ट, त्वं भ्रष्टश्रीभव ।

सूत्रधार :—अथ तच्छ्रुत्वा श्रीरुद्रः क्रुद्धःसन् भक्तापराधकारिणं सूर्यं हन्तुं शूलमुत्तोल्य तस्याभिमुखं ययौ। तं शूलहस्तमागतं शिवं दृष्ट्वा आत्मत्राणाय श्रीसूर्यः पित्रा काश्यपेन सार्द्धं ब्रह्माणं शरणं अभिजगाम। श्रीसूर्य उवाच।

सूर्य :— हे हे जगत्कारण विधातः, सदाशिवस्य प्रियतमो वृषध्वजनामा नरपतिमयामिशप्तस्तेनरुष्टः श्रीरुद्रः मामभिहन्तुमागतः। तस्मान्मां त्रायस्व ।

सूत्रधार :—ततो ब्रह्मा कृपया काश्यपेन सह श्रीसूर्यं पुरस्कृत्य जरामृत्युवर्जितं नारायणाश्रितं वैकुण्ठाख्यं स्थानमभिययौ। ते ब्रह्मकाश्यपमार्त्तण्डाः श्रीरुद्रशूलादतीव भीताः शुष्कमुखा नारायणं दण्डवत् प्रणम्य इदं कथयामास। तेषां पुरःसरो ब्रह्मा उवाच ।

ब्रह्मा— हे हे भगवन् करुणानिधे, अनेन श्रीसूर्येण महादेवभक्तस्यापराधः आचरितस्तेनासौ रुद्रः एनं हन्तुमायाति। अस्य रक्षणे शीघ्रमुपायं कुरु ।

सूत्रधार :—एवं ब्रह्मणः कारुण्यपुरःसरं वचनं निशम्य श्रीनारायण उवाच ।

नारायण :—भो ब्रह्मन् ययं स्थिरा भवत। मयि स्थिते का भीतिः? ये विपत्तौ पतिताः अनिशं मामेव भजन्ति तेषां अधीनोऽहम्। चक्रहस्तः सततं तत् पार्श्व एव तिष्ठामि। अतो मत्स्थानं प्राप्य भयं मा कुरुत।

सूत्रधार :—अथ भगवान् श्रीरुद्रः कोपेनारक्तलोचनः शूलहस्तः सन् श्रीनारायणस्य सभां प्रविवेश। तत् पश्यत शृणुत निरन्तरं जय जय श्रीकृष्णेति वदत।

## ( गीतम् )

गंगाधर महेश्वर देव-दिगम्बर।
पार्वतीवल्लभ शूलपाणि देव हर ॥ ध्रुं
गले मुण्डमाला शोभे माथे मन्दाकिनी।
नाग आभरण गावे सर्पर किंकिणी ॥५६॥
भष्मविभूषित अंग शुक्ल कलेवर।
मस्तके राजिछे जटाजुट भयंकर ॥५७॥
वृषभवाहन हाते त्रिशूल डम्बरु।
एमते चलिया आइल जगतर गुरु ॥५८॥

एवं भगवन्तं दृष्ट्वा भक्ताः पुलकिताङ्गाः अस्तौषीत्। शिव उवाच।

## ( स्तुतिः )

शिव :—
भजे हरिं जगत्पतिं पतिं श्रियो गिरामपि।
अपीन्दुनिन्दिपल्लवं नखाग्रदीपिदीधितिम् ॥५९॥
सुगुल्फकिंकिणीरवं रवेण निन्दिताम्बुदम्।
नवाम्बुदच्छविं विभुं विभूतिमद्धृदिस्थितम् ॥६०॥
हृदाम्बुजेषु योगिनामयोगिनां सुदूरगम्।
विदूर गोपयोषितां सिताभमानसाम्बुजे ॥६१॥
सनन्दनन्दनैः समं समं वसन्तमच्युतम्।
अविच्युताम्बुजाननं मदापसन्तमेककम् ॥६२॥

सूत्रधार :—एवं कृतस्तुतिर्विष्णु रुद्रं प्रत्यभाषत।

विष्णु :— कथमद्यातिक्रुद्धस्त्वं मत्समामागतोऽसि? हे मृत्युञ्जय, भवानद्यक्रोधवशः सन्

कथमायाति ? भवदागमनेनासौ श्रीसूर्यः कथम्वा त्रस्तः स्यात् ? एतदभिप्रायं सत्वरं वद।

सूत्रधार :—एतन्निशम्य श्रीमहादेव उवाच।

महादेव :—हे हरे, मम भक्तोऽतीव प्रियतमः पुत्रादपि अधिकतरो वृषध्वजो नाम नरपतिरास्ते। यस्य प्रेमभक्तिरज्ज्वा बद्धः त्रियुगं तदधिवसेऽहं स्थितः। तमेव निरपराधं वृषध्वजमयं श्रीसूर्योऽशपत्। तस्मादेनमभिधावन् भवत्स्थानमागतः अनेनासौ बिभेति। त्वयि शरणापन्नमेनं किं करिष्यामि ? अपिच, हे प्रभो भवत्पादमुलमागत्यासौ मद्भयाद्विमुक्तः स्यादेव साम्प्रतं मम भक्तस्य वृषध्वजस्य का गतिः स्यात् तद्वद।

सूत्रधार :—एवं विनयपूर्व्वकं वाक्यं श्रुत्वा नारायण उवाच।

नारायण :—भो शङ्कर, इतस्त्वं शीघ्रं गच्छ। अत्र वैकुण्ठे दण्डार्द्धेन पृथिव्यां विंशतियुग गतम्, तद्भक्तो वृषध्वजो मृत एव। अपरे तद्वंशजा अपि मृताः। साम्प्रतं तस्यकुले धर्मध्वजकुशध्वजौ महालक्ष्म्याः आराधनेन तौ सम्पद्युक्तौ पृथ्वीशौ आसाते। हे शम्भो, त्वमस्मात् स्थानात् शीघ्रं याहि। हे ब्रह्मादयः यूयमपि स्वस्थानं गच्छत।

सूत्रधार :—इत्युक्त्वा भगवानभ्यन्तरं गतवान्। शिवश्व स्वालयमगमत्। ब्रह्मादयोऽपि स्वालयं ययुः।

अथ भूपवरे वृषध्वजे शशभृत्शेखरभक्तसत्तमे।<br>
प्रमृते तत्कुलजौ बभूवतुः सुचिरं धर्मकुशध्वजौ नृपौ ॥६३॥

सूत्रधार :—अथ सूर्यशापाद्निःश्रीके तद्वंशे धर्मध्वजकुशध्वजौ महालक्ष्मीमाराध्य सम्पद्युक्तौ राजानौ बभुवतुः। ततः कुशध्वजस्य महिषी मालावती नाम्नी पतिव्रता आसीत्। तस्या गर्भे महालक्ष्म्या अंशेन वेदवती नाम्नी कन्या एका आविर्बभूव। तस्मिन्नेव समये नानामंगलपुरःसरं वाद्यानि वादयामास। नार्यश्च उल्लुलध्वनिं, नाडीच्छेदनपूर्वकं महामहोत्सवं चक्रुः। ततो मातृगर्भाद्विनिःसृता सती सा वेदध्वनिं चक्रे। अतएव विपश्चितः ज्ञानयुक्तां तां वेदवतीमिति अभिजगुः। ततः सा जातमात्रा एव वर्द्धिता सर्वैर्बान्धवैर्निषिद्धा अपि नारायणपरा सती सा तस्मात् सूतिक्तागृहात् तपोवनं जगाम। ततस्तपोवनं प्रविश्य पुष्करे तीर्थे एकमन्वन्तरम उग्रं तप आचचार। एवं महतीं तपस्यां कृतवती इमां दैववाणीमश्रौषीत्।

दैववाणी—हे वेदवति, जन्मान्तरे तव प्रार्थनीयो हरिर्भर्त्ता भविष्यति। इदं दुःशक्यं तपः त्यज।

सूत्रधार :—इत्येव दैववाणीं निशम्य रुष्टा सती पुनरेव गन्धमादनपर्वतस्य गह्वरे निजने सुचिरं

घोरं तपः आचचार। अथैकदा दुर्न्निवार्यो रावणः तत्रागतः तत्रैव गन्धमादनगुहायां प्रविशति स्म। ततस्तं रावणं वीक्ष्य वेदवत्युवाच।

वेदवती— अहो, किम्भाग्यमस्माकं, देवगोप्य अस्मिन् निर्जने प्रदेशे कतिकालान्तरेण दुर्ल्लभो अतिथिरद्य लब्धः। अयम्मम कल्याणाय साक्षान्नारायण इव आगतः।

सूत्रधार :—इत्युक्त्वा सादरपूर्वकं कुशनिर्म्मितासने उपवेश्य तं गन्धपुष्पादिनानोपचारैः सम्पूज्य षडरसपञ्चामृतैः भोजयामास। ततोऽसौ दुर्जनो रावणः पुष्टोदरः कामाकुलितचित्तः सकटाक्षं तामपृच्छत्।

रावण :—हे सुन्दरि, अति मनोरमा नवयौवनसम्पन्ना त्वं अस्मिन् निर्जने एका एव तपसा कमाराधयसि ?

सूत्रधार :—इत्येव रावणवाक्यं श्रुत्वा सा वेदवती तं किमपि नोवाच। ततस्तस्याः किमपि प्रत्युत्तरमप्राप्य तामति मनोहरां पीनश्रोणीपयोधरां शरद्पद्मवदनां सुदतीं नवयौवनसम्पन्नां वेदवतीं वीक्ष्य महामदान्धो रावणः कामवाणेन पीडितः सन् श्रृंगारं निश्चित्य तस्याः करमग्रहीत्।

रावणस्य करस्पर्शात् कुपाध्वजसुता सती।
निशाचरपतिं दग्धुं सक्रोधमवलोकयत् ॥६४॥

सूत्रधार :—ततः सा वेदवती कोपेन तं रावणं अवलोकयामास। अथ रावणः वेदवत्याः कोपेन वृक्षवज्जडप्रायो बभूव। ततस्तां भक्त्या अवनतो दण्डवत् प्रणम्य इदमब्रवीत्। तत् पश्यत श्रृणुत।

## ( गीतम् )

राग—देशाख।

ताल—चुटा।

मा आमार जनम लभिला शुभ हेतु।
अलक्तवरणी रामा वदन चन्द्रेर समा
वहल जघनी मध्यक्षिणी।
गोविन्दर प्रियजाया जगतकारिणी माया
एकरूपे हरेर रमणी ॥६५॥

भद्रहेतु जगतर कुशध्वज नृपतिर
महिषीत जनम लभिला।
वेदध्वनि कैला सती संज्ञा भैल वेदवती
हरिक चिन्तिवे तपे गैला ॥६६॥
से थानत दशानने आसि पाइल दरशन
कामभावे करत धरिल।
राक्षसे स्पर्शिल जानि जगतजननी राणी
योग धरि शरीर एरिल[५] ॥६७॥

रावण :—ह भगवति मातः, महामदान्धस्य मम अपराधान् क्षमस्व ।।
वेदवती— रे रे मूढ, तव प्रतिकारं करोमि। त्वं मदर्थे सवान्धव एव विनंक्ष्यसि।
सूत्रधार :—इत्युक्त्वा सा वेदवती योगधारणया तदग्रत एव तद्देहं तत्याज। ततः रावणः तच्छ्रुत्वा मनसा शापं विचिन्त्य विललाप।

## (गीतम्)

लेचारी।

कि काम करिलो केने आइलो कामवश हुया केने कैलो
मोहोर समान नाहिके निलाज लोक।
लघु हुया फुरो थाने थाने हेन स्वभावत गुचे मान
अन्त मैले वारम्बार मात्र पाँवो शोक ॥६८॥
आछय पुरुष निरन्तर नतु शुनो हेन कामातुर
मोहोक विधाता सृजिलेक हेन करि।
कैक याइवो किवा करो बाप किमते एरांवो इतो काप
विपदे परिया रैलो मज्ञि हरि हरि ॥६९॥
आछय अनेक नारीगण देखि मोह होवे मुनिगण
इमते सुन्दरी थाकन्ते करो अकार्य।
मोहोर शुनिया हेन गुण हासिवेक जानो सर्वजन
केने हेन कार्य करिलो मज्ञि निलाज ॥७०॥

---

५ This is probably an interpolated song. Written in a different type of hand-writing it occurs in one corner of the folio.

तिनिलोक जिनि भैलो राजा मोर भये त्र्यस्त देव प्रजा
तथापितो केने करिलो मन्नि अकर्म ।
अधर्मर फले भैलो नष्ट तातेसे नितान्त पाओ कष्ट
नमैलेक धर्म्म सिजिले सवे अधर्म ॥७१॥

सूत्रधार :—ततः सा वेदवती परजन्मनि रावणवधार्थं रामस्य कामिनी सीता नाम्नी बभूव यस्याहरणेन रावणः सबान्धवो नश्यति स्म । एवं मनस्तापविधुतकल्मषो रावणः तस्मात् स्थानात् स्वस्थानमभिजगाम ।

यस्याः पादसरोजनिःसृतसुधासंसक्तचित्ताः सुरा-
दैत्यानीककरात्तु स्वत्वविभवां शक्रादयो लेभिरे ।
तामाद्यां जगतोऽखिलस्यजननीं देवीं सुरेशैः स्तुतां
वन्दे शेषविशेषभूषणभवां मोक्षैकबीजामजाम् ॥७२॥

अङ्कान्ते कविरभीष्टदेवं प्रणमति ।

यत्पञ्चस्वरयुक्तवेणुनिनदेनाभीरवामभ्रूवो-
मुग्धा मोहितचेतसो मनसिजोद्वेगेनच त्यक्तत्रपाः ।
कान्तन्तल्पमधिष्ठितं स्वविषयान् हित्वा प्रयत्नेन यत्
वृन्दारण्य उपासिरे तमनिशं वन्दे व्रजेशं हरिम् ॥७३॥

इति ब्रह्मवैवर्त्तपुराणे प्रकृतिखण्डसमुद्धृते शङ्खचूडवधनाटके गंगालक्ष्मीसरस्वता शापप्राप्ति-वेदवतीजन्मोपाख्यानं च नाम प्रथमोऽङ्कः ।

# द्वितीयोऽङ्कः

यो देवस्त्रिगुणात्मिकाम्भगवतीमाश्रित्यमायामजां
ईशः सर्गविसर्गपालनवतां दध्रे सतां प्रीतिदां ।
भूभारोद्धरणाय दीर्घवपुषं नीलाम्बुवाहप्रभां
तं वृन्दारकवृन्दवन्दितपदद्वन्द्वारविन्दं भजे ॥१॥

अपिच—

यम्वेदान्तविचारसारनिपुणैर्निर्णीय नाशङ्कते-
ह्येतद्रूपमिति प्रवक्तुममलप्रज्ञैः पुनर्योगिभिः ।
तम्ब्रह्माखिलविश्वभावनपरं ज्योतिर्मयं विश्वगं
वन्दे सन्ततमन्तमध्यरहितं मायेशमाद्यं विभुम् ॥२॥

सूत्रधार :—अथ दक्षसावर्णिनामिमनोर्वंशे पुण्यवान् कश्चित् धर्मध्वजनामा नरपतिरासीत्। स चैकदा कलत्रपात्रमन्त्रिभिः परिवृतः सभां प्रविवेश। अनन्तरं तस्य राज्ञो धर्मध्वजस्य माधवीनाम्नीं महिषीं सरस्वतीशापात् स्वांशेन महालक्ष्मीराश्रितवती। ततः महालक्ष्म्याः अंशं धृतवती सती सा माधवी पर्वस्मादप्यधिकं रेजे।

अथ ब्राह्मीशापाद्देवी महालक्ष्मीरयोनिजा ।
धर्मध्वजस्य कान्तायां तुलसीत्यभ्यजायत ॥३॥

सूत्रधार :—ततः शुभे लग्ने कार्त्तिकपौर्णमास्यां सा धर्मध्वजकामिनी माधवी शरच्चन्द्रवदनामारक्तहस्तपादतलां पद्मलोचनामतिमनोरमां कन्यां जनयामास। तस्मिन् समये स च राजा नाना मङ्गलपूर्वकं वाद्यानि वादयामास। तत् पश्यत शृणुत निरन्तं जयजय कृष्णेति वदत।

## ( गीतम् )

राग—वरारी ।

ताल—एकताल ।

सम नाहि रूपे यार लक्ष्मी अंशे अवतार ।
त्रैलोक्यमोहिनी रामा रूपेर नाहिके पार ॥४॥
जन्मिल मात्रके बाला मैलेक युवती ।
अन्धकार फेरि ज्वले सूर्यर जेउति ॥५॥

मालतीर माला माथे करय प्रकाश ।
गन्ध लोभे अलि सदा नचारय पाश ॥६॥
हृदित राजिछे स्तन दाडिम्बर नय ।
कृशमध्यदेह हरडम्बरु आनय ॥७॥
रङ्गा पदतले मन मोहे अतिरेक ।
दीनद्विजे वोले मोर सेहि गति होक ॥८॥

अथ सर्वे नगरवासिनोजनाः नृपस्य कन्याजननं श्रुत्वा सत्वरमागताः राजसदनम्प्रविश्य विस्मिता सन्तः परस्परं वदन्ति स्म । नागरिका ऊचुः ।

नागरिका :—अहो एवम्भूतां सुन्दरीं कन्यारत्नं कुत्रापि न पश्यामो वयं, एतत्तुल्याकापि न भवति[६] । अतएव अस्यास्तुलसीति नामास्ताम् ।

सूत्रधार :—इत्युक्त्वा सर्वे नगरवासिनः सानन्दं महामहोत्सवं कृतवन्तो यथायोग्यं नृपार्हणादिकमासाद्य स्वस्थानं ययुः । अथ सा तुलसी जातमात्रैव वर्द्धिता नारायणपरा सर्वे स्वजनैर्न्निषिद्धापि वरार्थं ब्रह्माणमाराधयितुं बदरिकाश्रमं जगाम । तत्र लक्षवर्षं घोरं दुस्सहं तप आचचार । एवं प्रत्यहं नानापूजोपहारैः भक्त्या ब्रह्माणं पूजयति स्म ।

अथैकदा लोकपतिर्विधाता व्रतैः तुलस्याः परितोषितो भृशम् ।
स्वयानमारुह्य चकान्तवैभवं वरं प्रदातुं बदरीं समाययौ ॥९॥

अथ ब्रह्मा तस्या आराधनेन तुष्टः सन् हंसयानमारुह्य बदर्याश्रममागत्य तस्या अग्रतः आविर्बभूव । ततः सा तुलसी आविर्भुतं ब्रह्माणं दृष्ट्वा भक्त्यापुलकितासाश्रुनेत्रासती तुष्टाव ।

## ( स्तुतिः )

तुलसी— विधातर्नतीनामजस्रं सहस्रं चतुर्भिर्मुखैर्वेद वक्त्रेऽनुघस्रम् ।
ऋषीणां स्तुतिभिः समेताय तुभ्यं विधेह्यस्तुमह्यं सुराणामलभ्यम् ॥१०॥
पुनस्ते नमस्ते पितॄणाञ्च पित्रे सपर्याकृतेयं मया स्वीयभक्त्या ।
अहोते कृपालोः कृपालेशप्राप्तिं सदा ध्येयलोकास्यतस्तां दुरापम् ॥११॥

---

६ । नरः नार्यश्च तां दृष्ट्वा तुलनां दातुमक्षमा ।
तेन नाम्नाच तुलसीं तां वदन्ति पुराविदः ॥ (प्रकृति खण्ड १५-१४)

सदा चिन्तयेच्चेतसा साध्वसेन धवप्राप्तिजेना…………

प्रसीद प्रभो मेऽतिदुर्भाग्य भाजः नजाने………भाजः[7]

ऋषीणां पितृणां मनूनां विधातः सतामेवपातो मुखैर्व्वेदगातः ॥१२॥

सूत्रधार :—एवं स्तुत्वा ससम्भ्रममुत्थाय दण्डवत्तं प्रणनाम। अथ पितामहस्तुष्टः सन् पादमूले पतितां तुलसीं प्रति ब्रह्मोवाच।

ब्रह्मा— हे तुलसि, तवातिदुःशकेन तपसा तुष्टोऽहं वाञ्छितं दातुमिहागतः। सम्प्रति हरिभक्तिं मुक्तिं वा अजरामरतामपि यदिच्छसि तद्वृणुष्व। ब्रह्मणोक्तमाकर्ण्य तुलस्युवाच।

तुलसी— हे पितामह भगवन्, सर्वज्ञस्य तवाग्रतो यद्यपि अकथनीयं तथापि तवानुग्रहजननार्थं पूर्ववृत्तान्तं कथयामि। हे प्रभो, पूराहं तुलसीनाम्नी गोपिका श्रीकृष्णप्रियाहमेकदा वृन्दावने गोविन्देन सह संसक्तामतृप्तां तदालापमूर्च्छितां मां वीक्ष्य रोषप्रस्फुरिताधरा राधा शशाप। हे दुष्टे, सर्वान्तर्यामिना मम स्वामिना सह केलिकौतूहलं सम्भुक्तासि, अनेन त्वं मानुषीं योनिं व्रज। इत्येवं शप्तां मां गोविन्द आह हे तुलसि, मनुष्ययोनिं गत्वापि तत्रैव दुश्चरं तपः तप्त्वा ब्रह्माणमाराध्य पुनर्मत्सदनमेव लप्स्यसे। हे पितामह, भवदग्रतः सर्वं मया विवृतम्, यद्युक्तं तत्कुरुष्व। इति तुलस्याः वृत्तान्तं निशम्य कृपया ब्रह्मोवाच।

ब्रह्मा— हे कामिनि, तवाभिमतं ददामि। पुरा गोलोके सुदामनामा श्रीकृष्णपार्षदप्रवरः त्वामेवानुदिनं कामयामास। सोऽपि राधिकाशापात् पृथिव्यां शङ्खचूडनामा दानवकुले जातः। स च अधुनापि श्रीकृष्णप्रसादेन अविस्मृतज्ञानः महायोगीन्द्रो वैष्णवः तल्लाभार्थं मामाराधयति। सम्प्रति कियत्कालं तत्पत्नी भव। अपरञ्च हे शोभने पश्चात् शापाद्विमुक्ते शङ्खचूडे गोलोकं याते पुनस्त्वमपि शापाद्विमुक्ता श्रीकृष्णमेव लप्स्यसे। अपिच भारते स्वर्गेच पुण्यदे वृन्दावनेऽपिच तुलसीति नाम्ना सर्ववृक्षेभ्यः श्रेष्ठा श्रीकृष्णप्रियतमा अन्येषां देवानामपि प्रियदायिनी वृक्षरूपा त्वं भविता। त्वत्पत्रम्बिना अन्यैः पुष्पैः पत्रैर्व्वा यद्यपि अर्च्चनां करिष्यति सा पूजा विफला भविष्यति।

सूत्रधार :—अथ ब्रह्मा तुलस्यै वरं दत्वा तस्या अग्रत एव अन्तर्हितो बभूव।

अथ प्रसिद्धेऽभिमते पितामहात् प्रमोदनीराम्बुधिमग्नमानसा।

अनुक्षणं सा सहचारिणीमुखं समीक्षमाणा तुलसीत्यभाषत ॥१३॥

---

7. Here a few words could not be deciphered as the folio was not in good condition.

अथ ब्रह्मणोऽभिमतं वरं प्राप्य सा हर्षाम्बुधौ निमग्ना सती सखीमुखमनुक्षणं निरीक्षमाण इदमभाषत।

तुलसी— हे सखि, मम भाग्यं किं कथयामि? अनुगृह्य पितामहः अनेकवर्षण्याराधितः तपःफलं मह्यं दत्तवान्।

सूत्रधार :—इत्युक्त्वा तुलसी तस्मिन्नाश्रमे नाना पुष्पनिवहैः रतिशय्यां निर्माय ब्रह्मदत्तं वरमेव चिन्तयन्ती सती तत्र वसतिमकरोत्। अथ एतच्चरितां तुलसीं दृष्ट्वा मकरध्वजः कामः तस्याः अग्रत आविर्बभूव।

दृष्ट्वा तुलस्याश्चरितं सकामं मीनध्वजो हर्षत आत्तचापः।
आकर्णपूरं विषमप्रसूनं चिक्षेप बाणं भृशमम्बुजाक्षाम्।

सूत्रधार :—एतस्मिन् समये नवयौवनसम्पन्नां सकामां तुलसीं दृष्ट्वा मकरध्वजः कामः पुनः पुनः पुष्पबाणाश्चिक्षेप। ततः तत्कामबाणेन प्रपीडिता सा विभ्रमचित्ता क्षणमात्रं निद्रां कृतवती। तत्र काममावतः केनचित्पुरुषेण सह क्रीडाकौतूहलमनुतिष्ठति स्म। ततः चेतनम्प्राप्य स्वप्नप्राप्तं पुरुषमेवं वर्णयन्ती सती विललाप।

## ( गीतम् )

मुक्तावली।

जीवन यौवन गैल अकारण विकलित मन भैल सर्वक्षण
हरि हरि विधि केसानि लभिबो स्वामी।
मोहोर समान आन नाहि आर अतीव दहान पीडे पञ्चबाण ए
तथापितो केने स्वामी ए वञ्चिता आमि ॥१४॥

स्वप्नत आसिया पुरुषे हासिया मोके आलिङ्गिया धरे आश्वासिया
चेतन लभिया नेदेखोहो प्राणनाथ।
मोक परिहरि कैक गैल एरि एकेश्वरी करि कामे मारे पुरि ए
देखा दिया नाथ नकरा मोक अनाथ ॥१५॥

बुलिला विधाता शुन पतिव्रता नकरिबि चिन्ता लभिबिहि भर्त्ता ए
मोर कर्मे सियो व्यर्थ भैल समुदाय।
स्वप्ने देखा दिला येवे श्रुति भैला सियो अन्तरिला मोहोक बञ्चिला ए
अनेक थानत चाहिलो चक्षु वलाय ॥१६॥

तथापि सिजन नपाइलो दर्शन	गेला कोन स्थान मैला अन्तर्द्धान
जानिलो विधाता करिला मोक वञ्चन ।
कामसागरर नपाइलोहो पार	करिलोहो सार जानिलो इवार ए
निश्चय करिलो चाहिवो आवे जीवन ॥१७॥

सूत्रधार :—तामेवं विलपन्तीं तुलसीं वीक्ष्य तत्सहचारिणी काचित् सख्युवाच ।

सखी— हे सखि, चिरकालं तपः सन्तप्तचित्तायाः तव कथमिदृक् स्वभाव आसीत् ? अद्य त्वां वातुलस्वभावामिव पश्यामि । त्वत्समा बहुतरा युवत्यः सन्त्येव, तासु एष स्वभावो नास्ति । ब्रह्मणो वरादचिरेण पतिं लप्स्यसे । त्वं शोकं मा कुरु ।

सूत्रधार :—ततः सा सखीवाक्येन किञ्चिल्लज्जिता अधोमुखी सती तं स्वप्नदृष्टं पुरुषमेवं मनसा चिन्तयन्ती सती तस्यां बदर्यामेव तिष्ठति ।

मुनिनिवहपरीते पुष्करे तीर्थवर्ये
सुचिरममलप्रज्ञ आचरन् दुस्तपस्याम् ।
अखिलभवविधातु र्ब्रह्मणोलब्धकामो
अगमदथ बदर्याख्याश्रमं शङ्खचूडः ॥१८॥

अथ दानवप्रवरः शङ्खचूडः पुष्करतीर्थे उग्रेण तपसा ब्रह्माणमाराध्य लब्धवरस्तदाज्ञया अनेक योगीन्द्रवृन्दसमाकीर्णं बदरिकाश्रमागतवान् । तत्रैव एकदा आश्रमाभ्यासतश्चरन्तं नानालंकारशोभितं, नवयौवनसम्पन्नं कन्दर्पनिभं ज्वलन्तं शङ्खचूडं दृष्ट्वा सकटाक्षं तन्मुखं निरीक्षमाणा सस्मिता सती लज्जया अधोमुखी बभूव । शङ्खचूडोऽपि तां इषद्हास्ययुक्तां कामुकीं तुलसीं वीक्ष्य कामेनाहृतमानसः सन् तामपृच्छत् ।

शङ्खचूड :—हे कामिनि त्वं कस्य कन्यासि ? स्वर्गभोगादधिकतमत्वात् संगमाय मां किंकरं जानीहि । त्वत्सदृशी इह जगति मुनिमनसामपि मोहोत्पादनसमर्था कापि सुन्दरी न दृश्यते । अतः त्वामागतोऽहम् ।

सूत्रधार :—इदृशं तद्वचनं श्रुत्वा सस्मितानना सकामा तुलसी तमब्रवीत् ।

तुलसी— हे वीर, तपस्विनी धर्मध्वजसुताहं तिष्ठामि । अतो अस्मात् निर्गच्छ । कुलजातां कामिनीं साधुजनो न पृच्छति, अयमेव वेदार्थः । वेदवित्पुमान् परकामिनीं मनसापि नेच्छति । यतः कामिनी अन्तर्विषपूर्णामृतमुखघट इव नाना विपत्तीनामप्याधारभूता मायारूपा विधिना पुरा निर्मिता । मुमुक्षूणां मनसि पुनर्न्नायिका विषरूपा एव ।

सूत्रधार :—इत्युक्त्वा तुलसी विरराम । ततः सस्मितः शङ्खचूड उवाच ।

शङ्खचूड :—हे देवि, यदुक्तं तत् सत्यम्। किन्तु पुरा धात्रा सवमोहनं स्त्रीरूपं द्विविधं निर्मितम्। लक्ष्मी-सरस्वती-दुर्गाणामंशरुपा शतरूपादेवहुतिस्वधास्वाहादि वास्तव-रूपाः, एताभ्योन्यतमा कृत्यारुपा अप्रशस्या एव।[८] त्वं पुनः सत्त्वप्रधाना श्लाघ्या एव। ब्रह्मणो वचनेन गान्धर्वेण विधिना प्रतिग्रहीतुं त्वत्समीपमागतोऽहम्। अपरञ्च, हे तुलसी, आवयोर्जन्मकारणञ्च शृणु। पुरा सुदामानामाहं श्रीकृष्ण-पार्षदः आसम्। अधुना राधाशापात् दनुजवंशे शङ्खचूडनामा श्रीकृष्णमन्त्र-प्रसादात् जातिस्मरः सन् जातः। त्वमपि तत्प्रसादाज्जातिस्मरा पुरा हरिणा संसक्ता राधाशापाद् अत्र पृथिव्यां जाता।

सूत्रधार :—इत्युक्त्वा स तुष्णीमासीत्। ततः सस्मिता तुलस्युवाच।

तुलसी— हे सुन्दर, भवत्सदृशजनाः बुधैः प्रशंस्यन्ते, ये स्वरूपाख्यानेन कामिनीं पराजयन्ते। अधुना अहं सत्यविचारतस्तया पराजिता। अपिच यस्तु पुनः स्त्रियाजितः तस्य स्त्रीजितस्य विद्यया तपसाज्ञानेनापि किं स्यात्? यस्य स्त्रीजितस्य जलादिकं पितरो देवाश्च इच्छया न गृह्णन्ति केवलन्तस्य नरकवास एव स्यात्। अपिच विप्रक्षत्रियवैश्यशूद्राः दशद्वादशदिनपक्षमासैः शुद्ध्यन्ति। स्त्रीजितस्तु पुनश्चिता-दाहेनैव शुद्ध्यन्ति। अद्य पुनः स्वरूपाख्यानेन मां पराजयसे। अतस्त्वं सर्वेषां प्रशस्यतर एव।

सूत्रधार :—एवमुक्त्वा सापि तूर्णीं तस्थौ।

अथात्मभूर्वीक्ष्य तयोः परस्परं गिरां मनोज्ञत्वमियाय हंसगः।
विमानमारुह्य त्वरान्वितोदधत्कमण्डलुं सूत्रमसौभुजाभ्याम् ॥२६॥

अथ ब्रह्मा तयोरन्योन्यालापनं दृष्ट्वा हंसयानमारुह्य ब्रह्मलोकात् आगतवान्। एवं आगतं ब्रह्माणं तौ प्रणामं चक्रतुः। ततः प्रणमितौ तौ कृपया ब्रह्मोवाच।

ब्रह्मा— हे शङ्खचूड, अनया तुलस्या सह तव विवादेन किं स्यात्। स्त्रीरत्नं गान्धर्वेण विवाहेन सत्त्वरं गृह्णीयाः।

सूत्रधार :—इति शङ्खचूडमुक्त्वा तुलसीं प्रत्युवाच।

ब्रह्मा— हे धर्मध्वजनन्दिनि, मद्वाक्यमवधारय। दमयन्त्या नले यादृशी प्रीतिः, रोहिण्यां रजनीनाथे यादृशी, शच्या अपि महेन्द्रे यथा प्रीतिः, अनेन गुणिनासुरेण शङ्खचूडेनापि सह तव तादृशी प्रातिः स्यादेव। अतः सत्त्वरं अनेत प्रीतिं कुरु।

---

८। निर्म्मितं विविधं धात्रा स्त्रीरूपं सर्वमोहनम्।
कृत्यारूपं वास्तवं च प्रशस्यं चाप्रशंसितम्॥ ब्र. वै. (प्रकृति) १६-६४

किन्तु विदग्धायास्तव विदग्धेन पुंसा सह संगमः केवलं सुखायैव भवतु। पश्चात् शङ्खचूडे मृते त्वमपि इदं शरीरं त्यक्त्वा पुनः गोलोके गोविन्दमेव प्राप्स्यसि।

सूत्रधार :—एवं तौ सम्भाष्य पितामहो ब्रह्मा स्वस्थानमागतवान्।

स शङ्खचूडो विधिवाक्यमादराद् गृह्णन् तुलस्या विधिवद्विवाहकम्।
चकार गन्धर्व्वमयुग्मवाणजां पीडां मनाङ् न मनसा गृहीतवान् ॥२०॥

अथ शङ्खचूडः विधिवाक्येन तस्याः तुलस्याः गान्धर्व्वविधिना पाणिग्रहणमकरोत्। तस्मिन् विवाहसमये दिवि गन्धर्व्वा जगुः, अप्सरोगणाश्च ननृतुः। तत्पश्यत, शृणुत निरन्तरं जयकृष्णेति वदत।

## ( गीतम् )

राग—श्री।

भाग्यवती देवी सती विराजिछे भगवती ॥ध्रुं
देवी तुलसी सती जानि वर भाग्यवती।
रूपेर नाहिके पार गावे हेम अलंकार ॥२१॥
षोडश वत्सर बाला मुखपद्म चन्द्रकला।
भ्रूव रतिपतिधनु कटाक्षे हासिया पुनु ॥२२॥
हरे कामुकर मन मोह पावे मुनिगण।
पाइले मनोमत वर शिव दुर्गा पटन्तर ॥२३॥

सूत्रधार :—अनन्तरं तपोवनादागत्य विचित्रां शय्यां निर्म्माय तया सह एकमन्वन्तरं सुखसम्भोगं चक्रे। तत्रैव सर्वान् पृथ्वीपतीन् विजित्य स राजाधिराजो बभूव। अथ कियत्काले गते सर्वान् देवानपि जित्वा तेषां भूषणवाहनविषयान् यज्ञभागांश्च स्वयमेव बुभुजे। तदग्रतः सर्वे देवा चित्रपुत्तलिका इव आसन्[६]। एकदा देवाः परस्परं तप्यमानाः महेन्द्रे निवेदयामासुः। देवा ऊचुः।

देवा :— हे नाथ, त्वयि नाथे स्थितेऽपि शङ्खचूडेनास्माकं सर्वाणि भूषणवाहनयज्ञभागा अपहृताः। साम्प्रतमस्माकं का गतिस्तद्वदतु।

महेन्द्र :—हे हे देवाः, स दानवः ब्रह्मणो वरेण वर्द्धितः। वयं किमपि कर्त्तुं न समर्थाः। अतः पितामहं सर्व्वं विज्ञापयामः।

६। निरुद्यमाः सुराः सर्व्वे चित्रपुत्तलिका यथा।
ते च सर्व्वे विषण्णाश्च प्रजग्मुः ब्रह्मणः सभाम् ॥ (प्रकृति खण्ड, १६।१५७)

सूत्रधार :—एतत् महेन्द्रवाक्यं श्रुतवन्तो देवा स्वकीयं यानमधिरुह्य महेन्द्रं पुरस्कृत्य ब्रह्मलोकं प्रतिजग्मुः।

अथ दनुजवरिष्ठेनाहृता यज्ञभागाः
स्वविषयपरिबर्हा योषितश्चापि मुग्धाः।
शतमखमधिनाथं पूर्व्वतः कृत्वा देवाः
विधिपुरमुपजग्मुः स्व स्व यानैर्भयार्त्ताः ॥२४॥

ततो देवाः तेन दानवभयेनार्द्दिताः सन्तः शतमखमिन्द्रं पुरस्कृत्य ब्रह्मणः पुरं गतवन्तः। ततो ब्रह्मणोग्रे दण्डवत् प्रणिपत्य सर्व्वं शङ्खचूडवृत्तान्तं निवेदयामासुः। देवा ऊचुः।

देवा :— हे पितामह, शङ्खचूडेन दानवेनास्माकं सर्व्वे स्वाधिकारा अपहृताः। यज्ञभागमपिच स स्वयमेव भुंक्ते। अतः तेन दानवेन पीडिता वयं त्वयि शरणापन्नाः, यथायोग्यं तत् शमनोपायं विधेहि।

सूत्रधार :—तच्छ्रुत्वा तान्प्रति ब्रह्मोवाच।

ब्रह्मा— हे देवाः, शृणुत, असौ शङ्खचूडः पूर्व्वजन्मनि सुदामनामा गोपः राधाशापेन दानवीं योनिं प्राप्तः। स च पुष्करे मामाराध्य पश्चात् मद्वरेणाधुनावर्द्धितः। अतः तत् प्रशमनाय अशक्तोऽहं, तस्य दौर्जन्यं शङ्कराय निवेदयामः।

सूत्रधार :—इत्युक्त्वा ब्रह्मा देवैः सह शङ्करालयं जगाम। तत्र पार्व्वत्या सह संस्थितं महाभोगीन्द्रभूषणभूषितं शङ्करं प्रणम्य ब्रह्मोवाच।

ब्रह्मा— हे हे देवदेव, मद्वरेण वर्द्धितः शङ्खचूडनामा दानवेन्द्रः देवानां सर्व्वानधिकारानपहृत्य पीडयति। एतत् शमनोपायं सत्वरं कुरु।

सूत्रधार :—इति ब्रह्मणोवचनं निशम्य शिवो वदति स्म।

शिव :— हे पितामह, युष्माभिः यदुक्तं तत् सर्व्वं जानामि, तत् शमनाय अहमपि न समर्थः। सर्व्वे वयं तस्य शान्तये श्रीहरेर्न्निलयं वैकुण्ठं व्रजामः।

सनन्दनन्दप्रमुखैर्महद्भिः सङ्गीयमानैर्हरिकीर्त्तनैर्युतम्।
स शङ्करोब्रह्मसुरैः समेतो जगाम वैकुण्ठपदं सुदुर्लभम् ॥२५॥

सूत्रधार :—स शङ्करः ब्रह्मप्रमुखैः सह गत्वा सुनन्द-नन्दादिभिः परमहंसैः परिवृतं जरा-मृत्युवर्ज्जितं वैकुण्ठाख्यं स्थानं ददर्श।

स्वस्ति निर्ज्जरनिकरमुनिवृन्दवन्दितयोगीन्द्रसन्दोहप्रार्थितपदद्वन्द्वारविन्दनिःस्यन्दमानमकरन्दवेदवेदान्तविचारसारप्रकटीकृतस्य, त्रैलोक्यकामिनीजनमण्डन-

षपणाश्रयदुष्प्रापचतुर्व्वर्गपारावारप्रापणतरणितारिणीपद्मासेवितस्य, व्यासवाल्मीकि ज्ञानाबोध्यवैचित्रशाब्दप्रवाहस्थिरामविचारचातुरीविषयीभूतस्य, श्रीश्रीमद्भगवतो गोविन्दस्य, उद्यत्करदण्डमार्त्तण्डप्रतापबालगोपालमालप्रवालस्फाटिकमरकतहीरकस्वचितमार्गनानामणिस्वर्णमयप्रोत्तुङ्गशृङ्गमन्दारव्यूहानवरतपतितपुष्पनिवहभूषितसर्व्ववधूटीगण्डपीठपयोधरलेपितकुङ्कुमसौरभ्यश्रीविष्णुपदारविन्दनिर्भिन्नब्रह्मकटाहनिर्गतस्वर्गङ्गाजलजनिततरङ्गरिङ्गणशोधिताशेषस्थाननितान्तयोगाभ्यासपवित्रगात्रसिद्धगणसेवितचतुःपार्श्वाद्यधामश्रीवैकुण्ठ नाम श्रोतृगात्रसामाजिकानामनेकजन्मार्जितकिल्विषजनितदुःखध्वंसायास्ताम् ।

सूत्रधार :—एवम्भुतं वैकुण्ठं प्राप्य सर्वे देवा नारायणं ददृशुः । तत्र किरीटकेयूरादिभिरलंकृतं चतुर्भुजं शङ्खचक्रगदाम्बुजैरुपशोभितं श्रीनारायणं मध्यतः कृत्य पद्मया सह सर्वाः योषितः तद्गुणान् कीर्त्तयन्त्यः गीतं गायन्ति स्म ।

## ( गीतम् )

देख सखि सिंहासने विराजे गोपाल । ध्रुं

माथात किरीटि ज्वले        कर्णत कुण्डल दोले
रश्मिये राजित गण्डस्थल ।
चक्षु कमलर पासि        सदा मुखे मन्द हासि
प्रकाशय चन्द्रेर मण्डल ॥२६॥
श्याम अङ्गे विलेपित        मलयज सुगन्धित
गगनत येन शशधर ।
दन्ते निन्दे मुक्ताफल        कौस्तुभे शोभित गल
उरस्थले पान्ति श्रीवत्सर ॥२७॥
चौपाशे पार्षदराशि        लक्ष्मी मन्द मन्द हासि
श्वेत चामर धरि करे ।
दुले किंकरी भावे        देख सेवे तान पावे
आनन्दे नयने नीर जरे ॥२८॥
आमि कत भाग्य कैलो        नयने देखिते पाइलो
हे प्राण देव दामोदर ।
दीन द्विज वाक्य मधु        गुण गावे गोप वधू
ज्ञानीसवे अवधान कर ॥२९॥

सूत्रधार :—अनन्तरं नाना पार्षदप्रवरैः स्तूयमानं महालक्ष्म्या भगवत्याविधृतपदाम्बुजं, गङ्गया च श्वेतचामरं विधृत्य सेव्यमानं श्रीनारायणं प्रणम्य ब्रह्मादयो देवाः तुष्टुवुः। एवं नारायणं स्तुत्वा ते शङ्करप्रमुखाः तस्मै वृत्तान्तं निवेदयामासुः। देवाः ऊचुः।

## (स्तुतिः)

भजामहे जगत्पतिं पतिं श्रियोगिरामपि।
अपोन्दुनिन्दिपत्नखं नखाग्रदीपिदीधितिम् ॥२०॥
सुगल्पकिंकिणीरवं रवेण निन्दिताम्बुदम्।
नवाम्बुदच्छविं विभुं विभूतिं मद्हृदिस्थितम् ॥२१॥
हृदम्बुजे सुयोगीनामयोगीनां सुदूरगम्।
विदूरगोपयोपितां सिताभमानसाम्बुजे ॥२२॥
सुनन्दनन्दनैः समं समं वसन्तमच्युतम्।
अविच्युताम्बुजाननं लयेऽपिसन्तमेककम् ॥२३॥
वयंहि शङ्खपीडिताः प्रपीडिताः क्षुधावलात्।
बलाहितैः सुतं सुतैः समं जहीह दानवम् ॥२४॥

सूत्रधार :—एवं नारायणं स्तुत्वा ते शङ्करप्रमुखाः तस्मै वृत्तातं निवेदयामासुः। देवाः ऊचुः।

देवा :— हे भगवन् केनचित् शङ्खचूडनाम्ना दानवेन्द्रेण अस्माकं सर्व्वान् भवद्दत्तविषय-भूषणादीनाक्रम्य स्वयमेव बुभुजे। तद्भयाहिता वयं कुत्रापि स्थातुमशक्ताः। अतस्त्वयि शरणापन्नानस्मान् रक्ष।

सूत्रधार :—ततस्तेषां कारुण्यपुरःसरं वाक्यं निशम्य सर्व्वज्ञो हरिस्तान्प्रति श्रीनारायण उवाच।

नारायण :—भो देवाः, शङ्खचूडस्य पूर्व्ववृत्तान्तं शृणुध्वम्। स च शङ्खचूडो महायोगीन्द्रः पूर्वं मम सुदामानामा पार्षदश्रेष्ठ आसीत्। एकदा गोलोके विरजया सह क्रीडन्तं मां राधिका मर्त्सयामास। तद्दृष्ट्वा सुदामा असहमानस्तामपि अनिन्दयत्। ततो राधा कोपेन प्रज्वलिता सुदामानमशपत् 'अरे लम्पट, किंकर, दुष्ट, सर्व्वेषामुत्पत्तिस्थितिसंहारहेतुमिश्वरीं मां प्रति किञ्चिदपि भयं न करोषि, अतस्त्वं भारते दानवीं योनिं गच्छ' इति शापं श्रुत्वा कम्पमानो मम चरणे प्रणिपत्य उच्चैः रुरोद। ततो रुदन्तं तं दृष्ट्वा कृपयाहं इत्युक्तवान। हे वत्स, अनिवार्येण राधा-शापेन भारतं गत्वापि अविस्मृतज्ञानो मद्भक्तः सन् नानाविधान् भोगान् भुक्त्वा पुनरचिरेण मत्स्थानं प्राप्स्यसि, इत्यनुग्रहस्तस्य सम्बन्धी पूर्व्वमेव कृतः। अतोऽसा

दानवो ममानुचरत्वात् ममतुल्यबलः, कैरप्यपराजितः, तद्धनने यूयं न समर्थाः। सम्प्रत्येवं कुरुध्वम्। मया दत्तमिदं शूलं गृहीत्वा यूयं भारतं यात। अनेन शूलेनैवासौ श्रीमहादेव एव हनिष्यति।

सूत्रधारः—इति देवानाभाष्य श्रीहरिस्तन्मृत्युकालमपि कथयति स्म।

नारायणः—हे देवाः, संग्रामे यदाहं भिक्षाच्छलेन तत्कण्ठस्थितं मम समन्तकवचं गृहीत्वा तत्स्वरूपेण तत्पत्न्यास्तुलस्याः पतिव्रतायाः यदा व्रतभङ्गं करिष्यामि तदा मत्शूलतो मृत्युर्भविष्यति। तत्पत्नी तुलस्यपि पश्चात् व्रतभङ्गं विज्ञाय देहं त्यक्त्वा ममास्पदमेव लप्स्यते।

सूत्रधारः—इत्युक्त्वा भगवान् रुद्राय शूलं दत्त्वा अभ्यन्तरं जगाम। ततो महादेवो हर्षेण शूलं गृहीत्वा ब्रह्मादिभिः सह भारतमागतवान्।

श्रीनारायणवाक्यमाशुशिवदं श्रुत्वातिहर्षान्विता-
ब्रह्माद्यास्त्रिदशेश्वरास्त्रिनयनं सम्मोदयन्तो विभुम्।
स्वं स्वं यानमधिस्थिता अनुमतिं नारायणेनोदितां
स्मारं स्मारमथाच्युतस्य कथनं संकीर्त्तयन्तो ययुः ॥३५॥

सूत्रधारः—अथ ब्रह्माद्याः महादेवं प्रशंस्य स्वकीयं यानमाश्रिता हरेर्गुणाननुकीर्त्तयन्तो निजस्थानं निर्ययुः। अथ महादेवस्तेषां देवानां परिदेवनां संस्मृत्य सत्त्वरं नन्द्यादिगणावृतः सन् पार्व्वत्या सह शङ्खचूडवधार्थं नारायणदत्तं शूलं गृहीत्वा चन्द्रभागानदीतीरस्थितवटमूलमागतवान्। तत्पश्यत, शृणुत निरन्तरं जयकृष्णेति वदत।

## ( गीतम् )

राग—काफिर।

ताल—एकताल।

विराजे शङ्कर शिवनाथ॥ ध्रुं

पञ्चानन त्रिनयन    शिव वृषभवाहन
भस्म-विभूषित अङ्ग राजे।
गङ्गाधर महेश्वर    शूलपाणि दिगम्बर
मुण्डमाला खट् खट् बाजे॥६६॥

वटमूले पशुपति दीनजनेर गति
दानव वधिये मन करि।
उमापति शशधर करि आछे आडम्बर
विष्णुदत्त महाशूल धरि ॥३७॥
सङ्ग शोभे भूतगण दानव वधिवे मन
चाहिया रहिला वटमूले।
आइल देवी भगवती युद्ध चाहिवाक प्रति
यार रूपे सिद्ध मुनि भोले ॥३८॥

एवमागत्य महादेवः सपार्षदश्चन्द्रभागातीरस्थवटमूले स्थित्वा स्वपार्षदं पुष्पदन्तं प्रत्युवाच।

महादेवः—हे पुष्पदन्त, त्वं सत्वरं शङ्खचूडस्य नगरीं गत्वा इदं विज्ञापय। देवानां पक्षपाती सन् युद्धं कर्त्तुमहमागतः। तेनाहृतान्देवाधिकारान् सत्वरं त्यजतु, नोचेत् मया सह युद्धमागच्छतु।

सूत्रधारः—ततः पुष्पदन्तः शिवस्य आज्ञां शिरसि विधृत्य सत्वरं शङ्खचूडस्य पुरीं जगाम। ततस्तत्पुरं पञ्चयोजनविस्तृतं दैर्घ्येणापि शतयोजनप्रमाणं नानामणिप्रवालनिवद्ध-मार्गं स्फटिकमरकतादिविरचितसौधगणभूषितं रत्नेन्द्रसारसंच्छन्नशतद्वारप्रदेशं एवम्भूतं नगरं पुष्पदन्तोऽपश्यत्। स च शङ्करप्रसादादवाधितगतिः तत्पुरं प्रविश्य अशेष रत्नसारनिर्म्मितसिंहासने हर्षेण उपविष्टं अनेक-प्रबलतरदानवेन्द्रैः परिवृत्य सेवितं दानववय शङ्खचडं ददर्श। ततः पुष्पदन्तः शङ्करादेशं कथयामास। पुष्पदन्त उवाच।

पुष्पदन्तः—हे दानवेन्द्र, भगवता शङ्करेण यदाज्ञा कृता तच्छृणु—शङ्खचूडेन देवानां सव-यज्ञभागादिकमपहृतम्, सत्वरं परित्यज्य तेभ्यो दीयताम्। नोचेत् स च मया सह युद्धं कर्त्तुं शीघ्रं आगच्छतु।

सूत्रधारः—इति शङ्करादेशं निशम्य मन्त्रिभिः समालोच्य पुष्पदन्तं प्रति शङ्खचूड उवाच।

शङ्खचूडः—हे दूत, भगवता शङ्करेण यदाज्ञापितं तत् सर्व्वं युक्तमेव, तथापि अस्माकं युद्धकातर्य्येण सर्व्वस्वत्यागः मरणादपि अधिकतर एव। अतो भगवति रुद्रे नमस्कारपूर्व्वकं मम वाक्यं ज्ञापयिष्यसि। अहं श्वो दिवसे प्रभात एव युद्धाय तत्समीपं यास्यामि।

सूत्रधारः—इति वाक्यं निशम्य पुष्पदन्तः शिवालयमागत्य शङ्खचूडस्य वार्त्तां निवेदयामास। पुष्पदन्त उवाच।

पुष्पदन्तः—हे भगवन् शिव, त्वया शङ्खचूडम्प्रति यदाज्ञापितं तत् सर्व्वं मया कथितम्। स च युद्धं विना देवानां सर्व्वस्वादिकं न त्यजति। किन्तु आगते श्वो दिवसे प्रभात एव स्वसैन्यपरिवृतो भवत्समीपमागमिष्यति। अधुना यदुचितं तत् कुरु।

सूत्रधारः—एतच्छ्रुत्वा शङ्करः उच्चैर्जहास।

अथ युद्धगतम्वीक्ष्य शङ्करं जगतां पतिम्।
सगणः कार्त्तिकेयोऽपि सन्नद्धो युद्धमाययौ ॥३९॥

सूत्रधारः—अनन्तरं युद्धगतं स्वपितरं शङ्करं वीक्ष्य कार्त्तिकेयः वीरभद्रश्च, महाकाल-कपिलाक्ष पिङ्गलाक्ष-विरूपाक्ष-मणिभद्र-दीर्घदंष्ट्र-विकटकूट-कालकूट-कालजिह्व-ताम्रलोचन-रणोन्मत्त-दुर्जय-दुर्गमाद्या एकादश रुद्राश्च, अष्टौ वसवोऽपि उद्यतास्त्राः हर्षेण शिवान्तिकमाजग्मुः। अनन्तरं शिवानुचरानागतान् दृष्ट्वा इन्द्रादयो देवा महादेवान्तिकं आययुः। निर्यातान् तान् वीक्ष्य कोट्टरी-कैटभी-उग्रदंष्ट्रादिभिः कोटिमातृभिः परिवृता रक्तवसना रक्तमाल्यानुलेपना शतभुजा भद्रकाली रणस्थानमागतवती। अथ स्कन्दः सर्व्वैर्वीरभद्रादिभिः पितरं नमस्कृत्य इदमुवाच।

कार्त्तिकेयः—हे प्रभो, सुरसंघसेवितपादपङ्कज तव यद् यत् कर्त्तव्यं तत्तदहमाचरामि, शीघ्रमादिश।

सूत्रधारः—इत्युक्त्वा स्कन्दस्तूष्णीं तस्थौ।

ततो दूते गते तस्मिन् पुष्पदन्ते महात्मनि।
शङ्खचूडो यत्कृतवान् तत् शृणुध्वं सभासदाः ॥४०॥

शङ्करानुचरे पुष्पदन्ते गते स च दानवेन्द्रः शङ्खचूडः सभाया उत्थाय अभ्यन्तरं प्राप्य सर्व्वं शङ्करोदितां वार्त्तां कथयामास।

शङ्खचूडः—हे प्रियभाषिणि तुलसि, श्रीमता शङ्करेण पुष्पदन्तदूतद्वारा यदाज्ञापितं तच्छृणु शङ्खचूडेनानीत देवविषयान् रत्नादीनिच शीघ्रं दीयन्तां, नो चेत् श्रीनारायणदत्तशूलस्याभिमुखीभूय आगच्छतु। अस्मिन्मया किं करणीयं तत्कथय।

सूत्रधारः—अथ प्रियमुखादप्रियतरां युद्धयार्त्तां श्रुत्वा सा तुलसी शुष्कौष्ठतालुका स्वामिनम्प्रति इदमुवाच।

तुलसी— हे अखिलदानवत्रयसेवितपादसरोज, अद्यरजन्यां त्वं गर्द्दभवाहनो रक्ताम्बरधारी निर्म्मुक्तकेशयन्धो याम्यां दिशमभिगत इति त्वन्नाशसूचको दुःस्वप्नः मया दृष्टः। अवश्यं शङ्करस्त्वां हनिष्यति। इत्येव मद्वत्तमिदं षडरसयुक्तमन्नादकं भुक्त्वा मम जन्मान्तरसमाधानं विहारं कुरु।

तुलसीवाक्यमाकर्ण्य शङ्खचूडो जितेन्द्रियः ।
ज्ञानेन तां महाप्राज्ञां शान्तयामास धर्म्मवित् ॥४१॥

सूत्रधारः—शङ्खचूडस्तां तुलसीं मृत्युकातरां दृष्ट्वा इदमुवाच ।

शङ्खचूडः—हे सुन्दरि, सृष्टिस्थित्यन्तहेतुः सर्व्वेषामन्तर्यामी अनादिरीश्वरः तेनैव महामायां प्रकृतिं अधिस्थाय सत्त्वादिगुणभेदतो जीव इति संज्ञया नानास्थावरजंगमरूपत्वेन इदं ब्रह्माण्डं व्याप्तम्। अवश्यमुत्पत्तिः पालनं मृत्युश्चापि तस्येच्छयैव अनुदिनं वर्त्तत एव, अत्र का भीतिः ? अतस्त्वयात्र शोको न कार्य्यः ।

सूत्रधारः—ततः शङ्खचूडः तामितिदिव्यज्ञानेन सम्बुध्य षडरसादियुक्तमन्नं पश्चामृतञ्च भुक्त्वा पीत्वा तया प्रार्थितं नानाक्रीडाकौतूहलं कृतवान्। अथ वैष्णवप्रवरः प्रभाते उत्थाय कृतशौचः विमले चन्द्रभागाजले स्नात्वा इष्टदेवं श्रीकृष्णं सम्पूज्य ब्राह्मणेभ्यो यात्रार्थं गोरत्नानि दत्तवान्। ततः सर्व्वान् दानवश्रेष्ठान् मन्त्रिणाह-यानीय तदग्रतः सुचन्द्रे पुत्रे राज्यं समर्प्य वदति स्म।

शङ्खचूडः—हे पुत्र सुचन्द्र, भगवान् श्रीरुद्रः देवानां हितमिच्छन् मया सह योद्धुमायाति। अतो युद्धायाहं व्रजामि। त्वं मम प्रतिपालितं राज्यं पालयस्व।

सूत्रधारः—इति पुत्रमामाष्य सारथिनं प्रत्युवाच।

शङ्खचूडः—हे सारथिप्रवर, सत्त्वरं नानाशस्त्रास्त्रसम्भृतं रथवरं मयि नियोजय।

सूत्रधारः—अथ सारथि नानारत्नादिनिर्म्मितध्वजपताकादियुक्तं नानादिव्यास्त्रधनुर्भिः सम्भृतं रथवरं सज्जीकृत्य तूर्णमेव राज्ञे नियोजितवान्। ततः स राजा महा-ढक्कानादैः नागरिकान् स्वसैन्याश्च महासंग्रामचेष्टां ज्ञापयामास। ततो दूतान् प्रेरयन् नानादेशाधिपतीन् तत्प्रतिपालितान् दानवेन्द्रान् नृपतीश्चानीय युद्धाय सन्नद्धो बभूव। ततः महायुद्धविशारदानां धानुष्काणां त्रिकोटीन् चर्मिणामपि त्रिकोटीन्, कोटि-कोटि रथपदातीन्, नृपाणां कोटिशः, असंख्येयान् गजाश्वान्, अपराः सहस्रकोटिशः सेना आनीय रत्नविरचितं रथवरमारु[illegible]वज्ञान् ब्राह्मणान-ग्रतः कृत्वा युद्धाय शङ्करान्तिकं प्रययौ। तत्पश्यत, शृणुत निरन्तरं जयकृष्णेति वदत।

## ( गीतम् )

राग—मालची ।

ताल—परिताल ।

चलिल नरपति सैन्य चतुर्मिति
रथगज असंख्यात ।
अस्त्रशस्त्र यत धरिया करत
राजा चले विमानत ॥४२॥
पृथिवीक प्राय सेना चलि याय
धूलाये ढाकिल दिश ।
बजावे मृदङ्ग कतो करे रङ्ग
आनन्दे करे हरिष ॥४३॥
देखि देवचय भयते काम्पय
दैत्यर देखि आटोप ।
अन्योअन्ये चाहि भयते लुकाय
रैल करि चापचुप ॥४४॥

अङ्कान्ते सूत्रधारः पठति ।

यो वृष्णेः कुलतोऽवतीर्य्य भगवानाभीरवामाञ्चितं
बिभ्रत् श्यामलविग्रहं प्रविलसद्ब्रह्माण्डभूवीत्रयम् ।
नन्दस्यालयसंस्थितो व्रजजनानन्दीसमं बालकैः
क्रीडाकौतुकभावमविरकरोत्तं कृष्णदेवं भजे ॥४५॥
सन्दिक्कुलसिताब्जप्रकाशतरणिप्रभः ।
सम्मोदमानः सततं भूयात् मन्त्रिवराग्रणीः ॥४६॥

इति ब्रह्मवैवर्त्तपुराणप्रकृतिखण्डसमुद्धृते तुलसीजन्मकथनं नाम द्वितीयोऽङ्कः ।

# तृतीयोऽङ्कः

यो देवासुरवृन्दभीषणकरीमास्थाय रौद्रीं तनूं
क्रुद्धोभीमगभीरहास्यनिनदैः संक्षोभयन् सागरान् ।
कल्पान्ते सचराचरं खलु हरेर्व्विचित्रलीलास्पदं
विश्वं संहरतेऽखिलं तमनिशं भर्गं नताःस्मोवयम् ॥१॥

अपिच—

यो विद्याराशिमादौ भवजलधितरिं मोक्षमार्गैकहेतुं
प्रादुश्चक्रेऽद्रिजायां कलिकलुषभयान्मानवान् त्रातुमीशः ।
तं भास्वद्भूतिभूषान्वितनतुममलं भोगिभिर्भूषिताङ्गं
वन्दे शुभ्रांशुखण्डोज्वलममरवरध्येयं योगीशवन्द्यम् ॥२॥

सूत्रधारः—दूरतः स्वसैन्यानि नियमितानि परिहृत्य कतिभिरनुचरैः सह गत्वा पुष्पभद्रानदीतटस्थं कृतयोगासनं शुद्धस्फटिकसंकाशं ब्रह्मतेजसा ज्वलन्तं शूलपट्टिशादि नानास्त्राणि बिभ्रतं महाकाली कार्त्तिकेयनन्दिभृंग्यादिभिरावृतं पञ्चाननं श्रीरुद्रं वीक्ष्य भक्त्यावनतो जय जय इत्युच्चार्य दण्डवन्निपत्य तं प्रणनाम। एवं महादेवं प्रणम्य जगज्जननीं भद्रकालीं कार्त्तिकेयमपि प्रणमति स्म। ततः ते दानवेन्द्रं प्रति जय जयेति आशीर्व्वादं चक्रुः। अथ शङ्खचूडं सुनृतवाक्यैः प्रशंस्य शिवः इदं वदति स्म। शिव उवाच।

शिव :—हे वैष्णवप्रवर, त्वं विष्णुभक्तः विषतुल्येन तव अनेन राज्यभोगेन किम् ? ये वै भगवद्भक्ताः ते सालोक्यादिकमपि न वाञ्छन्ति। विष्णुपरायणस्य राज्यभोगः तद्भक्तिप्रतिबन्धकीभूतत्वात् अप्रसिद्धः। अतस्त्वं विष्णुभक्त्यन्तरायरूपं देवानां राज्यादिकं सत्त्वरं त्यज।

सूत्रधारः—ततः दानवेन्द्रः इति निशम्य शङ्करं प्रत्युवाच।

शङ्खचूडः—हे अखिल-विश्वशासन गुरो, त्वया यत्कथितं तत्सत्यमेव। तथापि मम यथार्थं कियन्निवेदनं श्रूयताम्। देवैः सह अस्माकं सर्व्वत्र वैरत्वेन कालो गत एव। पुरा हिरण्यकशिपुना चिरकालं तपः तप्तम्। स च देवैः हिंसितः। देवैः हरेर्द्वारास्मान् वञ्चयित्वा अमृतं पीतम्। ततः कति कालान्तरे सार्वभौमो बलिः याञ्चाच्छलेन लोकत्रयात् प्रस्थापितः। तमनुगृह्य हरिः सुतलतः अद्यापि तद्द्वारे कौमोदकीं गदामादाय तिष्ठति। एवं वारम्वारं पुरुषानुक्रमेणास्माकं

ईश्वरेच्छया देवैः सह विरोधेन कालो गत एव, केवलं भगवतः श्रीकृष्णस्य क्रीडाभाण्डमिदं विश्वं स एवानुगृह्य यस्मै ददाति तस्मै एव राज्यं भवति। सर्व्वेषां जयपराजयावपि तस्येच्छया एव भवतः यत्रावयोः देव-दानवयोर्व्विरोधे देवानां पक्षपातित्वेन न भवदागमनं न्यय्यम्। सर्व्वभूतसमस्य ईश्वरस्य तव द्वेषभावः अयोग्यः। प्राकृतैरस्माभिः सह युद्धजयेऽपि का कीर्त्तिर्भविता, पराजयेऽपि अधिकतरा लज्जा भवति।

सूत्रधारः—शङ्खचूडस्य इति वचः श्रुत्वा त्रिलोचनस्तं प्रत्युवाच। शिव उवाच—

शिवः—हे राजन्, यदुक्तं ईश्वरस्येच्छया जयपराजयादिकं तत्सर्व्वं सत्यं यत् त्वया सह मम संग्रामकरणमयोग्यमिति, तथापि देवैः भक्तिरज्ज्वाबद्धोऽहं तत्पक्षपाती योद्धुमागतः। अपि च भवद्वंशैः सह अस्माकं युद्धपरम्परा प्रवर्त्तिता एव। प्रथमं हरिणा सह हिरण्यकशिपोर्युद्धमासीत्, मयापि त्रिपुरोऽयुध्यत्। जगज्जनन्या प्रकृत्या च सह शुम्भनिशुम्भादीनां अद्भुतः संग्रामोऽभवत्। ततो भवतः पूर्व्वपुरुषा अपि प्रशस्यतराः आसन्, त्वमपि पूर्णभगवतो हरेः पार्षदप्रवरः, त्वया सह युद्धे मम का लज्जा भवेत्। अपि च, हे दानवेन्द्र यदि त्वं युद्धकातरोऽसि तर्हि सत्त्वरं देवानां आहृतान्यलंकारादीनि राज्यञ्च प्रत्यर्पय।

सूत्रधारः—एतदुक्त्वा शङ्करो विरराम। अथ शङ्खचूडो युद्धविशारदः शङ्करस्य एतद्वचः श्रुत्वा तं प्रत्युवाच।

शङ्खचूडः—हे भगवन्, संग्रामादहं न बिभेमि, किन्तु ईश्वराधीनमिदं जगत्, तेन यत्कारितं तदवश्यं भवत्येव। किन्तु त्वया ममापराधः क्षन्तव्यः।

सूत्रधारः—इत्युक्त्वा सदानवचूडामणिः सत्त्वरं शक्रसमान् दानवान् अन्यान् नृपतीन् रथाश्व-गजपदातीन् अनेककोटिशः सेना अपि सज्जीकृत्य युद्धोद्यमं चक्रे। ततो महारत्न-कोटिविनिर्मितं रथमधिरूढो नानास्त्रशस्त्रविशारदैः सैन्यैः समं रणभूमौ प्रविशति स्म।

दृष्ट्वा युद्धोद्यतं तं समरमधिगतं दानवेन्द्रं ससैन्यं
नानालंकारशोभं सुरवरमनुजैर्दुर्ज्जयं शङ्खचूडम्।
उद्यन्तो वज्रपाशाङ्कुशपरिघगदाः स्वस्वयानाधिरूढाः
शक्राद्यदेवसंघा निजबलसहिता युद्धभूमावतस्थुः॥३॥

सूत्रधारः—अथ दानवसैन्यावृतं रणमूर्द्धन्युपस्थितं शङ्खचूडं इन्द्रादयो देवा अपि उद्यतास्त्रा नानाभूषणानि परिधाय स्वबलैः सह युद्धभूमौ प्रतस्थिरे। तत् पश्यत, शृणुत निरन्तरं जयकृष्णेति वदत।

( गीतम् )

राग—कल्याण ।

ताल—एकताल ।

दानवप्रवर साजि आसिवार देखि ।
सवे देवगणे धाइल क्षाणिको नापेक्षि ॥
धर धर मार मार बोले काट काट ।
बाहु दाम्फि कतोजने मारे वारु चाट ॥४॥
दानवक प्रति कोपे गर्जिबाक लैला ।
तिरस्कार करि गालि पारिवे लागिला ॥
पापिष्ठ दानव आमासाक दिलि दुख ।
आजि अन्त करिबो तोहार यत दुख ॥५॥
दीनद्विजे कहे शुन रसिकप्रवर ।
मैलेक अद्भुत युद्ध देव दानवर ॥६॥

सूत्रधार :—ततो अपरे देवा अपि स्वामिनं इन्द्रं योयुद्ध्यमानं वीक्ष्य तेऽपि दानवश्रेष्ठैः अन्योन्यद्वन्द्वीभूय अयुद्ध्यन्त । एवं विप्रचित्तिदनुजेन भास्करस्य, दम्भेन सह चन्द्रस्य, कालेश्वरेण शनैश्चरस्य, विश्वकर्मणो मयेन, कुवेरस्य कालकेयेन, यमस्य संहारदानवेन, वरुणस्य कालविङ्कदैत्येन, वुधस्य केनचित् घृतपृष्ठदानवेन, अग्नेः गोकर्णेन, जयन्तकुमारस्य रत्नसारेण, उग्रचण्डादिभिः दैत्यैः सह एकादशरुद्राणामेवं अपरया देवदानवसैन्ययोरन्योन्यं महत्तुमुलमभूत्[१०] । अनन्तरं देवदानवसैन्यानां मांसशोणितैः तद्रणस्थलो पङ्काकुलिताभूत् । अथ प्रवलैर्दैत्यसेनाभिः पराजिता सन्तः सर्व्वे देवा भयभीताः प्रदुद्रुवुः । अथ स्कन्दो दानवसैन्यार्द्दितान् देवान् दृष्ट्वा सत्वरं शिखियानं अधिरुढो नन्दादिप्रमथैः सह तस्मिन् महति संग्रामे प्रविवेश । ततो देवानभयं दत्वा कार्त्तिकेयः कालाग्निरुद्र इव ज्वलन् दिव्यास्त्रैर्दानवानामक्षौ-

---

१० । स्वयं महेन्द्रो युयुधे सार्धं च वृषपर्वणा ।
भास्करो युयुधे विप्रचित्तिना सह सत्वरः ।
दम्भेन सह चन्द्रस्य चकार समरं परम् ।
कालेश्वरेण कालस्य गोकर्णेन हुताशनः ।
कुबेरः कालकेयेन विश्वकर्म्मा मयेन च ।
भयंकरेण मृत्युश्च संहारेण यमस्तथा ॥

ह्णिीशतं सेनानां जघान। अपरे दानवा विप्रचित्तिप्रमुखाः सेनापतयश्च स्कन्दशरज्वालेन क्षतविक्षताः सन्तः पलायिताः। तस्मिन् समये स्वर्गे दुन्दुभयो नदन्तः। कार्त्तिकस्य मूर्ध्नि देवाः पुष्पवृष्टिश्चक्रुः।

समीक्ष्य निजसैन्यानां पीडनं स्कन्दबाणतः।
आरुह्य यानं कोपेन दानवेन्द्रोविशन्मृधे ॥७॥

अथ शङ्खचूडो निजसैन्यान् स्कन्दपीडितान् वीक्ष्य घोरयानमारुह्य कोपेन रक्तलोचनो भयङ्करं सिंहनादं कृत्वा तस्मिन् महति संग्रामे प्रविवेश। ततो भयङ्करं धनुरादाय स्कन्दं प्रति शरवर्षं ववर्ष। तच्छरवृष्टिश्च घोरान्धकारे वज्रोत्थानमिवासीत्। ततो शरज्वालैः क्षतविक्षताः सन्तः नन्दिभृङ्ग्यादयः प्रमथाः भीता दुद्रुवुः। स्कन्द एक एव तस्मिन् तस्थौ। ततः शङ्खचूडः पर्व्वतानां शिलानाञ्च वर्षणेन शिवसुतं मेघाच्छन्नं भास्करमिवाकरोत्। अनन्तरं शङ्खचूडः दिव्यास्त्रैः स्कन्दस्य चापं रथं घोटकानपि चिच्छेद। मयूरमपि शरजालेन व्यथितश्चकार। ततो दानवेन्द्रः कार्त्तिकं प्रति शक्तिं चिक्षेप। तत्शक्तिविद्धो भवसुतो मूर्च्छामवाप। ततः चेतनां प्राप्य देवसेनापतिः स्कन्दः विष्णुदत्तं रथमारुह्य अन्यधनुरादाय अस्त्रशस्त्राणि गृहीत्वा दैत्यप्रहारितान् पर्व्वतान् चिच्छेद। तत् पश्चाद्दानवेन्द्रः वह्निबाणं चिक्षेप। तद्दृष्ट्वा स्कन्दोऽपि पर्जन्यबाणेन तदग्निं निर्व्वापयामास। ततः कार्त्तिकेयः तीक्ष्णबाणैः दानवस्य ससारथिं दिव्यरथं धनुः सन्नाहं रत्नकिरीटमपि छित्वा तद्वक्षसि शक्तिं चिक्षेप। ततः शक्त्या व्यथितः सन् दानवो मूर्च्छां प्राप। अथ दानवाधिपतिः चेतनां प्राप्य पुनः पार्व्वतीनन्दनस्य हृदि शक्तिं प्रहृतवान्। तच्छक्त्या-व्यथितः कुमारः मूर्च्छां प्राप। अथ भद्रकाली शोकव्यग्रा मूर्च्छितं कुमारं क्रोडे कृत्वा रणमध्यतः शिवसमीपं निनाय। ततः शम्भुः मृतप्रायं पुत्रं लीलया जीवयामास। ततः शिवप्रसादेन प्रवृद्धबलः कुमारः पितुः समीपे तस्थौ।

कालीकालकरालभीमवदना क्रुद्धाभुजैर्बिभ्रती
तीक्ष्णं खड्गमयेषुचापपरिघान् भ्रान्त्वा रणप्राङ्गने।
दैत्यानां शतशो बलानि सहसैवाहन् भुजेकेन सा
क्षिप्यन्ती स्वमुखे जघान दनुजान् संचूर्णयन्ती परान् ॥८॥

अथ महाकाली क्रुद्धा रणप्राङ्गने प्रविशन्ती दैत्यानां शतशः सेनाः जघान। एवं बहुशः सेनाः निहत्य सा महाकाली घोरतरवेशेन ननर्त्त। तत् पश्यत, शृणुत निरन्तरं जयजय कृष्णेति वदत।

## ( गीतम् )

रणरसे नाचे दिगम्बरी।
दिगम्बरी मुक्तकेशी उलंगट घोरवेशी
पदभरे नासहे धरणी।
माथाय शोभे जटाजुट मुण्डमाला खटाखट
हेमहार ग्रीवे नाना मणि ॥९॥
जलदवरणी काली चामरे दुलिछे भालि
विग्रहेते रक्तचिटा राजे।
शरीरे वसनहीन विकट दशनगण
चरणे नपुरध्वनि वाजे ॥१०॥
अट्टहासे दैत्य त्रास अनुचरी लये पाश
दानवर करय विनाश।
दीनद्विज प्रत्युत्तर शुनि मा करुणाकर
पदतले दियोक निवास ॥११॥

कालिकापीडितान् दैत्यान् विलोक्य दानवाधिपः।
शङ्खचूडोऽभयं तेभ्यो दत्त्वा कालीमधावत ॥१२॥

सूत्रधारः—ततः कालिकार्दितान् स्वसैन्यान् वीक्ष्य निजयानमधिरूढः तामधावत्। तं दानवमागतं वीक्ष्य सा काली कोपेन धनुरादाय शङ्खचुडम्प्रति अग्निबाणं चिक्षेप। ततो वैष्णवप्रवरः तां प्रणम्य पर्जन्यबाणेन तदग्निशरं निवारयामास। तदग्निबाणं निष्फलं दृष्ट्वा नारायणास्त्रं सा प्रेषितवती। ततो महावैष्णवः तन्नारायणास्त्रमागतं वीक्ष्य सत्वरं रथादभिगत्य दण्डवद्भूमौ निपत्य प्रणनाम। ततो भक्तिनम्रं दानवसत्तमं दृष्ट्वा तन्नारायणास्त्रं परित्यज्य कृपया ऊर्द्धं जगाम। तद्विफलं नारायणास्त्रं दृष्ट्वा सा शतसूर्यसमप्रभां महाशक्तिं चिक्षेप। दानवोऽपि तां शक्तिं तीक्ष्णास्त्रेण शतखण्डानि चकार। अथ काली महाकोपेन प्रज्ज्वलिता रक्तलोचना तम्प्रति पाशुपतं जग्राह। तस्मिन्नेव समये दैवी वागभूत्।

---

कलविङ्केन वरुणः चञ्चलेन समीरणः।
बुधश्च घृतपृष्ठेन रक्ताक्षेण शनैश्चरः।
जयन्तो रत्नसारेण वसवो वर्चसां गणैः।
अश्विनौ वै दीप्तिमता धुम्रेण नलकुवेरः॥ (ब्र. वै. १९।२२-२६)

दैवी वाणी—हे कालिके, अस्य कण्ठे कृष्णकवचं यावदस्त्येव पत्न्याः तुलस्याः पतिव्रताधर्मस्तावदस्य मृत्युर्नास्ति, अकारणं पाशुपतप्रहारं मा कुरु।

सूत्रधारः—इत्येवं दैववाणीं निशम्य पाशुपतास्त्रं त्यक्त्वा दानवानां शतं मुखे क्षिप्यन्ती चूर्णीचकार। ततस्तेषां मांसशोणितैस्तृप्त्वा सा भद्रकाली पश्चाद्धोरवेशेन शङ्खचूडं ग्रस्तुमधावत्। तद्दृष्ट्वा शङ्खचूडोऽपि सुतीक्ष्णेन दिव्यास्त्रेण महाकालीं निवारयामास। दानवास्त्रनिवारिता सा तं परित्यज्य दिव्यास्त्रैः तस्य सारथिं यमगेहं निनाय, मुष्टिना तद्रथमपि बभञ्ज। ततो भूमिगतं दानवं हन्तुं प्रलयानलोपमं शूलमक्षिपत्। अथागतं शूलं स शङ्खचूडः लीलया वामहस्तेनाग्रहीत्। अनन्तरं व्यर्थीभूतं शूलं वीक्ष्य सा कोपेनोज्ज्वलिता सती नानादिव्यास्त्रं चिक्षेप। ततस्तया यदस्त्रविशेषं प्रक्षिप्तं तत्प्रतिकारकैरस्त्रविशेषैः सोऽपि तानि लीलया चिच्छेद। ततः सा धनुः शरांश्च त्यक्त्वा वेगेन तस्य हृदये मुष्टिमताडयत्। तस्या मुष्टिघातेन व्यथितो दानवेन्द्रः मुर्च्छां प्राप्य भूमौ पपात। अनन्तरं चेतनं लब्ध्वा उत्थाय समीपस्थामपि कालीं पुनः न प्रहृतवान्, किन्तु तच्चरणमेव भक्त्या प्रणनाम।

> या माया भवस्वर्गपालनकरी संहाररूपिण्यजा-
> दैत्येशं प्रणतं निरीक्ष्य कृपया त्यक्त्वाथ सा लीलया।
> आदायैकभुजेन कोटिदनुजान् निःक्षिप्य वक्त्रान्तरे-
> भक्षन्ती हिमवत्सुता भगवती शम्भोः समीपं गता ॥१३॥

अथ काली प्रणतं शङ्खचूडं त्यक्त्वा लीलया कोटिशो दैत्यान् भूजैकेनादाय भक्षयन्ती सती शङ्करान्तिकं जगाम। ततः शङ्कराग्रतः सर्व्वं युद्धवृत्तान्तमाचख्यौ। कालिकोवाच।

कालिका—हे देव, मया सह तेन शङ्खचूडेन पूर्व्वं देवासुरगन्धर्व्वेषु अप्रवृत्तं महद्युद्धमभूत्। स च मातृबुद्ध्या मय्यस्त्रजातानि नाक्षिपत्। किन्तु मया क्षिप्तानि अस्त्राण्येव छिन्नानि। अनन्तरं पाशुपतास्त्रप्रहरणोद्यतायां मयि दैववाण्यभूत् हे कालिका तवावध्योऽयमसुरः, अस्य पाशुपतप्रहारं मा कुरु। इति श्रुत्वा तं परित्यज्य कोपेन कोटिशो दैत्यान् निहत्य तवान्तिकमागता। केवलं दानवानामेकलक्षमेवावशिष्यते, अविलम्बं तद्वध्यमेनं जहि।

सूत्रधारः—इति कालिकावचनं श्रुत्वा भगवान् श्रीरुद्रः ईषत् प्रहस्य महावृषमारुह्य स्वगणैः सह समरभूमौ प्रविवेश। तत् पश्यत, शृणुत निरन्तरं जयकृष्णेति वदत।

## ( गीतम् )

समरे साजिल शूलपाणि। ध्रुं
वृषभ वाहने चढि हातत त्रिशूल धरि
विराजे माथात मन्दाकिनी।
संगत पार्षदगण सवारे समरे मन
धर मार बोले खर्व्ववाणी ॥१४॥
मनत नाहिके छल भ्रूकुटि कुटिल मुख
क्रोधे त्रिलोचन ताम्रवर्ण।
कोपे जटा थिय भैला मेघ खण्ड खण्ड भैला
पञ्चानन भैल कालवर्ण ॥१५॥
प्रलयर धरि रूप देवासुर भैला चुप
उपसन्न समर भूमित।
दीन द्विजे बोले वाणी शुनियो रसिक प्राणी
शिव शिव घुषियो सतत ॥१६॥

अथ शङ्खचूडः समरागतं शिवं वीक्ष्य रथादवरुह्य दण्डवत् प्रणम्य वेगेन पुनर्विमानमारूढवान्। ततो महेशेन सार्द्धं नानाविधास्त्राणि ववर्ष। ततस्तयोरन्योन्यं भयङ्करयुद्धं पूर्णाब्दमासीत्। तत्र सम्वत्सरं द्वयोरपि जयपराजयौ न बभूवतुः।

एतस्मिन्नन्तरे वृद्धब्राह्मणरूपः सन् हरिः रणभूमिमागत्य तमिदमुवाच।

क्षुधाकृशाङ्गः परमातुरोहरिर्द्विजस्वरूपी रणभूमिमागतः।
अवोचदेनं दनुजर्षभं मनागिदं मनोज्ञं परिपूरयस्व मे ॥१७॥

ब्राह्मण :—हे राजेन्द्र, सर्वसम्पद्दायी भवानद्य निराश्रयाय अतीवातुराय भिक्षुकाय वाञ्छितं देहि, नो चेदङ्गीकारं कुरुष्व।

सूत्रधारः—ततः सर्वज्ञो वैष्णवप्रवरः द्विजस्यैतद्वचनं श्रुत्वा प्रहस्य शङ्खचूड उवाच।

शङ्खचूड :—अहो पूर्व्वं द्विजरूपेण हरिणा एवमङ्गीकृतस्य बलेः सर्व्वमपहृत्य देवाय दत्तं तत् सर्व्वं मया ज्ञातमेव। तथापि भवतः यदभीष्टं तद्ददामि। ततस्तदङ्गीकारं श्रुत्वा हर्षेण तं प्रशस्य हरिरुवाच।

हरि :— अहो, भवद्विधो दानशौण्डनृपतिः कुत्रापि न दृष्टः किन्तु ममाभीष्टं तव कण्ठस्थितं कवचं मह्यं देहि।

सूत्रधारः—ततो द्विजस्य वचनं श्रुत्वा तस्य त्यागात् आत्मनो मृत्युहेतुं जानन्नपि तस्मै ब्राह्मणाय कवचं दत्तवान् ।

आदाय कवचं सोऽपि कण्ठस्थं दानवस्य तत् ।
क्षिप्रं तद्रूपमास्थाय हरिस्तन्नगरं ययौ ॥१८॥

अथ हरिः शङ्खचूडस्य कण्ठस्थं कवचं गृहीत्वा शङ्खचूडस्य रूपमादाय तुलस्या व्रतभङ्गं कर्त्तुं सत्वरं तन्नगरं गतवान् । ततस्तमागतं वीक्ष्य नगरवासिनः जनाः तुलसीं विज्ञापयामासुः । ततः सा आगतं स्वामिनं श्रुत्वा सानन्दं दीपघटराजिभिः राजमार्गं शोभितं कारयित्वा पुरस्त्रीभिः स्वामिनमानयितुं गतवती । तत्र पुरस्त्रियः मांगल्यपूर्व्वकं गीतं गायन्ति स्म ।

## ( गीतम् )

चललि तुलसी ए स्वामि आनिवाक प्रति ए ॥ध्रुं

हैया जातिस्कार	नाना अलंकार
पिन्धिलन्त स्थाने स्थाने ए ।
माथात मालती	पिन्धि चले आति
आमोदित भैला घ्राणे ए ॥१९॥

समान वयसी	चौपाशे उपासि
चले आति लयलासे ।
मधु लोभे अलि	संगे फुरे चलि
सदाये नचाड़े पाश ॥२०॥

कामत आकुल	चित्त वियाकुल
चले लयलास करि ।
दिव्य वेश धरि	सज्जन्त सुन्दरी
समस्ते याइ आवरि ॥२१॥

प्रफुल्ल कमल	आनन-मण्डल
चक्षु कमलर पासि ।
कटाक्षे निरीक्षि	स्वामीक चाहावै
मुखे अल्प अल्प हासि ॥२१॥

सूत्रधारः—ततः सा तुलसी परमानन्दयुक्ता सादरं स्वामिनं प्रणनाम । ततः स राजरूपधरो

हरिः तुलसीमाश्वास्य ब्राह्मणेभ्यो गायकवादकेभ्यः भिक्षुकेभ्यश्च धनरत्नादिकं दत्वा त्वया सह सानन्दं अभ्यन्तरं प्रविवेश। ततः रत्नसिंहासनस्थं गतश्रमं स्वामिनं प्रति सा तुलसी युद्धवृत्तं पृच्छति स्म।

तुलसी—हे प्राणवल्लभ, तद्दर्शनान्मम जीवनं सफलं, किन्तु अखिलविश्वसंहर्त्ता शिवेन सह तव कथं जयोभूत् तद्रणवृत्तान्तं कथय।

सूत्रधारः—ततस्तस्या वचनं श्रुत्वा श्रीहरिरुवाच।

हरि :—हे प्रियवल्लभे, शिवेन सार्द्धं समरे पूर्णोब्दशतं तत्र महति संग्रामे परस्परं देवदानवाः अनेके हताः। तत्रावयोः जयभंगौ अदृष्ट्वा पितामहो ब्रह्मा सत्यलोकादागत्य प्रीतिपूर्व्वकं सम्मेलनं कृत्वा युद्धान्यवारयत्। ततोऽहं ब्रह्मणोमहेशस्य च वाक्येन देवाधिकारान दत्तवान्। ततो रणात् विरतः सन अहं नगरमागतः। स च शिवोऽपि मामाश्वास्य कैलासं जगाम।

सूत्रधारः—इत्युक्त्वा शङ्खचूडरूपधरो हरिः तुलस्या हस्ते गृहीत्वा शयनमन्दिरं जगाम। तत्र हरिस्तया सह नानाप्रकार विहारं कृतवान्। ततः तुलसी सम्भोगे आकर्षण-व्यतिक्रमात् व्याजरूपं स्वामिभिन्नं वितर्कयन्ती सती तमुवाच। तुलस्युवाच।

तुलसी— हे कपटवेशधर, कस्त्वं, शीघ्रं कथय, न चेत् शापं ददामि।

सूत्रधारः—तुलस्या इति सकोपवचनं निशम्य शंकितः सन् हरिः तत् शङ्खचूडरूपं त्यक्त्वा निजरूपं गृहीतवान। तत् पश्यत शृणुत निरन्तरं कृष्णेति वदत।

## ( गीतम् )

राग—श्री।

ताल—यति।

विधृतनिजरूप देव मुरारि।
निःशेषकामिनीमोहनकारी॥
चारुचतुर्भुजभूषित अस्त्रम्।
विग्रहशोभितयुगपीतवस्त्रम्॥२३॥
विकशित आनन शशीसमशोभे।
संग नचाङ्य अलि मधुलोभे॥
उन्नत नासिका नयन विशेष।
कर्णत कुण्डल रुचिर सुवेश॥२४॥

कण्ठविकल्पित कौस्तुभ राजे ।
स्वर्णर किंकिणी कटितट माजे ॥
चरणपंकज मुनिजनवित्तम्
शृणत सभासद भणितमिति गीतम् ॥२५॥

श्लोकम्— सनीरनीलाभ्रसमुद्युति हरिं
चतुर्भुजैः शंखगदाब्जचक्रकम् ।
ईषत्स्मितैर्निर्जितचन्द्रवैभवं
विलोक्य मूर्च्छां तुलसी जगाम ह ॥२६॥

अथ सा तुलसी नवीननीरदवत् श्यामलं पङ्कजलोचनं चतुर्भुजं कोटिकन्दर्पलावण्यरूपधरं हरिं दृष्ट्वा कामबाणेन विद्धासती मूर्च्छामवाप। ततो धैर्यमवलम्ब्य भगवन्तमुवाच ।

तुलसी— हे नाथ सत्त्वस्वरूपस्त्वं पाषाणादपि कठिनहृदयः। आवयोः पतिपत्न्योः त्वच्चरणारविन्दचिन्तनेन कालो गतः। तथापि स्वामिनो मृत्युनिमित्तं तद्रूपेण मम पतिव्रताभावो नाशितः। हे प्रभो त्वां दयासिन्धुं ये वदन्ति ते भ्रान्ता एव। अतः त्वामद्य प्रतिकारं शापं ददामि। त्वं शिलास्वरूपो भव ।

सूत्रधार :—इत्येवं शापं दत्त्वा तच्चरणे निपत्य अतिशोकेन विललाप ।

## ( गीतम् )

लेचारी ।

तुलसी वदति कृष्ण आगे बिलाप करय अनुरागे
हरि चरणत धने धने धैया माथ ।
शुनियोक प्रभो देव हरि जानि आछो मइ इव करि
तुमि नारायण देव अनाथर नाथ ॥२७॥
दयामय दुःखितर बन्धु करुणासागर कृपासिन्धु
भकतवत्सल बोले सबे मुनिगणे ।
अहर्निशे वेदे आछे गाइ यात परे शान्तमूर्त्ति नाइ
भजिल मात्रके साधे सबे प्रयोजन ॥२८॥
धर्म्म-अधर्म्मर तुमि साक्षी परमात्मारूपे थाका देखि
सकलो प्राणीर हृदित हुया प्रवेश ।

देखो प्रभो हेन नामचय केने व्यर्थ कैला कृपामय
किं कारणे मोक दिलाहा दारुण क्लेश ॥२६॥

मोर स्वामी यिटो शंखचूड तोमार चरणे दामोदर
काय-वाक्य-मने नितान्ते भकति करे।

मुखे नेरे तयु गुणनाम हृदि सदा रूप करे ध्यान
केने अकारणे वधिलाहा दामोदर ॥३०॥

निर्द्दया निष्ठुर निकरुण हिंसा द्वेष भैल तयु गुण
जानिलो तोमार पाथरे वान्धिछा हिया।

किं दोषे वधिला स्वामी मोर भावि चिन्ति किछो नपाओं पार
मइ दुर्भागिणी रहिवो काहाक चाया ॥३१॥

हे कृपामय चक्रपाणि आजि धरि भैलो अनाथिनी
स्वामी विने केने धरोहो आवे जोवन।

धरि आछो प्राण केने गुणि मरि नयाओं केने दुर्भागिनी
मोहोर उचित विहियोक नारायण ॥३२॥

सूत्रधारः—एवं स्वामिशोकेनार्त्तां विलपन्तीं तुलसीं विनयवाक्येन सान्त्वयन् हरिरुवाच।

हरि :— हे साध्वि, पूर्व्वं मम प्रिया लक्ष्मीः त्वमेव अन्योन्यविवादतः सरस्वतीशापात् भारते धर्मध्वजसुता तुलसीनाम्नी सती बदर्य्यां मदर्थे दुश्चरं तपः तप्त्वा ब्रह्माणमाराधितासि। शङ्खचूडोऽपि मम प्रियभक्तः सुदामा-नामा राधाशापादेवासुरयोनिं प्राप्तः। तत् प्राप्ते दुःशक्यं तपस्तप्त्वा ब्रह्माणमाराध्य त्वां पत्नीं प्राप्तवान्। अधुना द्वयोरपि शापान्तः प्रवर्त्तते। अतो मम पार्षदस्य शापान्तं दातुं मया तन्निमित्तमेव व्रतभंगः कृतः। हे प्रिये तव ईदृशो भ्रमः कुतः अभूत्। अपरञ्च हे तुलसि, मम प्रसादात् इदं मानवशरीरमेव लोकपुण्यदायिनी गण्डकीनाम्नी नदी भवतु। तत्शापेन तस्यामेव नद्यां शिलास्वरूपेण उत्पत्स्यतो मम प्रीतिकारिणस्तव इमे केशाः अन्यदेवानामपि प्रीतिदाता वृक्षप्रवरः तुलसीनाम्नो भविष्यति। अपरञ्च तन्मूलत एव सर्व्वतीर्थानामधिष्ठानं भविष्यति, तत् पत्रैकमपि भक्त्या मयि यः पुमानर्पयेत् कोटियज्ञाधिकं मम प्रीतिकरफलं प्राप्नुयात्। तुलसीपत्रं नित्यं भक्तिभावेन मयि हरौ समर्प्य तत्तोयं यः पिवेत् स लक्षाश्वमेधफलं प्राप्य मामेव लभेत। अपरञ्च मृत्युसमये तुलसी यो विभृयात् स सर्व्वपापाद्विमुक्तो मत्स्थानं प्राप्नुयात्। अपिच शालग्रामे शंखे च यः तुलसीविच्छेदं करोति स जन्मान्तरे भार्य्याहीनो भवेत।

सूत्रधारः—इति तुलसीमाभाष्य हरिः मौनेन तस्थौ। ततः सा भौतिकं शरीरं विसृज्य दिव्यदेहेन तद्वक्षसि निवासमकरोत्।

कृत्वा तुलस्या व्रतभङ्गमच्युतः,
स्वरूपमादाय मुरारिर्भूभृतः।
विमुच्य तां मानवभावतो भृशं,
तया जगामाश्रममुत्तमाश्रयम् ॥२४॥

अथ हरिर्दानवरूपेण तस्या व्रतभङ्गं कृत्वा तां निजजायां मनुष्यभावतो निःसारयन् तया सह उत्तमानां साधूनामाश्रयं वैकुण्ठस्थानं जगाम। अथ सर्व्वज्ञो महादेवः शङ्खचूडस्य मृत्युसमयं ज्ञात्वा श्रीनारायणं मनसा प्रणम्य तद्दत्तं शूलमादाय सत्त्वरं दानवं हन्तुं अधावत्। ततः शतसूर्यसमप्रभं ब्रह्मविष्णुशिवाश्रितं तेजसा सुदर्शनसमं ज्वलन्तं तं शूलं शङ्खचूडम्प्रति चिक्षेप। आगतं शूलं वीक्ष्य आत्मनो मृत्युं निश्चित्य स वैष्णवप्रवरः चापं शरां च त्यक्त्वा कृत-योगासनः श्रीकृष्णपादाम्बुजमेव मनसा चिन्तयन् तस्थौ। अथ तत् शूलं पुनः शिवहस्तमाजगाम। अतो विपश्चित एनं शूलपाणिं वदन्ति स्म।

तद्भस्मसंघात् पुरुषाग्रणीः
कृती पीतांशुको रत्नविभूषितांगः।
बिभ्रद्भुजाभ्यां मुरलीं मुखेऽसौ
आविर्बभूवाथ किशोररूपी ॥२५॥

सूत्रधारः—अथ तद्भस्मसंघात् किशोररूपी द्विभुजो पीतवासा रत्नभूषणभूषित एवम्भूतः पुरुषश्रेष्ठ आविर्बभूव। अनन्तरं रत्ननिर्मितं गोपकिशोर-कोटिभिर्युक्तं गोलोका-दागतं विमानमधिरूढः पुनर्गोलोकमेव जगाम। तत् पश्यत शृणुत निरन्तरं जयकृष्णेति वदत।

## ( गीतम् )

चाहि आछे देव यत धरि रूप अद्‌भुत
भुजयुगे धरि दिव्य अस्त्र।
चन्दने मण्डित काय जलद् वरण प्राय
ताते प्रकाशित पीत वस्त्र ॥२६॥

रत्नर निर्मित हार किंकिणी वलय टार
आनो नाना दिव्य अलंकार ।
सर्व्वाङ्गभूषित हैया गोपशिशु सङ्ग लैया
आरोहिला विमान उपर ॥ ३७ ॥
पाइला गैया निज धाम येत आछे पूर्णकाम
देखि देवे लभिला विस्मय ।
बोले द्विज दीन हीन शुन सवे बुधजन
भक्ति हेतु एमन मिलय ॥ ३८ ॥

सूत्रधारः—अथ सदाशिवः शूलाग्रेण तदवशिष्टानि अस्थीनि समुद्रे क्षिप्तवान्। तेन दानव-अस्थिजालेन नानाविधा शंखाः वभूवुः। अथ इन्द्रादयो देवाः शिवं प्रणम्य हर्षेण स्वालयं ययुः। श्रीरुद्रोऽपि देवकार्याणि साधयन् नन्दिभृङ्गादिगणावृतो देव्या सह कैलासमभिजगाम्।

अङ्कान्ते सूत्रधारो पठति

राधामाधवयोरतिप्रियतमो नाम्ना सुदामा चरः
गोपीच्छावशमेत्य तस्य रमणीशापादवाप्याहरम् ।
भावं कुत्सितमप्यविस्मृतमतिः श्रीकृष्णमेवान्वगात्,
सद्भक्तेरविनाशिबीजमखिलाः पश्यन्तु सभ्या जनाः ॥३९॥
सन्दिकैकुलसम्भवः प्रविलसत् शुभ्रांशु शुभ्रं यशो
योऽधात्तद्रिपुराशिसैन्यविदलद्दोर्दण्डप्रख्यापितम् ।
विद्वद्राशिप्रकाशिताखिलनयैः सम्मोदमानः सदा,
जीयान्मन्त्रिवरः स्वधर्म्मनिरतः श्रीमद्बृहत्फुकनः ॥४०॥
तत्पाल्योऽल्पमतिः कविः सुकृतिनां श्रीकृष्णपादार्च्चकः
नाटं प्रीतिप्रदं विविच्य वधकं श्रीशङ्खचूडस्य वै ।
शाके तत्त्वमुनीन्दुभिर्विगणिते भाषाविमिश्रैर्मुदा
वाक्यैः संस्कृतकैरिमं रचितवान् भूदेववर्य्याग्रणीः ॥४१॥

इति ब्रह्मवैवर्त्तपुराणप्रकृतिखण्डसमुद्धृते शङ्खचूडवधनामनाटके तृतीयोऽङ्कः।

# ERRATA

| Page | Line | Incorrect | Correct |
|---|---|---|---|
| 0.11 | 27 | action | scion |
| 1 | 2 | स्त्रैलोक्यमुत्युयते | त्रैलोक्यमुत्पूयते |
| 2 | 3 | | |
| 7 | 8 | एकनेत्र वहुनेत्र | एकनेत्र-बहुनेत्र etc. |
| 9 | 7 | सठव्यं | सरव्यं |
| 11 | 9 | श्रयतां, श्रयताम् | श्रूयतां श्रूयताम् |
| 11 | 29 | कियद्दरे | कियद्दूरे |
| 11 | 30 | श्रयतां | श्रूयतां |
| 13 | 1 | सव्व | सर्वं |
| ,, | 7 | अंग भंग्या | अंग-भंग्या |
| ,, | 22 | दृशयति | दर्शयति |
| ,, | 25 | एषांत्मध्ये | एषां मध्ये |
| 16 | 10 | विचाय्य | विचार्य |
| ,, | 14 | विचाय्य | विचार्य |
| 17 | 15 | शन्दन | शब्देन |
| 18 | 13 | मुनिशार्दल | मुनिशार्दुल |
| ,, | 19 | आभिमायाभि | आभिर्मायाभिः |
| ,, | 29 | कथयमि | कथयामि |
| 20 | 11 | कुशकाशवलम्वनं | कुशकाशावलम्बनं |
| ,, | 14 | सव्वदा | सर्वदा |
| ,, | 16, 20 | तच्छत्वा | तच्छ्रुत्वा |
| ,, | 23 | स्यार्ति | कुल्यार्ति |
| 22 | 4 | सुन्नरदशान | सुन्दरदशन |
| ,, | 9 | भण्यत | भण्यतां |
| 23 | 21 | तत् कुमारस्य | ततः कुमारश्च |

| Page | Line | Incorrect | Correct |
|---|---|---|---|
| 24 | 21 | वारम्वारं | वारम्बारं |
| 27 | 18 | उपनिवेश | उपविवेश |
| 28 | 21 | सम्वन्धं | सम्यन्धं |
| 29 | 17 | इतोधिकमकाय | इतोधिकमकार्यं |
| ,, | 25 | श्रयतां | श्रूयतां |
| 32 | 6 | चत्वारिंशद्वा | चत्वारिंशद्वाणपुत्राणां |
| ,, | 14 | श्रीसूर्यसशरंशरासनञ्च | श्रीसूर्यः सशरं शरासनञ्च |
| 33 | 28 | तस्थो | तस्थौ |
| ,, | 29 | वणयन्ती | वर्णयन्ती |
| 35 | 8 | अकाय चिकीर्पसि | अकार्यं चिकीर्पसि |
| ,, | 12 | बाणकोटिमिरपि | बाणकोटिभिरपि |
| ,, | 18 | त्रिचतुर्दिने | त्रिचतुर्दिने |
| 36 | 29 | अघपात्रं | अर्घ्यपात्रं |
| 41 | 5 | देवगण | देवगणा |
| ,, | 26 | पव्वतबाणेन | पर्वतबाणेन |
| ,, | 29 | सव्व | सर्वें |
| 42 | 6 | आत्तनादं | आर्त्तनादं |
| ,, | 18 | कूपकणः | कूपकर्णः |
| 43 | 21 | कोमलमांसलब्धानां | कोमलमांसलुब्धानां |
| 44 | 1 | दुम्मतें | दुर्म्मते |
| 53 | 30 | जन्मोदयतामनाटं | जन्मोदयनामनाटं |
| 54 | 4 | प्रीतस्त प्रीतस्तस्यां पुत्रत्वनाव | प्रीतस्तस्यां पुत्रत्वेनाव··· |
| 55 | 14 | एवमाकर्ण्य | एवमाकर्ण्य |
| 58 | 6 | आज्यतिलैर्हत्वा | आज्यतिलैर्हुत्वा |
| ,, | 21 | सगनाः | सगणाः |
| 60 | 3 | तव पत्ना | तव पत्न्या |
| ,, | | भागवो | भार्गवो |
| 61 | 14 | पूणहोमं | पूर्णहोमं |
| ,, | 17 | श्रयन्ताम् | श्रूयन्ताम् |

| Page | Line | Incorrect | Correct |
|---|---|---|---|
| 61 | ,, | कम्मणा | कर्मणा |
| ,, | 18 | स्वच्छया | स्वेच्छया |
| ,, | 22 | रत्नालङ्कत | रत्नालंकृत |
| 62 | 3 | इण्यादिकं | इत्यादिकं |
| 63 | 3 | दुर्ल्लभस्वरुपं | दुर्लभस्वरूपं |
| ,, | 7 | भगवानन्तद्दधौ | भगवानन्तर्दधौ |
| ,, | 18 | पयफलनिभां | पयःफलनिभां |
| ,, | 19 | विष्णुविप्ररुपं | विष्णुर्विप्ररूपं |
| ,, | 25 | पूजनफ्लं | पूजनफलं |
| 64 | 3 | बालस्वरुपं | बालस्वरूपं |
| ,, | 13 | मरुद्व्राग्रमभिवपति | मरुद्व्राग्रमभिवर्षति |
| 66 | 6 | आकण्य | आकर्ण्य |
| 67 | 17 | पूणतमं | पूर्णतमं |
| ,, | ,, | आवन्दजलधो | आनन्दजलधौ |
| ,, | 20 | ओवेत्यादि | जीवेत्यादि |
| 70 | 7 | मत् समोपमागता | मत् समीपमागता |
| ,, | 24 | पुत्रहीनाहसभाग्यवती | पुत्रहीनाहमभाग्यवती |
| 73 | 21 | अमेघं वीय | अमोघं वीर्यं |
| 74 | 12 | चक्षः | चक्षुः |
| 75 | 21 | उन्मत्ता | उन्मत्ता |
| 76 | 12 | प्रणाम | प्रणनाम |
| 77 | 16 | यमर्लाजण | यमलार्जुन |
| 78 | 11 | स्ताता | स्नात्वा |
| 81 | 2 | चन्द्रने | चन्दने |
| 82 | 2 | अतोअतुर्थदिने | अतोअतुर्थदिने |
| ,, | 27 | शंकरलयं | शंकरालयं |
| 83 | 4 | तयीरप्रतो | तयोरग्रतो |
| ,, | 4 | तद्वाक्यमाकण्य | तद्वाक्यमाकर्ण्य |
| 85 | 7 | प्रदीष समग्रे | प्रदोषसमये |

| Page | Line | Incorrect | Correct |
|---|---|---|---|
| 87 | 1 | धामतः | धीमतः |
| ,, | 12 | तदयाचनेन | तद्‌याचनेन |
| ,, | 20 | पुनः पुनर्जहाँस | पुनःपुनर्जहास |
| 88 | 7 | रामेत्युक्तान्तधीयत् | रामेत्युक्त्वान्तर्धीयत् |
| ,, | 27 | पशुराम, | पर्शुराम |
| ,, | 30 | राममङ्क | राममङ्के |
| 89 | 15 | शिशोन | शिशोर्न |
| 93 | 7 | आदओवान् | आदत्तवान् |
| 94 | 1 | विद्याकण | विद्याकेंण |
| 95 | 26 | कलिभलजनित | कलिमलजनित |
| 97 | 18 | विपमा बुद्धिन | विपमा बुद्धिर्न··· |
| 99 | 10 | भगवती | भगवते |
| 99 | 16 | तुलसीनाम्नो | तुलसीनाम्नी |
| 101 | 15 | कारुण्य वाक्यमाकण्य | कारुण्य वाक्यमाकर्ण्य |
| 102 | 28 | वर्षेषु गतेप | वर्षेषु गतेषु |
| 103 | 15 | तद वंशोद्भवः | तद्‌वंशोद्भवः |
| 104 | 5 | वाक्यमाकण्य | वाक्यमाकर्ण्य |
| 105 | 23 | नरपतिमयाभिशप्त, | नरपतिर्म्मयाभिशप्त··· |
| 105 | 26 | मत्तण्ड | मार्त्तण्ड |
| 106 | 1 | ययं | यूयं |
| 107 | 6 | तस्मादेनम्‌भिधावन् | तस्मादेनमभिधावन् |
| ,, | 7 | भवत्पादमुलमागत्य | भवत्पादमूलमागत्य |
| ,, | 15 | शिवश्व | शिवश्च |
| 109 | 9 | ह | हे |
| 111 | 9 | धमध्वज | धर्मध्वज |
| ,, | 15 | धमध्वज | धर्मध्वज |
| 112 | 13 | सर्वे स्वजनेः | सर्वैः स्वजनैः |
| 112 | 15 | यूअयति | पूजयति |
| 113 | 7 | ब्रह्मणोक्तमाकण्य | ब्रह्मणोक्तमाकर्ण्य |

| Page | Line | Incorrect | Correct |
|---|---|---|---|
| 113 | 11 | गाविन्देन | गोविन्देन |
| 114 | 2 | निरीक्षमान | निरीक्ष्यमाना |
| 114 | 5 | ब्रह्मदन्तं | ब्रह्मदत्तं |
| 116 | 1 | सवमोहनं | सर्वमोहनं |
| 119 | 1 | पपणाश्रय | भूपणाश्रय… |
| ,, | 4 | स्वचित | खचित |
| 122 | 9 | सपापदः | सपार्षदः |
| 122 | 26 | सर्व्वखत्यागः | सर्वस्वत्यागः |
| 123 | 8 | दीघदंष्ट्र | दीर्घदंष्ट्र |
| 123 | 22 | नो चेत् | नोचेत् |
| 123 | 28 | षडरसयुक्तमन्नादकं | षडरसयुक्तमन्नादिकं |
| 124 | 6 | अवश्वमुत्पत्तिः | अवश्यमुत्पत्तिः |
| 126 | 1 | मास्याय | मास्थाय |
| 127 | 28 | रणमूद्धंन्युपस्थितं | रणमूर्द्धन्युपस्थितं |
| 128 | 18 | अघ | अथ |
| 128 | 19 | अधिरूढो | अधिरूढो |
| 129 | 5 | आरुह्म | आरुह्य |
| 129 | 24 | परिधान् | परिधान् |
| 132 | 21 | नो चदङ्गीकारं | नोचेदंगीकारं |
| 133 | 8 | राजमागं | राजमार्गं |
| 134 | 4 | तद्दशनान्मम | तद्दर्शनान्मम |
| 134 | 9 | प्रातिपूर्वकं | प्रीतिपूर्वकं |
| 135 | 4 | श्रृणत | श्रृणुत |
| 135 | 5 ( margin ) | श्लाकम् | श्लोकः |
| 135 | 13 | तद्रपेण | तद्रूपेण |